विद्वद्वरेण्येन ठक्कन झा शर्मणा प्रणीता

योगरत्नावली

डा० किशोरनाथ झा - डा० भक्तिकर झा शर्मभ्यां
सम्पादिता

योगरत्नावली

मैथिलश्रोत्रियवंशावतंसेन विद्वद्वरेण्येन

ठक्कन झा शर्मणा

प्रणीता

डा० किशोरनाथ झा, - डा० भक्तिकर झा शर्मभ्यां

सम्पादिता

इलाहाबाद

१९८९

प्रकाशकः
डा० किशोरनाथ झा
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
आजाद पार्क, इलाहाबाद-२

भारतशासनस्य मानवसंसाधनविकासमन्त्रालयस्य
आर्थिकसाहाय्येन
प्रकाशिता

प्रथम संस्करणम् १०००

मूल्यम्

मुद्रकः
श्री वैष्णव प्रेस
दारागंज, प्रयाग-६

अवतरणम्

(१)

(क) मिथिलायां मधुवनीमण्डले सरिसबपाहीनामा ग्राम एको विद्यते। अत्र विराजेते बलरामेण स्थापितः सिद्धेश्वराभिधानः शिवः भगवती सिद्धेश्वरी च दार्शनिकवर्यस्य शङ्करमिश्रस्य कुलदेवता दशमहाविद्यासु छिन्नमस्ताभिधानेन परिचितेति जनश्रुतिः। अत एव चिरादेव भूमिभागोऽयं भगवत्याः सरस्वत्याः सिद्धक्षेत्रम्। अत्र अयाचीत्युपनाम्ना प्रसिद्धो भवनाथ मिश्रः, न्यायादिशास्त्राणां पारदृश्वा शङ्करमिश्रः, रसमञ्जर्यादिविविध काव्यग्रन्थानां प्रणेता महाकविर्भानुदत्तः, भृङ्गदूतादिकाव्यानां रचयिता सरसकविर्गङ्गानन्द, रसकौस्तुभालङ्कारमञ्जरीप्रणेता वेणीदत्तः, राधा नयनद्विशतीकाव्यकृन्मोहनमिश्रः, एतस्याग्रजः महामहोपाध्यायः सचलमिश्रः, विश्वविश्रुतः डा॰ गङ्गानाथ झा शर्मा, म॰ म॰ बालकृष्ण मिश्रः, ज्ञातिबाधक-परिष्कारप्रणेता लोकोत्तरप्रतिभया युतो नैयायिकः लोकनाथझाशर्मा, शास्त्रमूर्ती मार्कण्डेयमिश्रदीनबन्धुझाशर्माणौ, अलङ्कारशास्त्रव्याख्याता शिष्यधनः कविशेखरश्च बदरीनाथ झा शर्मा, साहित्याध्यापने पटीयान् गुरुचरणः मधुसूदनमिश्रः, नैयायिकेष्वग्रगण्याः कृष्णमाधवझा-महेशझा-रमेशझा-प्रभृतयश्च प्रसिद्धपाण्डित्याः यथासमयं जन्मासाद्य भारतस्य विविधेषु प्रान्तेषु ग्रन्थप्रणयनाध्यापनाभ्यां शास्त्राणां प्रचारप्रसारौ कृतवन्त इति विदितमेव खलु तद्विदाम्।

चतुर्णां विद्वद्धौरेयाणां प्रतिष्ठितेषु विश्वविद्यालयेषु कुलपतिपद-मलङ्कुर्वतां डा॰ गङ्गानाथ झा डा॰ अमरनाथ झा डा॰ आदित्यनाथ झा डा॰ चेतकर झामहाभागानां प्रसूरियं भूमिः कतिपयेषां भारतीयप्रशासन-सेवाधिकारिणामपीदानीं जन्मदात्री स्वकीयं सौभाग्यं संवर्धयति।

दिष्ट्यास्मिन्नेव सिद्धक्षेत्रेऽस्याः योगरत्नावल्याः प्रणेता मैथिल श्रोत्रियकुलभूषणः पण्डितपुण्डरीकमार्तण्डः ठक्कनझाशर्मा जनिमादाय धन्यमकरोन् मिथिलामहीं पितरौ च। वस्तुतोऽस्यैव पितरौ समाजस्या-भिनन्द्यौ कृतकृत्यौ च। तथा हि केनचिदुक्तम्—

प्रतिदिनमुत्पादयतः कति न जडान् दम्पती तनयान् ।
तावेव जगति जनकौ जनकौ यौ प्राज्ञपुत्रस्य ।। इति ।

श्रौतस्मार्तकर्माचरणचणस्य शाण्डिल्यगोत्रीयस्य विद्वद्वरेण्यस्य गुणपतिशर्मणस्त्रिष्वौरसेषु कनीयानयं पुण्यश्लोकस्य विश्रुतयशसो महामहोपाध्यायस्य जयदेवमिश्रमहाशयस्यान्तेवासितामुपगम्य 'मुखं व्याकरणं स्मृत' मित्यनुश्रुत्या मुखमिव शास्त्रेषु प्रधानं व्याकरणमध्यगच्छत् । पश्चात् प्राक्तनसंस्कारादात्मबुद्धिपरिश्रमाभ्यां च सर्वथा भिन्नेष्वपि वैद्यकज्योतिःशास्त्रयोगदर्शनेषु लोकोत्तरं वैदुष्यमुपार्जयदिति लोकेष्वद्यापि विस्मयं जनयत्येव । परं तत्समयभवेषु मतिमत्सु यथैवायमीर्ष्याभाजनमस्माद्धेतोरासीत् तथैव परां प्रसिद्धिमप्यवाप्नोत् । काव्यादिपरिशीलनं त्वस्यानुषङ्गिकमेवाभवत् ।

एतस्य चिकित्सया मृत्युमुखतो बहिरागता लब्धजीवनाश्च जना अद्यापि सादरममुं स्मरन्ति उपकारभारमावहन्तः कार्तज्ञ्यं ख्यापयन्ति चेति दृश्यतेऽस्मदादिभिः । अनेनाविष्कृतः ठक्कनबटीनामौषधविशेषस्तस्मिन् परिसरेऽद्यापि प्रचलति यस्तावत् योगपरिवर्तनेन बहुषु रोगेषूपकरोति । अस्यान्तेवासिनोऽधिगतव्याकरणाः सन्ति लब्धप्रतिष्ठाः-समाजेषु । वस्तुतोऽलौकिकप्रतिभासम्पन्न एवायमासीत् । कथमन्यथा परस्परं व्यधिकरणेषु शास्त्रेष्वव्याहतगतिर्भवितुं प्रभवेत् ।

'काशीमरणान्मुक्ति'रिति शास्त्रवचने श्रद्धालुरयं स्वयमेव स्वकीयजन्मकुण्डल्यां ग्रहस्थितिं विचार्य चरमे वयसि मिथिलातः काशीं प्रत्याजगाम । निर्धारितसमये मणिकर्णिकातीर्थमुपगत्य शिवसायुज्यमवाप्नोच्च । ज्योतिःशास्त्रस्य गणितफलितयोस्तुल्याधिकारसम्पन्नोऽयं शास्त्रीयसद्विचारप्रदानादिना समाजं बहूपाकरोदिति वयमेवात्र प्रमाणम् ।

विश्वनाथ भट्टाचार्यस्य कारिकावलीं स्वोपज्ञया मुक्तावलीव्याख्यया युतां वीक्ष्य मन्ये योगदर्शनस्य सिद्धान्तान् प्रतिपादयितुकामोऽल्पमतीनां सुखेन तदवबोधाय च सांख्यकारिकामिव योगकारिकाः निर्माय स्वयमेव तद्व्याख्यायामपि प्रावर्ततेत्यधमर्णाः वयं पश्चाद्भवास्तस्येति । जिज्ञासूनां योगदर्शनस्य विद्यार्थिनां प्रज्ञावतां च कृते ग्रन्थोऽयमुपादेयोऽवश्यं भवेदित्यत्र नास्ति विचिकित्सा विपश्चिताम् । मिथिलायां न्यायमीमांसाधर्म-

शास्त्राणां च चिन्तनस्याध्ययनाध्यापनयोर्ग्रन्थप्रणयनस्य वा परम्परा चिरादेव प्रथितासीत्। किन्तु योगदर्शनमधिकृत्य मन्येऽनेनैव मतिमता प्रचालिता लेखनीति योगदर्शनेऽपि मिथिलायाः श्लाघ्यमवदानमिदानीं तस्याः गौरवाय सर्वथा कल्पते।

समयज्ञो हि झामहाभागः योगदर्शनस्याध्यापनमपेक्ष्य ग्रन्थलेखनमेवाधिकं लोकोपकारि चिरकालिककीर्तिकरं चामनुत। योगदर्शनस्य प्रतिपाद्यानां संक्षेपेण सरलया भाषया सौलभ्येनावबोधाय विहितोऽत्र लेखकस्य प्रयासो विलक्षणं साफल्यं भजते। 'नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते' इत्यस्य सिद्धान्तस्य परिपालनमक्षरशोऽत्र कृतमस्ति। अत एव प्रसिद्धाप्रसिद्धेभ्यः शतादप्यधिकग्रन्थेभ्यः समुद्धरणं प्रमाणतया विधाय समुपोद्बलिताः विषयाः। यथा आकरेभ्यः रत्नानि संगृह्य वैकटिकः संस्करोति तान्यथ च तदीयं स्रजं निर्माय धनिकसुन्दरीणां कण्ठहारं करोति तथैव ग्रन्थस्यास्य लेखकः आकरग्रन्थेभ्यः पदार्थानादाय सुबोधया पद्धत्येह तान्निवेश्य साधूपाकरोत् जिज्ञासून् शिष्यान् तद्विदश्चेति श्लाघ्यतां याति। स्वयमपीमां वार्तां स्वीकरोति लेखकस्तथा हि तदीयोपान्त्या कारिकात्र द्रष्टव्या -

आकरेभ्यः समाहृत्य रचिता सुमनोहरा।
समर्प्यते च विद्वत्सु योगरत्नावली मया ।।इति।

भारतीयदार्शनिकैः सर्वैरप्यास्तिकनास्तिकमतानुगैः प्रायः स्वीकृतेऽप्यैकमत्येन योगस्य महत्त्वे ग्रन्थसमृद्धिरपेक्षाकृतमल्पीयस्येवेह दृश्यते। अत स्तत्परिपूर्तिरपि लेखकस्य दृष्टावासीदिति प्रत्येमि।

एतदीयतनुजनुषा पण्डितश्रीदीनानाथ झाशर्मणास्य जीवनवृत्तं हिन्दी भाषयात्र विवृतमिति तत एव तदवसेयम्।

(ख) पुरा काले गुरुकुलेषु निवसतामन्तेवासिनां कृते गुरुदक्षिणास्वीकारपूर्वकं गृहस्थधर्मपरिपालनार्थं गुरुचरणानामनुमतिरेव वैदुष्यस्य प्रमाणमासीत्। तदानीं प्रमाणपत्रं नापेक्ष्यत केनापि कुत्रापि। अत एव परीक्षाप्रणाल्यास्तदुत्तीर्णतायाश्च नास्ति शास्त्रेषु कुत्रापि समुल्लेखः। गुरोरनुशासनमेव पर्याप्तमासीत्। प्रतिष्ठितस्य गुरोः प्रतिष्ठा पाण्डित्यं कीर्तिश्च शिष्येषु सङ्क्रामन्ति स्मेति। अमुकस्य गुरोरयं शिष्य इति चिराय प्रसि-

द्ध्यति । पश्चात् गुरुकुलस्य तत्प्रतिनिधिभूतायाश्चतुष्पाठ्याः पाठशालायाः वा प्रसिद्ध्या विद्यार्थिनां समजायत प्रतिष्ठा । सर्वतन्त्रस्वतन्त्रस्य बच्चा झा महाभागस्य शिष्योऽयमिति विद्यावाचस्पतेः दर्शनपारदृश्वनः शशिनाथ झा शर्मणोऽस्माकं परमगुरोः कृते समाजे तत्पाण्डित्यप्रसिद्ध्यै चर्चासीत् । नवानीविद्यालयस्य छात्रोऽयमित्यपि छात्रस्य प्रशंसायामभिलाप आसीदेवमन्यासां प्रतिष्ठितसंस्थानामपि कृतेऽवगन्तव्यम् । गते काले राज्याश्रितैः पण्डितैः सह शास्त्रार्थे विजयमासाद्य विद्वांसः भूपालानां समादरभाजनानि भूत्वा धनमुपार्जितवन्तः वैदुष्यं च सर्वत्र ख्यापितवन्तः । पश्चान्माङ्गलिकावसरेषु भूपालैरायोजितासु विद्वत्सभासु शास्त्रार्थेन शलाकापरीक्षया वा सन्तुष्टैः सप्रतिभैः सभासदैः सम्मानिताः धीधनाः राज्येन विद्वत्परिषदा वा पुरस्कृताः सन्तः प्रतिष्ठामलभन्त । जीविकायै पश्चात् प्रशासनेन प्रचालितेयं परीक्षाप्रणाली नितान्तं लाघवकर्यप्यावश्यकीति मन्ये । अत एव प्रसिद्धायामप्यस्यां परीक्षाप्रणाल्यां, विंशतितमस्य खृष्टीयशताब्दस्य प्रथमचतुर्थांशं यावत् विद्वत्परिषदापि स्वातन्त्र्येण प्रमाणपत्रं व्यतीर्यतेति दृष्टमिहास्माभिः ठक्कनझाशर्माणमधिकृत्य । महामहोपाध्यायैः स्वनामधन्यैः शिवकुमार मिश्रप्रमुखैः काशीस्थितैः विपश्चिदपश्चिमैर्विलक्षणं प्रमाणपत्रमस्मै प्रदत्तमिति तस्य दर्शनीयतयैतिहासिकमहत्त्वशालितया चेहान्ते यथावत् मुद्रापणं विहितम् ।

(२)

पञ्चसु गुच्छकेषु विभक्तेयं योगरत्नावली पातञ्जलं योगदर्शनमनुव्रजति न तु शैवं बौद्धं जैनमन्यं वा सम्प्रदायविशेषम्, राजयोगं सविशेषं विवेचयति च । अत्र सङ्कलनयाशीतिः सन्ति कारिकाः । यासु चतुर्दशकारिकाः प्रथमगुच्छके सन्ति व्याख्याताः । अत्र योगस्य स्वरूपं प्रकारः प्रयोजनमन्ये च प्रासङ्गिकाः विषयाः प्रतिपाद्यतया परिगृहीताः सन्ति, यमनियमौ च साधु व्याख्यातौ । मातृकायाः पत्रद्वयं १५, १६ संख्याङ्कितं नष्टमभूदित्यनुपलब्धम् । आरम्भिकाणि पत्राणि यत्र तत्र कीटविद्धान्यभूवन्निति वक्तव्यमपूर्णं खण्डितं च विद्यते । कारिकाः सर्वा अपि सुरक्षिताः सन्ति । लेखकलिखितमेव यतोऽत्राधारः अन्यस्याः मातृकायाश्चास्या अनुत्पत्तिरतः उपायान्तरमस्याः क्षतेः परिपूरकं न दृष्टम् ।

द्वितीये गुच्छके त्रयोदश कारिकाः सन्ति, यासां व्याख्या नैवोपलभ्यते। यद्यपि झामहाभागेन सा कृतावश्यं तथापि चौरेणापहृतान्यथा वा कालकवलिता सती विनष्टाभवदिति महत्कष्टमनुभूयते। परं तत्सहनीयम्, यतो हि निरुपायतात्र विद्यते। सम्भवति यद् द्वितीयेऽस्य संस्करणे कोऽपि धीधन कदाचिदेतस्य विदुषोऽपूर्णां कृतिमेतां परिपूरयितुं प्रभवेत् प्रयतेत वा। न्यायमीमांसयोः ग्रन्थयोः सम्पादनकर्मण्यधुना व्यापृतस्य मम नास्त्यवकाशः न वास्ति योगदर्शनेऽपेक्षिताभिज्ञता ययाहमत्र व्याख्यार्थं प्रवृत्तोऽपि सफलः स्यामिति विरतस्ततः। अत्रासनप्राणायामप्रत्याहाराः साङ्गोपाङ्गं विवृताः सन्तीति कारिकातोऽवसीयते।

तृतीये गुच्छके पञ्चविंशतिः कारिकाः व्याख्याताः। अत्र धारणाध्यान समाधीनां स्वरूपप्रकारौ प्रयोजनमन्ये च तत्संबद्धाः विषयाः स्फुटं प्रतिपादिताः। वैराग्यस्य स्वरूपप्रकाराभ्यां सह निरोद्धव्यायाः वृत्तेः, प्रमाणानां, विपर्ययाख्यायाः वृत्ते, क्लेशानाञ्च पुङ्खानुपुङ्खं विचारः कृतः।

चतुर्थे गुच्छके सन्ति त्रयोदश कारिकाः। सिद्धीनां समाधेश्च स्वरूप प्रकारयोर्विवृतिः सविशदं विहिता। अवशिष्टाश्च विषयाः कैवल्यं तदुपायादिश्च पञ्चमे गुच्छके चतुर्दशकारिकासु साधूपपादिता इति समाधिसाधन विभूतिकैवल्यरूपचतुष्पादोऽयं योगः यथायथं पञ्चसु गुच्छकेषु विभज्य ग्रन्थकृता सुनिपुणं विवेचितः। संक्षेपेण सप्रमाणं स्पष्टं सकलानां विषयाणां यथाक्रमं सरलया पद्धत्या सुबोधया भाषया प्रतिपादनं विहितमिति वैशिष्ट्यमस्य ग्रन्थस्य सर्वथावगन्तव्यम्। तस्माद् योगरत्नावलीयमन्वर्थनामिका सत्यवश्यं जिज्ञासूनुपकरिष्यतीति दृढं विश्वसिमि।

(३)

इदमत्रावधेयम्—भारतीयाश्चिन्तकाः ऐहिकेनाभ्युदयेन साकं पारलौकिकायापवर्गाय निरन्तर चेष्टमानाः भवन्ति। 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति महर्षेः कणादस्य सूत्रं स्पष्टमेतत् सङ्केतयति।

'या लोकद्वयसाधिनी चतुरता सा चातुरी चातुरी'ति सूक्तिरप्येतदेवास्मानुद्बोधयति। प्रसिद्धेऽपि धर्मार्थकाममोक्षात्मके पुरुषार्थचतुष्टये काममोक्षयोरेव तत्र मुख्यता पुरुषस्यार्थनीयत्वात्। धर्मार्थौ तु तत्साधका

विति वस्तुस्थितिविचारणायामेतयोस्तत्र गौणतैव । उपचारादेव तत्र पुरुषार्थप्रयोगः आयुर्वै घृतमितिवत् । वस्तुतस्तौ काममोक्षयोः साधकौ । काममोक्षयोरपि मोक्ष एव श्रेष्ठः । यतो हि तस्य निरतिशयसुखस्वरूपत्व-मात्यन्तिकदुःखाभावात्मकत्वं वा । कामसुखं तु सातिशयं दुःखनान्तरीयकं परिणतिविरसं चेत्यापातरमणीयम् । मोक्ष एवोपेयोऽन्ये तु साक्षात् परम्परया वास्यौपायाः । अत्र साक्षादुपायो धर्म एवेति सर्वस्मिन्नपि दर्शनेऽस्य प्रामुख्यम् । धर्मश्च प्रवृत्तिनिवृत्तिलक्षणस्तस्मादाचारात्मकः । आचारस्तु विचारानुरूप एव भवति । अत एव भारतीया मनीषिणः धर्मदर्शनयोः सर्वथा समन्वयाय चिरादेव यतमाना विचारानुरूपमाचारं समर्थयन्ति । धर्मो यदि कर्मकाण्डा-त्मकस्तर्हि दर्शनं ज्ञानकाण्डात्मकमिति हेतोः वेदस्य ज्ञानराशिस्वरूपस्य काण्डद्वय एव विभागः । फलतः कर्मज्ञाने धर्मदर्शने आचारविचारौ चैक पर्यायौ परिपूरकः परस्परमेकोऽपरस्य रथस्य चक्रयुगलमिव स्तः । उभयत्र च योगस्य प्राधान्यं विद्यते । तस्माद् योगः भारतीयसंस्कृतेः प्रमुखमङ्गं सर्वत्र सर्वेषां चोपकारक इति निर्भयं वक्तुं शक्यम् ।

तथा हि वैराग्येण विना जन्मपरम्परातो निष्कृतिर्न संभवति । न चात्म संस्कारेण चित्तस्य वा शुद्ध्या विना वैराग्यमुदेति मनसि । आत्मसंस्कार-श्चित्तशुद्धिर्वाष्टाङ्गस्य योगस्याभ्यासेनैव भवितुमर्हति । तस्माद् जीवने योगाभ्यासस्यानिवार्यता सिद्ध्यति । न्यायदर्शनस्य तत्त्वज्ञानोत्पत्तिप्रकरणे महर्षिगौतमः स्फुटं योगाभ्यासमुपदिशति । तथा च तत्रत्यसूत्राणि— 'अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः [४।२।४२] तदर्थं यमनियमाभ्या-मात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः [४।२।४६]। समाधिविशेषाभ्या-सात् [४।२।३८] इति च । एवं भामत्यां वाचस्पतिमिश्रोऽप्यभिलपति—'सा हि संस्कारदीर्घकालनैरन्तर्यसेविता सती दृढभूमिर्विशेषसाक्षात्काराय प्रभवति कामिनीभावनेव स्त्रैणस्य पुंसः' इति । स्थालीपुलाकन्यायेन दर्शनान्तरेष्वपि योगाङ्गाभ्यासस्यावश्यकत्वप्रतिपादनं प्रदर्शितमत्र ।

यद्यपि एतेन योगः प्रत्युक्तः [२।१।३ ।] इति वेदान्तसूत्रं योगस्या-पातंतः निराकृतये चेष्टत इति प्रतीयते तथापि सांख्ययोगयोरभिमतायाः सृष्टिप्रक्रियाया अप्राकृतावस्य तात्पर्यं न तु योगमार्गेणात्मसंस्कारस्यान्तः-करणस्य शुद्धेर्वा निराकरणः इति वाचस्पतिमिश्रेण तत्र भामत्यां विविच्य प्रतिपादितम् ।

(७)

न केवलं विचारात्मकेषु दर्शनेष्वेव योगस्य माहात्म्य कीर्तितमपि तु दैनन्दिनाचारेऽपि धर्मपदेनाभिहितेऽपि महत्त्वमस्य स्वीकृत्य परिगृहीतान्यस्याङ्गानि । अत एव सन्ध्यावन्दनादौ प्राणायामस्य समावेश, नैमित्तिक पर्वसु व्रतोपवासादिविधानम् । तथा चोक्तं मनुना –

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।। इति [६।९२।]

अत्र सर्वविधेषु धर्माचरणेषु योगाङ्गान्येवानुस्यूतानि सन्तीति कस्यापि नास्ति तिरोहितम् । न केवलमुपनिषदागमपुराणदर्शनेष्वेवापि तु कान्तासम्मितोपदेशकारिषु काव्येष्वपि माहात्म्यं कीर्तितमस्य महाकविभिः कालिदासप्रमुखैः समाजस्यादर्शसंस्थापकैः । 'योगेनान्ते तनुत्यजाम्' इति रघुवंशपङ्क्तिरिह हठात् स्मृतिपथमवतरति । किमत्र कारणमिति जिज्ञासायां वक्तव्यं भवति यद् भारतवर्षं हि कर्मभूमिः भोगभूमिस्त्वन्यो भूभागः । अत एव तपसोऽत्र प्राधान्यं न तु भौतिकसुखजातस्य । तपश्च भवति योगानुष्ठानेन स्वतः सुकरञ्चेति सर्वकालिकमस्य महत्त्वम् । अत इदानीमप्यस्य माहात्म्यमनुभवन्तो जना विश्वस्मिन्नपि विश्वे प्रचारं कामयन्ते ।

(४)

पाटलिपुत्रस्थितस्य दैनिकसमाचारपत्रस्यार्यावर्तस्य सम्पादनविभागे कार्यरतेन पुस्तकप्रणेतुश्चतुर्थपुत्रेण पण्डितश्रीदीनानाथझाशर्मणा सहैकदा वार्तालापक्रमे तत्र समागतस्य मम पुस्तकस्यैतस्य चाक्षुषं प्रत्यक्षमभवत् । पाण्डित्यपूर्णामात्मीयस्य प्रतिवेशिनः कृतिमिमां वीक्ष्यास्य प्रकाशनाय मम लालसाभूत् । मयि विश्वासशीलेन श्रीदीनानाथझाशर्मणा विक्रेतुं प्रकाशयितुं च पुस्तकमेतत् मह्यमर्पितम् । हस्तलेखग्रन्थान् संग्रहीतुं बद्धपरिकरस्य गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठस्य प्राचार्यमहाभागानां समक्षं मयैतस्य पुस्तकस्य मूल्यदानेन संग्रहायेतः प्रकाशनाय च प्रस्तावः कृतः । परन्तु नांशिकमपि साफल्यं लब्धम् । यतो हीदानीन्तनस्य लेखकस्य रचनेयं प्राचीनताविरहादसंग्राह्या मातृकात्रयस्यानुपलब्ध्या सामीक्षिकसंस्करणानर्हतया प्रकाशयितुमप्यशक्येत्युत्तरं तेभ्यः प्राप्तम् ।

पश्चान्मया चिन्तितं यद् वापीकूपतडागादीनां जीर्णोद्धारे सति यदि भवति पुण्यं तर्हि सारस्वतकर्मणोऽस्य प्रकाशने सत्यपि पुण्यमवश्यं भविष्यति ।

किञ्च कृतेः प्रकाशने प्रचारे च सति ग्रन्थकर्तुस्तस्य दिव्यात्मन आशीर्वादो लभ्येत, जिज्ञासूनां विद्यार्थिनामुपकारोऽपि भवेदिति बुद्ध्या ममाभूदिह प्रवृत्तिः ।

सुहृद्वराः मयि निर्हेतुककृपाशीला बम्बईनिवासिनः गोस्वामीकुलभूषणा बुद्धिघनाः श्रीमन्तः श्याममनोहरलालजीमहाभागा अस्य प्रकाशनव्ययभारं वोढुं मया प्रार्थितास्तैरुदारहृदयैर्द्रविणमपि प्रदत्तम् । अतोऽहमधमर्णस्तेषाम् । किन्तु तद्धनं सर्वांशतः कार्यसाधकं नाभूदतः भारतशासनस्य मानवसंसाधनविकासमन्त्रालयेन सञ्चालितस्य संस्कृतभाषानुभागस्याधिकारिणः समक्षं मयैतदर्थमावेदितम् । ततश्च साहाय्यस्य प्रतिश्रुतिं प्राप्य मुद्रापणार्थं सोत्साहं मुद्रणालयसञ्चालकेन सह सम्बन्धं स्थापितवानहं कृतकार्यश्चाभूवम् । तस्मात् हार्दिकीं कृतवेदितामात्मीयां तन्मन्त्रालयस्य संस्कृतभाषानुभागस्याधिकारिभ्यो ज्ञापयामि । नितान्तमात्मीयस्य सुहृद्वरेण्यस्य श्रीमतः श्याममनोहरलालजीमहाभागस्य कृते कृतज्ञतानिवेदनमौपचारिकतानिर्वाहमात्रं न शोभते, अतस्तत् मम हृदय एव तिष्ठतु । एवमेवासौ मयि कृपाशीलस्तिष्ठतु सदेति भगवान् श्रीकृष्णः सप्रणति प्रार्थ्यते । पण्डित श्री दीनानाथझाशर्मा ग्रन्थकृतस्तनूजन्मा सदा ममोत्साहमभ्यवर्धयदिति तस्मै प्रणतिं समर्पयामि । अपेक्षितं साहाय्यमाचरद्भ्यः गुरुकल्पेभ्यः जयपुरस्थमहाराजासंस्कृतमहाविद्यालयस्य प्राप्तावकाशप्राचार्येभ्यः नैयायिकशिरोमणिभ्य श्री खड्गनाथमिश्रमहाभागेभ्योऽथ च मदीयां प्रार्थनां स्वीकृत्य स्वकीयसम्मत्या मामनुगृहीतवद्भ्य. परमादरभाजनेभ्यः प्रयाग विश्वविद्यालयस्य दर्शनविभागाध्यक्षेभ्यः डा० सङ्गमलालपाण्डेय महाभागेभ्यः, विविधविधपरामर्शप्रदानेनोपकुर्वद्भ्यः आत्मीयेभ्यः पूज्यवर्येभ्यः पण्डित तारिणीशझा महाशयेभ्यश्च प्रणितरम्परा सभक्ति समर्पिता भवतु । सुहृद् पण्डित श्रीजीवेश्वर झाशर्मा प्रूफसंशोधने साहाय्यमाचरदिति तस्याहं हृदयेनास्मि कृतज्ञः ।

सन्ति ममाशीर्वादस्य भाजनानि डा० श्री रामकिशोर झा, डा० श्री भक्तिकर झा, पण्डित श्री चन्द्रशेखरतिवारी शुभोदयाः शिष्याः । एतैर्यथावसरमात्मनोऽनुरूपं मम साहाय्यं कृतम् । डा० श्री भक्तिकर झा शर्मा सम्पादनेऽपि कर्मण्यपेक्षितं परिश्रमं कृतवानिति तदीयं नाम सम्पादकतयापि

निवेशितम् । श्रीवैष्णव मुद्रणालयस्याधिकारिणः कर्मचारिणश्च सहायता-मकुर्वन्निति मम धन्यवादपात्राणि भवन्ति ।

मदीयमतिमान्द्येनानवधानतया वा मुद्रणयन्त्रालयस्य वा दोषेण याः काश्चिदत्र त्रुटयोऽभूवन्, तदर्थमहं प्रज्ञावतां पाठकानां समक्षं साञ्जलिबन्धं क्षमां याचे । मन्येऽपरस्मिन् संस्करणेऽवश्यं तासां त्रुटीनां परिमार्जनं भवेत् । विदुषामपरिचिता कीर्तिकरी च कृतिः मतिमतां लोचनयोरतिथिर्भवतु जिज्ञासूनुपकरोतु चेति बुद्ध्यैवेदानीमस्य प्रकाशनम् । अन्ते भूयोऽपि पद्येना-धस्तनेन धीधनेषु प्रार्थनां सविनयं विदधदहं विरमामि ।

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ।। इति !

विदुषां विधेयस्य
किशोरनाथ झा शर्मणः

गुरुपूर्णिमा २०४६ वैक्रमाब्दः ।
गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठम् ।
आजाद पार्क, इलाहाबाद-२

लेखक का जीवनपरिचय

प्रस्तुत पुस्तक के रचयिता विविध शास्त्रों में निष्णात पण्डित ठक्कन झा का जन्म विहार प्रान्त के मधुबनी जिले के (तत्कालीन दरभंगा जिले के) पाहीटोल ग्राम में १८८४ ई० में हुआ था। इनके पिता का नाम गुणपति झा था। इन्होंने काशी में दरभंगा महाराजा द्वारा स्थापित संस्कृत महाविद्यालय में शिक्षा पायी। व्याकरण में १९१२ ई० में वङ्गाल से तीर्थ की उपाधि प्राप्त कर इन्होंने अपना वैदुष्य प्रदर्शित किया। इन्होंने स्वनाम धन्य महामहोपाध्याय पण्डित जयदेव मिश्र से व्याकरण के प्रमुख ग्रन्थों का अध्ययन किया था। उस समय के काशी के प्रतिष्ठित विद्वानों ने इनके पाण्डित्य से प्रभावित होकर एक विलक्षण प्रशस्तिपत्र दिया था जिसे ग्रन्थ के अन्त में स्वतन्त्र रूप से ब्लाक बनवा कर यहाँ दिया गया है।

अध्ययन समाप्ति के बाद इन्होंने उत्तर प्रदेश के कानपुर नगर में कालूलाल सस्कृत महाविद्यालय में चौदह वर्षों तक विद्यादान किया। पश्चात् विहार के पूर्णिया जिला के दुर्गागंज नामक प्रसिद्ध गाँव की दुर्गा पाठशाला में २६ से ३६ ई० तक अध्यापन किया। पश्चात् अपने ही गाँव में रहकर आयुर्वेदिक चिकित्सा के द्वारा लोकोपकार में लग गये। इलाके के प्रतिष्ठित वैद्य तथा डाक्टर भी कभी-कभी अपने परिवार के असाध्य रोगी को दिखाने के लिए इन्हें बुलाते रहते थे और इनकी चिकित्सा से लाभान्वित होते थे। चिकित्सक के रूप में इन्हें काफी ख्याति मिली और पर्याप्त सम्मान हुआ। अपनी दयालुता एवं सादगी के कारण किसी रोगी की चिकित्सा के लिए ये सगुन या फीस आदि नहीं लेते थे। बहुधा अपने घर पर ही रोगियों को देखा करते थे। कभी कभार परिस्थिति की बाध्यता रहने पर किसी को घर पर जाकर ये देखते थे। पश्चात्—

'मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः'

के अनुसार बम्बई में जे० बी० एम० संस्कृत महाविद्यालय जूनी हनुमान गली के प्राचार्य पण्डित श्यामानन्द झा ने तार द्वारा सूचना भेजकर इन्हें बम्बई बुला लिया और अध्यापन का पुनः सुअवसर दिया। किन्तु

वहाँ इनका मन नहीं लगा। इन्होंने घर पर रहकर ही विद्यादान करने का निश्चय किया। जो भी कोई मेधावी छात्र इनसे कुछ सीखने के लिए इनके पास आया, वह निराश नहीं लौटा। भारतीय विद्याओं पर इनका अद्भुत अधिकार था। ज्योतिष, आयुर्वेद, सांख्य, योग, वेदान्त, मीमांसा, न्याय, वैशेषिक व्याकरण और साहित्य आदि किसी भी शास्त्र के छात्र इनके पास आकर निराश नहीं होता था। बहुत प्रसिद्ध अध्यापक भी बहुधा अपने सन्देह निराकरण हेतु तथा जिज्ञासा की शान्ति हेतु इनके पास आया करते थे।

ये योगाभ्यास में भी निपुण थे। योगासन में बैठकर प्राणायाम के बल पर ये कभी-कभी जमीन से ऊपर उठ जाया करते थे। कतिधा तालाब में आसन बद्ध बैठकर या सोकर पानी के ऊपर तैरते नजर आते थे। कभी-कभी योगाभ्यासियों के विशेष आग्रह पर या योग की शिक्षा के क्रम में ये ऐसा करते देखे जाते थे।

इलाके के प्रसिद्ध लक्ष्मीश्वर ट्रस्ट बोर्ड के ये आजीवन सदस्य रहे। इस बोर्ड के द्वारा लक्ष्मीश्वर एकेडेमी हाई स्कूल और लक्ष्मीवती संस्कृत विद्यालय का सञ्चालन होता रहा है।

इन्होंने तीन पुस्तकें लिखीं—दर्शन की तत्त्वरत्नावली तथा योग में योगरत्नावली। एक पुस्तक इन्होंने मिथिला के पञ्जीप्रबन्ध पर लिखी थी। जो बृहत्काय थी। किन्तु उपलब्ध है केवल यही योगरत्नावली। अन्य पुस्तकें कालकवलित हो गयीं।

योगरत्नावली के प्रसङ्ग में कुछ बातें कहना यहाँ आवश्यक है। लेखक ने मिथिलाक्षर में यह पुस्तक लिखी पश्चात् देवनागरी में इसकी प्रेसकापी भी स्वयं इन्होंने बनायी, जो उनके दिवङ्गत होने के वाद तीस वर्षों तक सुरक्षित थी। अचानक घर में चोरी हो जाने से देवनागरी में लिखे हुए इस ग्रन्थ के प्रथम गुच्छक और मिथिलाक्षर में लिखे हुए तृतीय, चतुर्थ और पञ्चम गुच्छक बच गये, जो गाँव के बाहर एक खेत में मिले। सौभाग्य से मिथिलाक्षर वाली कापी में सम्पूर्ण ग्रन्थ के श्लोक संगृहीत थे। अत एव द्वितीय गुच्छक की कारिकाएँ उपलब्ध हो सकीं, उसकी व्याख्या

नहीं मिल पायी। शेष गुच्छक की व्याख्या भी सुरक्षित रही। देश में विद्वानों की कमी नहीं है। भविष्य में कोई महात्मा-विद्वान् इस द्वितीय गुच्छक की कारिकाओं की व्याख्या कर इस कृति को अवश्य उज्ज्वल करेंगे—ऐसी मेरी धारणा है।

३०-११-१६४६ ई० अग्रहण शुक्ल दशमी तिथि को इस ग्रन्थ के लेखक ने काशी में परम पद को प्राप्त किया।

इसके प्रकाशन के लिए मैंने बहुत प्रयास किया। संस्कृतविश्वविद्यालय वाराणसी के कुलपति डा० गौरीनाथ शास्त्री ने ग्रन्थ की बड़ी प्रशंसा की किन्तु प्रकाशन हेतु अपनी असमर्थता दिखायी। प्रयाग के गङ्गानाथ झा केन्द्रीयसंस्कृतविद्यापीठ के प्रवाचक डा० किशोरनाथ झा से बातचित के सिल-सिले में इस ग्रन्थ के बारे में चर्चा हुई और उन्हें भी यह ग्रन्थ प्रकाशन योग्य लगा। उन्होंने कहा कि इसके प्रकाशन से जिज्ञासु पाठक तो लाभान्वित होंगे ही योगदर्शन भी समृद्ध होगा और सब से बड़ी बात तो यह होगी कि वह दिवङ्गत आत्मा प्रसन्न होकर हम लोगों को आशीर्वाद देंगे, जिनका परिश्रम सफल होगा और कृति रूप कीर्ति अक्षुण्ण बनी रहेगी।

मैंने इस उत्साही व्यक्ति को यह पुस्तक प्रकाशन हेतु हस्तान्तरित कर दिया। डाक्टर झा ने प्रकाशन हेतु अनुदान संग्रह किया, ग्रन्थ की प्रतिलिपि की, सम्पादन की दृष्टि से आवश्यक संशोधन आदि किया तथा प्रकाशन हेतु लगे रहे। इसी का परिणाम है कि आज हमलोगों के हाथ में यह पुस्तक इस रूप में उपलब्ध है। अत एव डा० किशोरनाथ झा मेरे आशीर्वाद के पात्र हैं।

मुझे विश्वास है कि विज्ञजन इस ग्रन्थ को देखकर अवश्य लाभान्वित होंगे और जिज्ञासु छात्र कृतार्थ होंगे। आजकल योग शिक्षा का अधिक प्रचार हो रहा है। अतएव यह अवसरोचित भी है।

भवदीय

अक्षयतृतीया १६८६ ई०

ग्रन्थ लेखक के आत्मज
पं० दीनानाथ झा
सम्पादकीय विभाग,
आर्यावर्त, पटना।

सम्मति

पण्डित ठक्कन झा कृत योगरत्नावली दो भागों में विभक्त है। प्रथम भाग में ८१ कारिकाएँ हैं, जो पाँच गुच्छकों में वर्गीकृत हैं। द्वितीय भाग में इन कारिकाओं के ऊपर झा जी की स्वोपज्ञ टीका है। टीका गद्य में हैं परन्तु उसमें योगशास्त्र के अनेक ग्रन्थों के प्रमाण तत्तत् विषयों पर उपलब्ध हैं जो प्रायः पद्य में हैं। सम्पूर्ण ग्रन्थ लघु है, किन्तु वह अर्थ गौरव से भरपूर है। लेखक ने योग दर्शन का विवेचन वेदान्त दर्शन के सन्दर्भ में किया है। उसने पातञ्जल योग और शाङ्कर वेदान्त का समन्वय किया है। अतएव उसकी कृति योग-वेदान्त की एक विशिष्ट रचना है।

मेरी दृष्टि में योग और योगदर्शन में वैसा ही स्पष्ट भेद है जैसा धर्म और धर्मदर्शन में है। योग दर्शन योग की विधियों, अवस्थाओ तथा उपलब्धियों का दार्शनिक विवेचन हैं। यह आवश्यक नही है कि योगी योग दार्शनिक भी हो। परन्तु योग दार्शनिक को योगी के जीवन का प्रगाढ परि-चय होना आवश्यक है, वह भले ही स्वयं योगी न हो। यदि वह योगी भी हो तो मणिकाञ्चन संयोग से उसका योग दर्शन और भी प्रामाणिक होगा।

पण्डित ठक्कन झा मेरे दादा गुरु महामहोपाध्याय पं० जयदेव मिश्र के शिष्य थे और महामहोपाध्याय सर डा० गङ्गानाथ झा के ग्राम के निवासी थे। उनका सारा जीवन व्याकरण वेदान्त और योग के अनु-शीलन में बीता है। उनकी प्रस्तुत कृति से उनके प्रगाढ वैदुष्य का परिचय सरलता से हो जाता है। उनकी इस कृति को डा० किशोर नाथ झा ने सम्पादित करके प्रकाशित किया है। इसके लिये वे भी धन्यवाद के पात्र हैं।

मुझे पूर्ण विश्वास है कि योग रत्नावली बीसवीं शती के योगदर्शन की एक मौलिक रचना के रूप में सम्मानित होगी। इसमें योग के सभी प्रकारों का वर्णन है और उनमें से राजयोग को विशेष महत्त्व दिया गया है। शैव शाक्त परम्परा की साधना में योग अनिवार्य है। कम से कम इस परम्परा को वेदान्त के सन्निकट लाने में झा जी का योगदान माना जाएगा।

इलाहाबाद

१९ जुलाई, १९८९ ई०

डॉ० संगमलाल पाण्डेय
प्रोफेसर एवं अध्यक्ष
दर्शन विभाग
इलाहाबाद विश्वविद्यालय

पण्डितठक्कनशर्मप्रणीतायाः योगरत्नावल्याः कारिकाणां संग्रहः।

प्रणम्य मातापितरौ गुरुं ठक्कनशर्मणा।
योगरत्नावली रम्या कारिकाकृत्य तन्यते ॥१॥
त्रिगुणात्मचित्तरज्ज्वा नियन्त्रितश्चिरमविद्यया पुरुषः।
कपिरिव नटचा भ्रमितः श्रान्तो मुक्त्यै श्रयेद् योगम् ॥२॥
योगः समाधिरुदितो वृत्तिनिरोधः सचित्ततत्त्वस्य।
मन्त्रादिभिर्विभेदे निरुच्यते राजयोगोऽसौ ॥३॥
सत्कारदीर्घकालाव्यवधानैर्विहितसाधनाध्यासः।
वैराग्यं त्वाख्यातं कारणमत्राथ साधनान्यष्टौ ॥४॥
यमनियमौ पीठानि प्राणायामश्च करणनिग्रहश्च।
तदनु धारणा ध्यानं समाधिराहुः षडप्येके ॥५॥
तत्राहिंसनसत्येऽस्तेयदये धैर्यमार्जवं क्षान्तिः।
शौचममैथुनमविदुर्मितभोजनमिति यमं दशकम् ॥६॥
क्वचिदपि च देशकालप्रसरैर्न छलिता निषेविता यदि।
ऐश्वर्याण्यपि सुवते महाव्रतं सार्वभौमाः स्युः ॥७॥
तप आस्तिक्यं दानं सन्तोषो ह्रीर्मतिर्जपो व्रतं च।
सिद्धान्तश्रवणं दश नियमाः पूजनमीश्वरस्य च ॥८॥
क्रोधाद्वा यदि मोहाल्लोभाद्वा वाधितुं समुद्युक्ताः।
हिंसादयो वितर्का उन्मूल्याः प्रतिपक्षभावनातः ॥९॥
विरमत्यपि शाश्वतिकं सुदृढा हिंसस्य सन्निधौ वैरम्।
उदयति च तत्रभवतो वाक्सिद्धिः सत्यनिष्ठस्य ॥१०॥
समुपस्थितिरस्तेये प्रतिष्ठिते भवति सर्वरत्नानाम्।
सिद्धिः शक्तिमनल्पामर्चिनुते ब्रह्मचर्येऽसौ ॥११॥
स्वाङ्गेषु दोषदर्शी शौचात् कुरुते परैर्न संसर्गम्।
चितिसाक्षात्कृतिशक्ति ह्यान्तरो लभते पुनरेषः ॥१२॥
सुखमतिशयितं लभते सन्तोषात् सुपरिरक्षितादधिकम्।
तपसोऽशुद्धिविरामे कायेन्द्रियसिद्धिमादत्ते ॥१३॥

जपनिरतस्य च देवा ऋषय सिद्धाः समक्षतां यान्ति ।
ईश्वरमाराधयतः फलति समाधिर्विरतकामस्य ॥१४॥

[इति प्रथमगुच्छकम्]

निःसङ्गो दृढचेता गुरुप्रियो विगतसाध्वसः शान्तः ।
दान्तश्चेद् विमलान्तः शास्त्रज्ञः साधयेद् योगम् ॥१५॥
विजने शुचौ सुरम्ये निःशब्दे निरुपद्रवे गेहे ।
गिरिगह्वरेऽथ वा स्वं कृत्वासनमभ्यसेद् योगम् ॥१६॥
स्थिरसुखमासनमुक्तं विचिन्तयेद् योनिभेदतस्तत्र ।
सिद्धं पद्मं भद्रं सिंहञ्चेति प्रधानानि ॥१७॥
न प्रयतेत कथञ्चित् वेपथुरङ्गेषु जायते यस्मात् ।
सन्ध्यायेच्च फणीशं पीठजयः स्यात्ततोऽभ्यासात् ॥१८॥
द्वन्द्वैर्नं बाध्यतेऽसौ जितपीठोऽनलसश्च निरुजश्च ।
वीर्यवतोऽस्य च शक्तिः प्राणायामेऽधिका नूनम् ॥१९॥
सह शिष्यान् योगीन्द्रान् गणनाथं गुरुमीश्वरं प्रणम्य ।
जितपीठस्थोऽप्यचलः सिद्धचै युञ्जीत चाव्यग्रः ॥२०॥
बाह्याभ्यन्तरवायोर्गतिविच्छेदः प्रयाणतो यत्र ।
समुदीरितः स फणिना प्राणायामस्तुरीयाङ्गः ॥२१॥
रेचकपूरकसंज्ञौ तत्पूर्वः सहितकुम्भकोऽभिहितः ।
विरतस्ताभ्यां केवलकुम्भक इति गीयते मुनिभिः ॥२२॥
तत्राद्यत्रितयानां प्रमितानां देशकालसंख्याभिः ।
उद्घातः स्यात् प्रथमो द्विर्मध्यस्त्रिर्भवेत् तीव्रः ॥२३॥
अनुभूमिकमभ्यासात् तीव्रोद्घातस्य दीर्घसूक्ष्मत्वम् ।
यातोऽनिले प्रतनुते सिद्धिं केवलकुम्भकस्य च ॥२४॥
तदनु विवेकावरणे विरतिरकार्यादनुक्षणं क्षीणे ।
नाडीणां च विशुद्धिः विमलमनोधारणा शक्तिः ॥२५॥
प्राणजयाच्चित्तस्य स्थैर्ये विषयाभिमुख्यताहानात् ।
यदनुसृतिः करणानां प्रत्याहारोऽयमाख्यातः ॥२६॥
नानाविधेऽपि तस्मिन् फणिभाषितभाषितोऽत्र मुख्यत्वात् ।
परमातुरस्य वा स्यादिन्द्रियवर्गस्य यत्नसिद्धौ ॥२७॥

[इति द्वितीयगुच्छकम्]

एभ्योऽन्तरङ्गमङ्गत्रयमथ तत्रापि धारणापूर्वा ।
चित्तस्य देशबन्धोऽभिहिता सेयं पुराविद्भिः ॥२८॥

नाभ्यादिरान्तरो वै देशो बाह्यश्च चन्द्ररत्नाद्यः ।
नैवापयाति तस्माच्चित्तं सा स्यात्तदा सिद्धा ॥२९॥

ज्योतिष्मती विशोका विषयवती वा प्रवृत्तिरुत्पन्ना ।
मैत्र्यादिभावनातः प्रसन्नचित्तं स्थितं तनुते ॥३०॥

तस्मिन् देशविशेषे सुचिरं ध्येयावलम्बनं ज्ञानम् ।
नैवावगाहतेऽन्यत् किञ्चित् तद्ध्यानमाख्यातम् ॥३१॥

सगुणत्वनिर्गुणत्वप्रविभेदात् तदुदीरितं द्विविधम् ।
आद्ये सकलं ध्येयं त्वन्यस्मिन् निःकलं ब्रह्म ॥३२॥

आलम्बनस्वभावावेशाद् ध्यानं यदात्मरूपेण ।
उपरतमिवार्थमात्राभासं चेदन्त्यमङ्गं तत् ॥३३॥

परमपरं च द्विविधं वैराग्यं तत्र भिद्यते त्वपरम् ।
संज्ञाभिश्च चतुर्धा गीताभिः शास्त्रतत्त्वज्ञैः ॥३४॥

विषयेषु मा प्रवृत्तिः करणानामिति विधूनने यत्ने ।
चित्तमलानां तदिदं यतमानाभिधमिष्यते किल ॥३५॥

यत्ने निर्धूतानां व्यतिरेकेणावधारणं तेषु ।
व्यतिरेकसंज्ञकं तद् वैराग्यं [च] परमर्षिसम्मतम् ॥३६॥

विषयेषु चेन्द्रियाणां चित्तकषायाः प्रवर्तनाहीनाः ।
एकेन्द्रियसंज्ञा स्यात् स्पृहयन्तो मनसि स्थिता यदि ॥३७॥

समुपस्थितेऽपि विषये दोषपरिज्ञा वितृष्णचित्तस्य ।
दृष्टे चानुश्रविके भवत्युपेक्षावशीकारः ॥३८॥

तदनु च पुरुषख्यातेर्गुणवैतृष्ण्यं परं तदैवैतत् ।
ज्ञानप्रसादमात्रं कैवल्यं यदविनाभावि ॥३९॥

अथ वृत्तयस्तु पञ्च क्लिष्टाक्लिष्टाः सता निरोद्धव्याः ।
कर्माशयनिचयस्य क्षेत्रीभूताश्च ताः क्लिष्टाः ॥४०॥

या वै विवेकविषयाः सत्त्वपुरुषयोः समाप्तकृत्यानाम् ।
अधिकारस्य गुणानामक्लिष्टास्ता विरोधिन्यः ॥४०॥

तासु प्रमाणविपर्ययविकल्पनिद्रास्मृतिस्वरूपासु ।
त्रिविधं प्रमाणमिष्टं प्रत्यक्षानुमानशब्देति ॥४२॥
आद्यं बाह्ये वस्तुनि चित्तस्येन्द्रियनालयोपरागात् ।
तद्विषयार्थविशेषावधारणपरेष्यते वृत्तिः ॥४३॥
अनुमेयस्य सपक्षेष्वनुवृत्तं विपक्षविनिवृत्तं च ।
लिङ्गं यत्तद्विषया धर्मपरावृत्तिरनुमानम् ॥४४॥
दृष्टार्थस्य परत्रानुमितार्थस्य च संविदे प्रयुक्तात् ।
शब्दात्तदर्थविषया वृत्तिः स्यादागमश्श्रोतुः ॥४५॥
तद्रूपेण प्रतिष्ठेत्ययथार्थानुभवो विपर्ययः ।
नोऽनुपजातविरोधी बाधितुमीष्टे प्रमाणं सः ॥४६॥
शब्दज्ञानमहिम्नाऽसद्विषयो विषयत्वमेति यस्याम् ।
व्यपदेशादनुगम्या वृत्तिः सा स्याद् विकल्पाख्या ॥४७॥
अभिभूय सत्त्वरजसी करणान्यावृत्त्य यत्तमोवृद्धौ ।
जनयति च वृत्त्यभावं निद्रा सा तन्मयी वृत्तिः ॥४८॥
ग्राह्योपरक्तबोधप्रभवात् संस्कारतः सजातीया ।
वृत्त्यन्तरविषयीकृतविषया वृत्तिः स्मृतिः कथिता ॥४९॥
क्लेशाः पञ्चाविद्यास्मिता च रागस्तथा द्वेषः ।
अन्त्यश्चाभिनिवेशः प्राज्ञैर्ज्ञेया यथाशास्त्रम् ॥५०॥
जात्यायुर्भोगानां प्रभवं कर्माशयं नियतम् ।
जनयन्ति ते च हेया योगाङ्गाभ्यासतो नितराम् ॥५१॥
सूक्ष्मीकृताश्च चेतसि लीना ध्यानेन चेतसा सार्धम् [क्लेशाः ।] ।
परिदग्धबीजकल्पा ह्यस्तमितास्तेन वा प्ररोहेषु ॥५२॥

[इति तृतीयगुच्छकम्]

परिभावितस्तु संयम इह तद् विजयात् समाधिप्रज्ञायाः ।
आलोकश्चानन्तरभूमिषु विनियोग इष्यते तस्य ॥५३॥
संस्कारसंयमतस्त्वनुपश्यति पूर्वजन्मवृत्तान्तम् ।
परचित्तस्य [च] ज्ञानं परचित्ते संयमाल्लभते ॥५४॥
कायस्य च रूपादावन्तर्ध्यानादि सिद्धयस्तस्मात् ।
द्विविधे कर्मणि मरणज्ञानं चारिष्टतोऽप्येवम् ॥५५॥

सूर्ये भुवनज्ञानं हस्तिबलादौ च तद्बलं तद्वत् ।
अन्यशरीरावेशप्रमुखा ज्ञेया विभूतयोऽप्येवम् ॥५६॥
प्रथमकल्पिकस्यैताः प्रारब्धज्योतिषः कथिताः ।
तत्र च वैशारद्ये ऋतम्भरा जायते प्रज्ञा ॥५७॥
तत्प्रान्तभूमिमन्त्यामाविष्टं मधुमतीप्रख्याम् ।
अमुमुपनिमन्त्रयन्ते दिव्यैर्देवो ऋतम्भरप्रज्ञम् ॥५८॥
तत्रापि दोषदर्शं सङ्गमकृत्वा न विस्मयः कार्यः ।
भूतेन्द्रियविजयार्थं समाधिमपि भावयेत् प्राज्ञः ॥५९॥
स्थूलादिषु भूतानां पञ्चविधेष्वपि च संयमाद् विजयः ।
रूपादि कायसम्पत् प्रादुर्भावोऽणिमादीनाम् ॥६०॥
ग्रहणादिषु पुनरिन्द्रियवर्गस्य च संयमाद् विजयः ।
तस्मान् मनोजवित्वं विकरणभावः प्रधानविजयश्च ॥६१॥
एता मधुप्रतीका उच्यन्ते सिद्धयस्तिस्रः ।
ज्ञानं विवेकजं च क्षणतत्क्रमयोश्च संयमाद् भवति ॥६२॥
स्फुटमपि च सर्वविषयं युगपद् भूतार्थगोचरं वशिनः ।
तारकमिति परिपूर्णं भूतेन्द्रियविजयिनस्तदिदम् ॥६३॥
द्विविधः समाधिरिष्टः संप्रज्ञातोऽप्यसंप्रज्ञातश्च ।
विषयविशेषाभोगात् फणिना प्रथमश्चतुर्विधः प्रोक्तः ॥६४॥
सवितर्कः सविचारः सानन्दश्चास्मितामात्रः ।
सर्वेते तद्भेदा अपि निर्दिष्टाः सबीजाख्याः ॥६५॥

[इति चतुर्थगुच्छकम्]

भवति विवेकख्यातिर्वैशारद्ये ततो विदुषः ।
आध्यात्मिकः प्रसादः सर्वात्माधीशता चैवम् ॥६६॥
सिद्धिः परा विशोका सेयं प्राप्यैव यां विद्वान् ।
विहरति वशी विशोकः प्रक्षीणक्लेशबन्धनो नितराम् ॥६७॥
प्रज्ञाकृतसंस्कारो नवो नवो बाधते त्वन्यम् ।
अवसादयति च चित्तं ख्यात्यवसानं स्वकार्येभ्यः ॥६८॥
तस्यापि चेन्निरोधः परवैराग्यात्तदा विदुषः ।
निर्बीजश्च समाधिः सर्वनिरोधात् समादिष्टः ॥६९॥
ख्यानेऽपि चेद् विरक्तो न प्रार्थयते ततोऽपि यदि किञ्चित् ।
भवति सर्वथा ख्यातेः समाधिरेतस्य धर्ममेघाख्यः ॥७०॥

तस्मात् समूलकाषं कथिताः क्लेशास्तदा विद्वान् ।
जीवन्नेव विमुक्तो ब्रह्मविदामग्रणीः सैषः ।।७१।।
विगतमलावरणस्यानन्त्याज् ज्ञानस्य चाल्पतामेति ।
ज्ञेयं तदा गुणा अपि कृतकृत्यास्ते निवर्तन्ते ।।७२।।
पुरुषार्थैः शून्यानां लयो गुणानां स्वकारणे लिङ्गे ।
परिनिष्ठिता स्वरूपे चितिशक्तिर्वेति कैवल्यम् ।।७३।।
आसन्नं च समाधि वैराग्यात् तीव्रसंवेगात् ।
ईश्वरभक्तिविशेषात् पुनरालभते भृश युञ्जन् ।।७४।।
क्लेशैः कर्मविपाकैर्वासनया चापरामृष्टः ।
सर्वगुरुः सर्वज्ञः सदा विमुक्तः स ईश्वरः प्रोक्तः ।।७५।।
बुद्धेः प्रतिसंवेदी प्रजपन् तद्वाचकं प्रणवम् ।
अनुचिन्तयन् तदर्थान् निरन्तरायः स्वरूपमपि वेत्ति ।।७६।।
अथ सर्ववृत्त्यभावोपयिकाभ्यासैककारणस्त्वपरः ।
संस्कारमात्रशेषो मुनिभिर्गीतोऽप्यसौ द्विविधः ।।७७।।
भवकारणो विदेहप्रकृतिलयानां च सौगतादीनाम् ।
श्रद्धावतामुपायप्रत्यय उक्तो मुमुक्षूणाम् ।।७८।।
द्रष्टुस्तदा स्वरूपेऽवस्थानं यथा भवति कैवल्ये ।
उपचरितभोगशून्यः शुद्धो मुक्त स केवली पुरुषः ।।७९।।
आकरेभ्यः समाहृत्य रचिता सुमनोहरा ।
समर्प्यते च विद्वत्सु योगरत्नावली मया ।।८०।।
माधान् मत्सरिणां मनस्सु विमलोल्लासाय सैषा पदम्
किं नैष्यन्ति निरीक्ष्य तां कृतधियः सन्तः कियन्तो मुदम् ।
गुञ्जापुञ्जनिषक्तभीलवनितामुक्तापि मुक्तावली
प्रेम्णा धन्यविलासिनीकुचतटे विन्यस्यते यत्पदम् ।।८१।।

[इति पञ्चमगुच्छकम्]

योगरत्नावली

भवविषयमहार्तिपीडितस्त्वां
श्रुतिपरिबोधितमीश जातु जन्तुः ।
श्रयति सपदि यदि याति सोऽतिमृत्युं
विषमविलोचन ! ते नमो नमोऽस्तु ॥

भवविषयेत्यादि । भवविषया यावन्तः संसारभावा जनन[मरणात्मका] स्तैर्या आधिदैविकाधिभौतिकाध्यात्मिकेति दुःखत्रयात्मिका महार्तयस्ताभिः पीडितः । हे ईश ! जगति निग्रहानुग्रहयोः स्वतन्त्र ! श्रुतिपरिबोधितं तत्त्वमस्यादिवाक्यादवगतं निर्गुणं ब्रह्मेति यावत् । त्वां शिवं चतुर्थं शिवं मन्यन्ते इति श्रुतेः । जातु कदाचित् बहुजन्मसञ्चितपुण्यराशिसमुदये सतीत्यर्थः । दुःखत्रयापनोदाय सेवते निदिध्यासनसचिवविज्ञानेन प्रसंख्यानसहकृतमनसा योगेन वाभिमुखीकरोति । स सपदि शीघ्रं बलवत्तरप्रारब्धं कर्मापि समुन्मूल्येति यावत् । 'विनिष्पन्नसमाधेस्तु मुक्तिस्तत्रैव जन्मनि' ति स्मरणात् । अतिमृत्युं याति कैवल्यपदवीं प्राप्नोतीत्यर्थः ।

'तमेव विदित्वातिमृत्युमति' [ ] ।

'अध्यात्मयोगाधिगमेन देवं,
मत्वा धीरो हर्षशोकौ जहाति' ।

इत्यादिश्रुतिभिस्तथावगमात् ।

तथा च चिकित्सकशिरोमणे ! हे विषमविलोचन ! त्रिनेत्र ! अपि तु कर्मानुसारफलवितरणशीलासमदृष्टे ! महेश्वर ! ते तुभ्यं नमो नमोऽस्तु । त्वमेव खलु मुक्तिप्रद इत्यहं त्वामेवाश्रये इति ध्वनयितुं भवत्युद्रेकात् सम्भ्रमे द्विरुक्तिः । [भवत्यस्मा]दिति व्युत्पत्त्या हे भव धृतरजोगुणात्मक [विग्रहवद्ब्रह्मात्मक] हे ईश ! अणिमादिसकलैश्वर्यशालिन् [श्रीनिवासजगत्पालक] विष्णुस्वरूप ! हे विषमविलोचन [चतुराननो मापतं] त्वमेक एव खलु सृष्टिस्थितिलयरूप[विकारवैचित्र्यात्म]करूपमिवाभासि इति भावः । यतो वा [इमानि भूतानि] जायन्ते येन जातानि जीवन्ति यं प्रयन्त्यभि[संविशन्ति च] [तै० उ० ३।१।] सर्वागमरुद्र इति श्रुतेः । महार्तिपीडितः पुत्रकलत्राद्यभावजनिताधिव्यग्रो जन्तुः जातु श्रुतिपरिबोधित देव एक आस्ते विश्वस्य कर्ता भुवनस्य गोप्तेति श्रुत्या सामान्यज्ञानविषयं त्वं श्रयति जपार्चादिना शुश्रूषते सोऽपि सपदि मोक्षं लभते । ईश्वरप्रणिधानाद्वेति [१।२३] पातञ्जलसूत्रात्तथावगमात् । अतस्ते नमो नमोऽस्तु ।

कः खलु तृणयाचकाय कल्पलतामर्पयति । त्वं पुनः पुत्रकलत्रयाचकायापि स्वपदवीं कैवल्यं वितरसि । त्वादृशो वदान्यगुरुरन्यो नास्तीत्यहमपि त्वामेवाश्रये इति ध्वनयितुं हर्षोद्रेकात् सम्भ्रमे द्विरुक्तिः ।

अथ वा महार्तिपीडितो ज्वरादिसंगतो जन्तुः श्रुतिपरिबोधितं जनश्रुत्यावगतं न तु आप्तवाक्यान्निश्चितमिति भावः । त्वां भिषग्वरं मन्यमानं जातु श्रयति चिकित्सायै सेवते । हे ईश ! व्याधिशान्त्यै दक्ष ! अपि तु विपरीतलक्षणया चिकित्सानभिज्ञ ! स सपदि मृत्युं याति अतस्त्वमपि महार्तिपीडितो भव । स्वचिकित्साफलमनुभवितुमित्यर्थः । रे त्रिषमविलोचन ! क्रूरदृष्टे ! वैद्यरूपधृगन्तक ! ते नमो नमोऽस्तु । 'वैद्यराज नमस्तुभ्यमिति' लोकोक्त्या दूरतोऽपसरेति ध्वनयितुं भृशार्थे द्विरुक्तिरित्येवं भङ्ग्या भगवन्तं स्तौति । किंवदन्त्यावगतं चिकित्सानभिज्ञं सेव्यमानो मृत्युमेति । वेदादवगतं त्वामाश्रयन् किलातिमृत्युमेति । अथ वा तत्त्वमस्यादिवाक्यजनितविज्ञानात् समाधिना साक्षात्काराद् वा मोक्षं वितरसीति मोक्षसाधनानभिज्ञानां मादृशानां पामराणां कथं तत्राधिकार इति महदन्तरं ध्वनयितुं भृशार्थे द्विरुक्तिः ।

प्रणम्य मातापितरौ गुरुं ठक्कनशर्मणा ।
यौगरत्नावली यत्नात् कारिकाकृत्य तन्यते ॥१॥

[जन्मजरामर]णक्लेशबहुले संसारे 'नासौ पुनरावर्तते' इति [श्रुत्या मोक्षमेव परम] पुरुषार्थतयाम्नायते—इति तदभ्युपायं [साङ्गं योग] मुपक्रमते—

त्रिगुणात्मचित्तरज्ज्वा नियन्त्रितश्चिरमविद्यया पुरुषः ।
कपिरिव नट्या भ्रमितः श्रान्तो मुक्त्यै श्रयेद् योगम् ॥२॥

त्रिगुणेत्यादि । पुरुषो जीवः विपर्ययज्ञानवासनात्मिकया अविद्यया कर्त्र्या त्रिगुणात्मचित्तरज्ज्वा त्रिगुणात्मकं [सत्त्वरजस्तमोगुणा]त्मकं यच्चित्तमन्तःकरणतत्त्वम् त्रिगुण [वस्तुन एवं] परिणामादिति भावः । सैव रज्जुः त्रिगु[णमयी पुरुषाधि]रूढा भवति तया करणभूतया चिर[मनादिकाल]तो बद्धः अर्थादविद्याजनितो यो [मोहो भेद]ग्रहस्तत्कृतानादिसंस्कारविशेषात्मक[शुभानशुभांश्च] धर्मान् धर्माधर्मादीनात्मीयत्वेनाभिमन्यमानः । अत एव भ्रमितः [1]चतुरशीतिलक्षपरिमितयोनिषु धर्माधर्मफलानि अनुभवितुमिति यावत् । तदुक्तं मैत्रेयी ब्राह्मणे..........पिण्डो वाभिभूतः कर्तृभिर्हन्यमानो.......... खल्वसौ

(१) नव लक्षाणि के जीवाः दशलक्षाणि पक्षिणः ।
स्थावराः विंशलक्षाणि त्रिंशच्च पशवः स्मृताः ॥
कृमिकीटास्तु लक्षाणि एकादश प्रकीर्तिताः ।
मनुष्याश्चापि चत्वारि बुधैर्लक्षाणि कीर्तिताः ॥ इति पुराणम् ।

भूतात्मान्स:पुरुषेणाभिभूतो..............नानात्वमुपैत्यथ यत्त्रिगुणं चतुरशीति [लक्षपरिमितयोनिषु[परिणतं भूतत्रिगुणमेतद् वै नानात्वस्य रूपं [सत्त्वरजस्तमांसि एता]नि गुणानि पुरुषेणेरितानि चक्रमिव चक्रि[णो रथस्य मुख्याङ्गमिव भ्रमितस्तत्स्वमनधिगच्छन् मुमुक्षुरिति यावत्। योगं वक्ष्यमाणरूपं समाधिं श्रयेत् संसेवेतेति।

दृष्टान्तमाह—नट्या कपिरिवेति। यथा नर्तक्या त्रिगुणदृढरज्ज्वा चिरं नियन्त्रित: गेहं गेहं भ्रमित: श्रान्तश्च वानर: बन्धविमुक्तये युक्तिं श्रयतेऽर्थादुपायमाश्रित्य नर्तकीमेव पराभूय स्वतो बन्धविनिवृत्तो भवति। तथायमपि पुरुष: समाधिमाश्रित्य तज्जातया ऋतम्भरप्रज्ञया चाविद्यां समुन्मूल्य चिद्रूपे प्रतिष्ठितो भवत्विति।

प्रवृत्तिजनिकेष्टसाधनत्वविषया कृतिसाध्यत्वविषया च मतिरनुबन्धचतुष्टयज्ञानमन्तरा न सम्भाव्ि नीति योगो विषय: मोक्ष: प्रयोजनम् मुमुक्षुरधिकारी विषयस्य ग्रन्थेन प्रतिपाद्यप्रतिपादकभावश्च सम्बन्ध इति तदपि प्रदर्शितम्।

ननु 'ब्रह्म वेद ब्रह्मैव भवती'त्यादिश्रुतिभि: कारणान्तराव्यवच्छेदेन ब्रह्मज्ञानस्य मुक्तिजनकतयाम्नातत्वेन 'ऋते ज्ञानान्न [मुक्तिरिति' वेदान्त]सिद्धान्त:। ब्रह्मण: श्रवणं च तन्त्वौपनिष[दं पुरुषमिति] [स्मृत्या आत्मा वारे श्रोतव्य इति] श्रुत्या औपनिषदमहावाक्यादवगम्यते [श्रवणादीनां किमा]त्मफलकत्वमिति [चेदत्रोच्यते मुक्तिरूपफलकतत्त्वज्ञानफलकत्वमिति तत्त्वज्ञानं च ब्रह्मसाक्षा]त्कारात्मकमित्यत्र न कस्यचिद् विमति:.........[स च न].........श्रवणमात्रजन्य: सम्भवति। शब्दस्य मननादि विनात्मसाक्षात्कारकरणत्वस्याक्लृप्तत्वात्। शब्दो नापरोक्षधी हेतुशब्दत्वात् स्वर्गापूर्वबोधकशब्दवदित्यनुमानात्। 'यद्वाचानभ्युदितम्' 'यतो वाचो निवर्तन्ते' इत्यादि श्रुतेश्च।

किञ्चौपनिषदपदस्यापि उपनिषदावगम्य इत्येवार्थो न तूपनिषन्मात्रावगम्य इति। येन तत्राभीष्टसिद्धिर्भवेत्। तन्त्वौपनिषदं पुरुषमिति श्रुतिरपि निर्गुणं ब्रह्म पृच्छामि न तु ध्येयं सगुणमित्यर्थं प्रतिपादयन्ती परोक्षज्ञानपरैव।

यदप्याहु:—'तद्वास्य विजज्ञौ तमस: पारं दर्शयानीत्यादि' श्रुतिषु आचार्योपदेशानन्तरमेव ब्रह्मसाक्षात्कारश्रवणात् तत्त्वमस्यादिवाक्यमेव विज्ञानजनकम्। 'वेदान्तविज्ञानसुनिश्चितार्था' इत्यत्र सुनिश्चितपदेन वेदान्तवाक्यजज्ञानोत्तर मितरनैराकाङ्क्ष्यश्रवणात्।

तत्त्वमस्यादि वाक्योत्थं ज्ञानं मोक्षस्य साधनमिति।

नारदीयस्मृतेश्च। तदप्यापातत: तत्त्वमसीति सकृदेवोच्यमाने यदि तद्वास्य विज[ज्ञौ तमस: पारमित्यादिषु आचार्योपदेशानन्तरमेव स्यात्। तदा शब्दापरोक्षज्ञानवादिनां स्यादपि [किन्तु न] तथा नवकृत्व उपदेशानन्तरं विजज्ञौ

[तमसः पारमित्यादि श्रुते]रेवञ्च अत्राप्यर्थतः प्रसंख्यानापर[त्वान्नवक्तव्व इत्यादेर्बहुल पर] तयादृतो न तु शब्दकरणब्रह्म [साक्षात्कारफलकतया त]मसः पारं दर्शयतीत्यत्रापि सत्त्वशुद्धौ ध्रुवा[याः स्मृतरुप]लम्भे सर्वग्रन्थीनां विप्रमोक्ष इति श्रुतिपर्यालोचनया निदिध्यासनपरमकाष्ठायाः ध्रुवायाः स्मृतेरेव तमसः पारदर्शनहेतुत्वमवगम्यते। तथा च तमसः पारमिति श्रुतिः। नारदीयस्मृतिश्च ग्रामममार्गोपदेष्टरि ग्रामदर्शकोऽयमितिवत् परम्परया प्रयोजकत्वेनौपचारिक्यैव। वेदान्तविज्ञानेति श्रुतिरपि यतय इति पदस्वरसेन वेदान्तवाक्यसहकृतविज्ञानावस्थापन्ननिदिध्यासनेन सुनिश्चितार्था इत्यर्थिकैव। अत एव बृहदारण्यके चतुर्थे मैत्रेयीब्राह्मणे 'आत्मनो वा अरे दर्शनेने'ति [२।४।५।] श्रुतिविवरणे यदैकत्वमेतान्युपगतानि तदा सम्यग् दर्शनं नान्यथा श्रवणमात्रेणेत्यादिना वाक्यमात्रस्यापरोक्षज्ञानकरणत्वनिषेधो भाष्यकारैरुक्तः सङ्गच्छते। अत एव याज्ञवल्क्येनापि 'व्याचक्षाणस्य तु मे निदिध्यासस्व' [२।४।४] इत्येवं निदिध्यासनमेव साक्षात्कारात्मकदर्शनसाधनत्वेनाम्नातम्। अत एव च ब्रह्मातिरिक्तेभ्यो निग्रहो मनसश्चेन्द्रियाणां योग इति लक्षणलक्षितं तप एव। तपसा ब्रह्मसम्प्राप्तिरिति ब्रह्मविज्ञानसाधनतयाम्नातं न तु श्रवणमात्रम्। अत एव च आत्मा वारे द्रष्टव्यः [श्रोतव्यो मन्तव्यो] निदिध्यासितव्य इति श्रुत्या श्रवण[मनननिदिध्या]सनानि साधनतयाम्नायन्ते न तु श्रवणमात्रमिति। तथा चाहुर्भामतीकाराः—'न ब्रह्मज्ञानमात्र संसाराधिकधर्मनिवृत्तिकारणमपि तु साक्षात्कारपर्यन्तम् ब्रह्मसाक्षात्कारश्चान्तःकरणवृत्तिभेदः श्रवणमननजनितसंस्कारसाचिवमनोजन्मा षडजादिभेदसाक्षात्कार इव गन्धर्वशास्त्रश्रवणाभ्याससंस्कृतमनोयोनिरिति'।

नन्वेवमपि तं त्वौपनिषदमिति श्रुत्या ब्रह्मणः श्रवणं चोपनिबद्धवाक्यादेवावगम्यते। अप्रामाण्यशङ्कानिरासि तर्कानुसरणात्मकं मननं च वेदान्तादिशास्त्रेभ्य एव जायते। ततः श्रवणमननजनितेन निश्चिततया चित्तस्य ब्रह्माकारतया प्रवाहात्मकेन ब्रह्मसाक्षात्कारो न निदिध्यासनेनेति चेत् निदिध्यासनमेव हि [ततस्तु तं पश्यति] निष्कलं ध्यायमान इति श्रुत्या स्वोत्पाद्यब्रह्मापरोक्षज्ञानमित्यवेहि। अत एव यदेतन्निदिध्यासनमिति जगुर्जरद्विदन्तः। अत आत्मा वारे ध्यातव्यो निदिध्यासितव्य इति ध्यानस्य निदिध्यासनपरत्वं [व्याच]ख्युरुपनिषद्भाष्यकाराः। एतेन [शङ्कराचा]र्यमते निदिध्यासनं न ध्यानार्थकमिति [भ्रान्]तोऽपि परास्तः। बृहदारण्यकचतुर्थाध्यायगतमैत्रेयीब्राह्मणे—'आत्मा वारे द्रष्टव्य' [४।५।६] इत्याम्नाय आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेत्याम्नातम्। तत्र दर्शनादीनां समानपदैरेवानुवादे दर्शनेन निदिध्यासनस्यापि निदिध्यासनेनेत्यनुवादो युक्तो न विजातीयेन विभिन्नार्थकेनेत्याशयेन वार्त्तिककृता—

अनुवादे यथोक्तानां प्रक्रान्तदर्शनादिषु ।
विज्ञानेनेत्यथ कथं निदिध्यासनमुच्यते ।।

इत्येवमाक्षिप्य—

ध्यानशङ्कानिवृत्त्यर्थं विज्ञानेनेति भण्यते ।
निदिध्यासनशब्देन ध्यानमाशङ्क्यते यतः ।।

इति समाहितम् । एवञ्च तस्य निदिध्यासनापरपर्यायं ध्यानमात्रं न ब्रह्मसाक्षात्कार क्रियायामलमपि तु ध्यानमेव दीर्घकालनैरन्तर्यादिनानुष्ठितं प्रसंख्यानपरमकाष्ठापर पर्यायज्ञानस्यावस्थाविशेषविज्ञानपदाभिधेयं चितिशक्तेः प्रतिष्ठात्वसम्पत्ते-श्चरमपरिणामाच्च ।

[श्रोतव्यः] श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः ।
[मत्वा च] सततं ध्येय एते दर्शनहेतवः ।। इति ।

अत्र [निदिध्या] सितव्य इत्यस्य ध्येयपदेनाभिधानं सङ्गच्छते

ननु 'यन्मनसा न मनुते यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्यादि' श्रुतिभि र्ब्रह्मणो मनसश्चागोचरतयाम्नातत्वेन कथं मनःकरणकध्यानेन ब्रह्मसाक्षात्कार इति चेत् वचसोऽप्यगोचरतया आम्नातत्वेऽपि शब्दश्रवणमात्रेण ब्रह्मसाक्षात्कार इवेति प्रतिबन्धेवोत्तरम् ।

यद्वा प्रसंख्यानासहकृतमनसः साक्षात्काराकरणत्वेऽपि 'ततस्तु तं पश्यति निष्कलं ध्यायमानः' 'मनसा तु विशुद्धेने' त्यादिश्रुतिभिः प्रसंख्यानसहकृतमनसो ब्रह्मसाक्षात्कारकरणत्वस्याबाधितत्वात् ।

ननु प्रसंख्यानस्य प्रमाकरणेष्वपरिगणनाद् प्रसंख्यानजनितकामिनीसाक्षा-त्कार इव ब्रह्मसाक्षात्कारोऽपि प्रमा न स्यादिति चेन्न प्रमाणाजन्यत्वेऽपि विषयाबाधेन प्रमात्वसम्भवात् । यथा पाणौ पञ्च वराटकान् पिधाय केनचित् करे कति वराटकाः सन्तीति प्रश्ने पञ्च वराटका इति तदुत्तरवक्तु र्वाक्यप्रयोगमूलभूतसंख्याविशेष-ज्ञानस्य मूलप्रमाणमन्तरापि यथा यथार्थत्वं विषयाबाधेन तद्वदत्र [ब्रह्मसाक्षात्कारे कामिनीसाक्षा] त्कारस्य तु बाधितविषयत्वेनाप्रमात्वसम्भवोऽपि दोषजन्यत्वेन । किञ्चाप्रयाणात्तत्रापि हि दहराकाश इत्यधिकरणे दहराद्यहंग्रहोपासनयास्य जीवस्य ब्रह्मसाक्षात्काराङ्गीकारात् । कामाविष्टचेतसः कामाहितकामिनीसाक्षात्कारे प्रसंख्यानस्य सदोषत्वात् । ब्रह्मसाक्षात्कारे योगस्य करणत्वकल्पनं नापूर्वम् । तथा च भामतीकाराः— 'सा हि सत्कारदीर्घकालनैरन्तर्यसेविता सती दृढभूमिः विशेष साक्षात्काराय प्रभवति कामिनीभावनेव स्त्रैणस्य पुंस' इति । अत एव कथं तत्वज्ञान-

मुत्पद्यते इत्याकाङ्क्षामुत्थाप्य 'समाधिविशेषाभ्यासा'[४।२।३८]दित्यादीनि गौतम-सूत्राणि व्याचख्युर्न्यायभाष्यकाराः ।

प्रसंख्यानसहकृतमनसो ब्रह्मसाक्षात्कारप्रमाकरणत्वे बहुश्रुतिस्मृतिपुराणादीनि प्रमाणानि सन्ति । तथा हि—

'ततस्तु तं पश्यति निष्कलं ध्यायमानः' । अथ दर्शनाभ्युपायो योगः । श्रद्धा भक्तिध्यानयोगादवेहि ।

अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीत्यादि श्रुतयः ।

ध्यानयोगेन संपश्येद् गतिमस्यान्तरात्मनः ।
सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः ।। इति मनुः ।
इज्या[चारदमाहिंसा]दानस्वाध्यायकर्मणाम् ।
[अयं तु परमो धर्मो] यद् योगेनात्मदर्शनम् ।। इति याज्ञवल्क्यः ।
[युञ्जन्नेवं सदात्मनं] योगी नियतमानसः ।
[शान्ति निर्वाणपरमां] मत्संस्थामधिगच्छति ।। इति [गीता ६।१५]

भगवद्वाक्यरूपगीतोपनिषद् ।

[ऐहिकानामुष्मिकान्] सर्वान् विहाय द्विजसत्तमः ।
[प्रसन्नो नि]रतः शान्तः परं ब्रह्माधिगच्छति ।।

इति महर्षिमातङ्गः ।

योगात्सञ्जायते ज्ञानं योगो मय्येकचित्तता । इत्यादित्यपुराणम् ।
आत्मज्ञानेन मुक्तिः स्यात् तच्च योगादृते नहि । इति स्कन्दः ।
योगाग्निर्दहति क्षिप्रमशेषं पापपञ्जरम् ।
प्रसभं जायते ज्ञानं ज्ञानान्निर्वाणमृच्छति ।। इति शिववाक्यम् ।
स्वसंवेद्यं हि तद्ब्रह्म कुमारी स्त्रीसुखं यथा ।
अयोगी नैव जानाति जात्यन्धो हि यथा घटम् ।। इति दक्षः ।
दुःसहा राम संसारविषवेगविसूचिका ।
योगगारुडमन्त्रेण पावनेनोपशाम्यति ।। इति वशिष्ठवाक्यम् ।
योगात् संप्राप्यते ज्ञानं योगो धर्मस्य लक्षणम् ।
योगः परन्तपो ज्ञेयस्तस्माद् युक्तः समभ्यसेत् ।।
न च तीव्रेण तपसा न स्वाध्यायैर्न चेज्यया ।
गतिं गन्तुं द्विजाः शक्ता योगात् संप्राप्नुवन्ति याम् ।।

इत्यत्रिः ।

अत एव कठब्राह्मणे मृत्युनोपसन्नं नाचिकेतसं प्रति विज्ञेयार्थस्य दुरवबोधत्व-प्रदर्शनेन विविधभोगवितरणप्रलोभेन [परीक्ष्य सदुपदेश]योग्यतामभिज्ञाय परावरात्मतत्त्वविज्ञानो [पदेशपद्धत्या प्रसन्नेन] वैवस्वतेन यं न विदुरित्या··············द्वा परोक्षज्ञानसाधनत्वाभावाभिधान·························गाधिगमेनेत्यादिना योगशब्दित ·······················मनःकरणकं ब्रह्मसाक्षात्कारमुपक्रम्य···················एतदालम्बनं श्रेष्ठमित्यन्तेन देश··························रणमुपन्यस्य न बहुना श्रुतेन यमैष वृणुते··························इत्यनेन ध्यानसम्भजनापरपर्यायं वरणमुक्त्वा नाशान्तो नासमाहित इत्यनेन व्यतिरेकमुखेन ध्यानोत्तरकालिकं समाधिश्चाभिधाय आत्मानं रथिनं विद्धि इत्यादिना सोऽध्वनः पारमाप्नोतीत्यन्तेनार्थवादप्रणाल्या समाधेरवश्यकर्तव्यताकथनद्वारा सफलत्वं च परिकीर्त्य दृश्यते त्वग्र्यया बुद्ध्या इत्यादिना ऋतम्भरप्रज्ञायाः सूक्ष्मार्थग्रहणे सामर्थ्यमुपवर्ण्य यच्छेद् वाङ्मनसी प्राज्ञ इत्यादिना समाधेरनुष्ठानप्रकारं परिभाष्य आवृत्तचक्षुरमृतत्वमिच्छन् हृदा मनीषा मनसाभिक्लृप्त इत्यादिना योगमभ्यस्य यदा पञ्चावतिष्ठन्ते इत्यादिना योगस्वरूपमभिधाय यदा सर्वे प्रमुच्यन्ते कामा येऽस्य [हृदि स्थिताः] अथ मर्त्यो अमृतो भवत्यत्र ब्रह्म समश्नुते इत्यादि·····························साक्षात्कारफलो योग एव मुक्त्युपायत्वेनोप संगृहीत···············। ननु दशमस्त्वमसीत्यादौ शब्दस्य साक्षा················या क्लृप्तत्वेन सुखादीनां साक्षिभास्यत्वाङ्गी ···················मनसः कुत्रापि करणत्वाक्लृप्तेर्ब्रह्म साक्षात्·················स्यैव करणत्वं युक्तम् । अत एव जनकादीनां [योगाभ्यास]मन्तरैव शब्दादप्रतिबद्धज्ञानमोक्षयोः श्रवणं सङ्गच्छते इति चेन्मैवम् नहि दशमस्त्वमसीति श्रवणमात्रेण दशमोऽस्मीति मन्यतेऽपि तु वक्तुराप्तत्वनिश्चयायेतरान् सर्वान् परिगणय्यात्मानं दशमत्वेन प्रत्येति । तथा च प्रसंख्यानापरपर्यायं गणनमेव दशमप्रत्यक्षहेतुः शब्दस्तु सहकारिमात्रम् । तस्य साक्षात्कारकरणत्वा योगात् । अहमेवेदं सर्वं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोक इति श्रुत्युक्त स्वाप्ने ब्रह्मसाक्षात्कारे गर्भस्थवामदेवस्य ब्रह्मसाक्षात्कारे च मनस एव करणत्वाङ्गीकाराच्च ।

परमवशिष्यते जनकादीनां ज्ञानमोक्षयोः श्रवणं तदपि यथा शब्दादपरोक्षज्ञानवादिनां मते महत्यारभट्या सन्यासस्य जिज्ञासाङ्गत्वं ज्ञानपरिपाकाङ्गत्वं च प्रतिपाद्य जनकादिषु व्यभिचारमाशङ्क्य—

जन्मान्तरेषु यदि साधनजातमासीत्
सन्न्यासपूर्वकमिदं श्रवणादिकं च ।
विद्यामवाप्स्यति जनः सकलोऽपि यत्र
तत्राश्रमेऽपि च वसन्न निवारयामः ।।

मातृकायां पृष्ठ संख्ये १५-१६ नोपलब्धे । १७ त आरभ्यते—

ज्ञत्वस्य निवृत्तावपि सर्वबन्धनिवृत्तदेहे सत्यपि प्रारब्धकर्मणो बलवत्त्व ·····
प्रयुक्तं दुःखमनुवर्तते एवायोगिनो ज्ञानिनः। [एतत्तु तदधिगम] उत्तरपूर्वार्धयोर-श्लेषविनाशौ तद्व्यपदेशात् [४।१।१३।] इत्यादि सूत्रेषु स्पष्टम्। किञ्च तदेव शक्तः ······ति लिङ्गं मनो यत्र निषक्तमस्य इति श्रुते ······।

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः॥ इति [गीता ८।६]

भगवद्वाक्याच्च प्रयाणकालिकोद्बुद्धवासनानुसारेणैव सदसद्योनिं जीवः प्राप्नोतीति स्फुटं प्रतीयते। एवञ्च मरणसमये समुद्भूतं वैक्लव्यं कथमयोगिना ज्ञानिना वारयितुं शक्यते। तथा च योगबिन्दौ —

पिपीलिका यदा लग्ना देहे ध्यानाद् विमुच्यते।
असौ किं वृश्चिकैर्दष्टो देहान्ते वा कथं स्मरेत्॥ इति॥

किञ्च दुःखनिवृत्तिस्तु दूरापास्ता। यावदधिकारमवस्थितिराधिकारिकाणाम् [३।३।३२।] इति ब्रह्मसूत्रात् ज्ञाने सति प्रयाणानन्तरमेव कैवल्यमित्यपि न नियतम्। किञ्च विद्यासाधनानुष्ठाने सतीहैव जन्मनि प्रसिद्ध्यनीत्यपि नियमो नास्ति। ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् [३।४।५१।] इति सूत्रेण यदा प्रक्रान्तस्य विद्या साधनस्य कश्चित् प्रतिबन्धो न क्रियते उपस्थितविपाकेन कर्मान्तरेण तदेहैव विद्योत्पद्यते। यदा तु खलु प्रतिबन्धः क्रियते तदामुत्र इत्यर्थकेन तथाभिधानात्। तदित्थं सर्वसम्पत्तिविपत्तिभाजनं प्रारब्धं कर्म यावन्न निवर्त्तिष्यते तावन्न कैवल्यं प्रत्याशा। तन्निवृत्तिरपि योगाभ्याससाध्यैव। तथा चाम्नायते क्षुरिकोपनिषदि—

यथा निर्वा[णकाले] तु दीपो दग्ध्वालयं व्रजेत्।
तथा सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत्॥ इति॥

विनिष्पन्न [समाधेस्तु] मुक्तिस्तत्रैव जन्मनीत्यादि स्मरणाच्च।
प्रयाण[काले मन]सा चलेन भक्त्या युक्तो योगबलेन चैव। [८।१०]
भ्रुवोर्म [ध्ये ···· 'प्राणमावेश्य] सम्यक् स तं परमपुरुषमुपैति दिव्यमिति [भगव]दुक्तेश्च। तथा च विष्णुधर्मोत्तरे——

स्वदेहारम्भकस्यापि कर्मणः संक्षयावहः।
यो योगः पृथिवीपाल शृणु तस्यापि लक्षणम्॥ इति।

मोक्षपर्वणि भारतेऽपि युधिष्ठिरं प्रति भीष्मः —

यथा चानिमिषाः[1] स्थूला जालं भित्वा पुनर्जलम् ।
प्रविशन्ति तथा योगात् तत्पदं वीतकल्मपाः ॥
यथैव वागुराश्छित्वा बलवन्तो महामृगाः ।
प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबन्धनैः ॥
अबलाश्च मृगा राजन् वागुरासु तथा परे ।
विनश्यन्ति न सन्देहस्तद्वद् योगबलादृते ॥

अपि च योगबलेन नानाशरीराण्युद्भाव्य संहरन्तीत्यपि तत्रैव ।

आत्मानं च सहस्राणि बहूनि भरतर्षभ ।
योगः कुर्याद् बलं प्राप्य तैश्च सर्वैर्महीञ्चरेत् ।
प्राप्नुयाद् विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत् ।
संहरेच्च तपस्तात सूर्यस्तेजो गुणानिव ॥ इति

किं बहुना श[ब्द श्रवण]मात्रेण न मोक्षसम्भावना । तदाहुर्योगतारावल्याम् ....[श]ङ्कराचार्याः —

समाहिता ये [ह्यभिला]प्य बाह्यं श्रोत्रादि चेतस्त्वमहं चिदात्मनि ।
त एव मुक्त[ा भव]पाशबन्धनैर्नान्ये तु पारोक्ष्यकथाभिधायिनः ॥

योगबीजेऽपि—

ज्ञानादेव हि मोक्षश्च वदन्ति ज्ञानिनः सदा ।
न कथं सिद्धयोगेन योगः किं मोक्षदो भवेत् ॥ इति

गौरीप्रश्ने —— ज्ञानेनैव हि मोक्षश्च तेषां वाक्यं तु नान्यथा ।
सर्वे वदन्ति खड्गेन जयो भवति तर्हि किम् ।
विना वीर्येण युद्धेन कथञ्जयमवाप्नुयात् ।
तथा योगेन रहितं ज्ञानं मोक्षाय नो भवेत् ॥
ज्ञाननिष्ठो विरक्तो वा धर्मज्ञोऽपि जितेन्द्रियः ।
विना योगेन देवोऽपि न मोक्षं लभते प्रिये ॥ इति

महेश्वरस्य वाक्यात् ज्ञानिनामपि मुमुक्षूणां योगोऽभ्यसनीय एव । नान्यथा स्वश्रेयसं पश्याम इत्यलम् ।

ननु—'एतेन योगः प्रत्युक्तः' [२।१।३।] इति [वेदान्त] सूत्रेण महर्षि-वेदव्यासेन योगस्य प्रत्याख्यानात् कथं प्रामाण्यमिति चेत् अज्ञानविजृम्भितं चैतत्

१—मकराः ।

सांख्यशास्त्रप्रतिपादितप्रधानकारणवादो योगानुशासनाभिमत इति मतस्य निराकरणे तात्पर्यात्। तथा चाहुर्भामतीकाराः —नानेन योगशास्त्रस्य हैरण्यगर्भपातञ्जलादेः प्रामाण्यं निराक्रियते इत्यादि तत्रैव कणेहत्य निरीक्ष्यताम् ? नारायणतीर्थैरप्येतदभिहितम्—

स्वातन्त्र्यसत्यत्व[शम]प्रधाने सत्यं च चिद्भेदगतं च वाक्यैः ।
व्यासो निराच[ष्ट च भा]वनाख्यं योगं स्वयं निर्मितयोगसूत्रैः ॥ इति ।

किं बहुना [योगा]न्मोक्षाधिगमे अध्यात्मयोगाधिबलेनेति ।

तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैः ।
त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा सन्निरुध्य ।
ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि ॥

इत्यादि श्रुतयः ।

तत्र योगी निरालम्बे निरातङ्के निरामये ।
षडङ्गं योगविधिना परे ब्रह्मणि लीयते ॥

इत्यादि स्मृतयश्च प्रमाणानि सन्तीत्यनुबन्धनिरूपणम् ।२।

ननु कोऽयं योगो विमुक्तये प्रभवतीत्याह—

योगः समाधिरुदितो वृत्तिनिरोधः सचित्ततत्त्वस्य ।
मन्त्रादिभिर्विभेदे निरुच्यते राजयोगोऽसौ ॥३॥

योगः समाधिरिति । प्रमाणविपर्ययादिपञ्चवृत्तिनिरोधलक्षणलक्षितस्य चित्तस्य वक्ष्यमाणोऽवस्थाविशेषः समाधिर्योग उदितः महर्षिभिः कथितः । तथा च योगियाज्ञवल्क्यः—

समाधिः समतावस्था जीवात्मपरमात्मनोः । [१०।१]
संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः ॥ इति । [१।४३।]

यश्च —

जलसैन्धवयोरैक्यं यथा भवति योगतः ।
तथात्ममनसोरैक्यं समाधिरिह भण्यते ॥

इत्यादौ विभिन्नार्थः समाधिशब्दो दृश्यते । स च प्रकृतसाध्यसमाधिसाधनतया आयुर्वै घृतमितिवद् औपचारिको योगाष्टमाङ्गवाचकः । यद्वा तत्र समाधीयन्ते निरुध्यन्ते चित्तवृत्तयो यस्मिन्नित्यधिकरणसाधनः । प्रकृते साध्यः करणसाधनस्तु योगाङ्गवाचक इति न लक्षणाप्रसरः । एवं योगशब्देऽपि । तथा च चित्तवृत्तिनिरोधः समाधिर्योगलक्षणम् । तत्र सर्वपदानुपादानात् सात्त्विकमधुमत्यादिवृत्तीनामनिवृत्तावपि सम्प्रज्ञातोऽपि समाधिः । न चैवं क्षिप्तादिभूमित्रयेऽतिव्याप्तिस्तत्रापि सात्त्विकवृत्तेरसद्भावादिति वाच्यम् । तत्र निरोधस्य क्लेशकर्माशयप्रतिपक्षिणो ग्रहणात् । तथा च

क्लेशकर्माशयप्रतिपक्षित्वे सति चित्तवृत्तिनिरोधः समाधिरिति निष्कर्षः। क्षिप्तादिभूमित्रयेषु च क्लेशाद्यनुकूलानां राजसतामसप्रमाणादिवृत्तीनां सद्भावान्न दोषः। मन्त्रादिभिर्विभेदे इति सत्यपीत्यर्थः। असौ राजयोगो निरुच्यते सप्रपञ्चं निरूप्यते। वृक्षप्रचलनन्यायेन तन्निरूपणेनैव मन्त्रहठादियोगानां निरूपणादिति भावः। अमनस्कखण्डे राजयोगलक्षणमाह वामदेवं प्रति महेश्वरः—

राजत्वात् सर्वयोगानां राजयोग इति स्मृतः॥ इति।
राजन्तं दीप्यमानं तं परमात्मानमव्ययम्।
प्रापयेद् देहिनां यस्तु राजयोगः स कीर्तितः॥ इति च।

योगशिखाब्राह्मणे तु—

योनिमध्ये महाक्षेत्रे जपाबन्धूकसन्निभः।
रजो वसति जन्तूनां देवीतत्त्वसमावृतम्॥
रजसो रेतसो योगात् राजयोग इति स्मृतः।

इति राजयोगलक्षणमुक्तम्। तत्र गुदामेढ्रयोर्मध्ये त्रिकोणं योनिस्थानं महाक्षेत्रमिति बोध्यम्। योगभेदो यथा योगबीजे—

मन्त्रो हठो लयो राजा योगोऽयं भूमिकाक्रमात्।
एक एव महादेवि चतुर्धा सम्प्रकीर्त्यते॥ इति।

तत्र भूमिका नाम चित्तभूमयः। यथोक्तं योगभाष्ये—'क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः'। तत्र क्षिप्तं नाम तेषु तेषु विषयेषु रजसा क्षिप्यमाणमत्यन्तचञ्चलम्। यथा दैत्यदानवादीनां द्रविणमदमत्तानां पुरुषाणां वा चित्तम्। मूढं नाम सदैव तमसाभिभूतम् निद्रावृत्तिमत्। यथा रक्षःपिशाचादीनां मादकद्रव्योन्मत्तानां पामराणां नराणां वा चित्तम्। विक्षिप्तं नाम क्षिप्ताद् विशिष्टं सांसिद्धिकचाञ्चल्यबहुलस्यापि कादाचित्कस्थेमा। यथा देवानां प्रथमभूमिकारूढानां साधकानां च चित्तम्। एकाग्रं नामैकतानम् सम्प्रज्ञातसमाधिरूपम्। निरुद्धं नाम निरुद्धसकलवृत्तिकं संस्कारमात्रशेषमसम्प्रज्ञातसमाधिरूपमिति। तत्र मूढचित्तानां निःश्रेयसोपघातकानां कथञ्चित् संभावनैव नास्ति। क्षिप्तचित्तानां कादाचित्कस्थेमलाभाय मन्त्रयोगस्योपदेशः। स एवं खलु मन्दाधिकारिण इत्युच्यन्ते। तथा च योगतत्त्वोपनिषदि—

मातृकादियुतं मन्त्रं द्वादशाब्दं तु यो जपेत्।
क्रमेण लभते ज्ञानमणिमादिगुणान्वितम्॥
अल्पबुद्धिरिमं योगं सेवते साधकाधमः। इति।

विक्षिप्तचित्ताश्च क्रियायोगे तदनु लयहठराजयोगेषु च मुख्याधिकारिण:। एकाग्रचित्ता: निरुद्धचित्ताश्च जीवन्मुक्ता ब्रह्मविद्वरिष्ठा योगिनश्चोच्यन्ते। प्रसङ्गात् संक्षेपेण मन्त्रादि योगो निरूप्यते। तत्र मन्त्रयोगो यथा योगबीजे—

हुंकारेण बहिर्याति सकारेण पुनर्विशेत्।
हंस हंसेति मन्त्रोऽयं जीवो जपति सर्वदा॥
गुरुवाक्यात् सुषुम्णायां विपरीतो भवेज्जप:।
सोऽहं सोऽहमिति प्राप्तो मन्त्रयोग: स उच्यते॥ इति।

एतन्मन्त्रस्य प्राशस्त्यमुक्तं यथा ध्यानबिन्दूपनिषदि—

अजपा नाम गायत्री ज्ञानिनां मोक्षदा सदा।
अस्या: सङ्कल्पमात्रेण नर: पापै: प्रमुच्यते॥
अनया सदृशी विद्या अनया सदृशो जप:।
अनया सदृशं पुण्यं न भूतो न भविष्यति॥ इति।

जपसंख्याप्युक्ता योगबीजे—

एकविंशति साहस्रं षट्शताधिकमीश्वरि।
प्रत्यहं जपति प्राणी हंसमित्यक्षरद्वयम्॥ इति।

कस्मिन्नधिष्ठाने कस्मिन् देवे कियत्संख्याकोऽर्पणीयो जपस्तमाह गरुडपुराणे गरुडम्प्रति भगवान्नारायण:—

आधारस्तु चतुर्दलानलसमं वासन्तवर्णाश्रयम्।
स्वाधिष्ठानमपि प्रभाकरसमं बालान्तषट्पत्रकम्॥
रक्ताभं मणिपूरकं दशदलं डाद्यं फकारान्तकम्।
पत्रैर्द्वादशभिस्त्वनाहतपुरं हैमं कठान्तावृतम्॥
पत्रैस्सस्वरषोडशैश्शशधरज्योतिर्विशुद्धाम्बुजम्।
हंसेत्यक्षरयुग्मकद्वयदलं रक्ताभमाज्ञाम्बुजम्॥
तस्मादूर्ध्वगतं प्रभासितमिदं पद्मं सहस्रच्छदम्।
सत्यानन्दमयं सदा चितिमयं ज्योतिर्मयं शाश्वतम्॥
गणेशं च विधिं विष्णुं शिवं जीवं गुरुं तत:।
व्यापकं परमं ब्रह्म क्रमाच्चक्रेषु चिन्तयेत्॥
षट्शतं गणनाथाय षट्सहस्रं तु वेधसे।
षट्सहस्रं च हरये षट्सहस्रं हराय च॥
जीवात्मने सहस्रं च सहस्रं गुरवे तथा।
चिदात्मने सहस्रं च जपसंख्यां निवेदयेत्॥ इति।

इत्येवं ब्रह्मचर्यादिपुरस्सरं प्रत्यहं षट्शताधिकैकविंशतिसहस्रं गुरूपदिष्टं हंसेति मन्त्रं सुषुम्णायां प्रजपन् जपकोट्या दशविधान् नादाननुभवति। तत्र प्रथमश्चिणीनादः चिणचिणीनादो द्वितीयः तृतीयो घण्टानादः चतुर्थः शङ्खनादः पञ्चमस्तन्त्रीनादः षष्ठस्तालनादः सप्तमो वेणुनादः अष्टमो मृदङ्गनादः नवमो भेरीनादः मेघनादो दशमः। नवमं परित्यज्य दशममेव सदाभ्यसेत्। नादश्रवणफलान्यप्युक्तानि हंसोपनिषदि—

प्रथमे चिञ्चिणी गात्रं द्वितीये गात्रभञ्जनम्।
तृतीये खेदनं याति चतुर्थे कम्पते शिरः॥
पञ्चमे स्रवते तालु षष्ठेऽमृतनिवेषणम्।
सप्तमे गूढविज्ञानं परा वाचा तथाष्टमे॥
अदृश्यं नवमे देहं दिव्यं चक्षुस्तथामलम्।
दशमे परमं ब्रह्म भवेत् ब्रह्मात्मसन्निधौ॥ इति।

तत्र परा वाङ् निरूप्यते। परा पश्यन्ती मध्यमा वैखरीति चतुर्धा वाग् भवति। तत्र मूलाधारस्य पवनसंस्कृता मूलाधारस्था स्पन्दशून्या बिन्दुरूपिणी शब्दब्रह्मरूपिणी परा वागुच्यते। एतां खलु निर्विकल्पकसमाधौ योगिजनः साक्षात्कुरुते। यामधिकृत्यागमान्तरे—

स्वरूपज्योतिरेवान्तः परा वागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते॥ इति।

नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्तीभूता मनोगोचरीभूता पश्यन्ती वागुच्यते। आसामपि सविकल्पसमाधौ योगिजनाधिगम्यतैव। ततो हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मजपादौ बुद्धिनिर्ग्राह्या मध्यमा वागुच्यते। तत आस्यपर्यन्तमागच्छता तेन वायुना ऊर्ध्वमाक्रमता मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणाभिग्राह्या वैखरी वागुच्यते। तथा चोक्तं योगशिखाब्राह्मणे—

अक्षरं परमो नादः शब्दब्रह्मेति कथ्यते।
मूलाधारगता शक्तिः स्वाधारा बिन्दुरूपिणी॥
तस्यामुत्पद्यते नादः सूक्ष्मबीजादिवाङ्कुरः।
तां पश्यन्तीं विदुर्विश्वं यया पश्यन्ति योगिनः॥
हृदये व्यज्यते घोषो गर्जत्पर्जन्यसन्निभः।
तत्र स्थिता सुरेशान मध्यमेत्यभिधीयते॥
प्राणेन च स्वराख्येन प्रथिता वैखरी पुनः।
शाखापल्लवरूपेण ताल्वादिस्थानघट्टनात्॥ इति।

एतदेवादाय वाक्यपदीये—

परावाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।। इति ।

अथागमोक्तषडङ्गन्यासादि प्राणायामध्यानपुरस्सरं यथाविधि सिद्धमूलमन्त्र-जपोऽपि मन्त्रयोग एवेति बोध्यम् । मन्त्रमूलमन्त्रलक्षणे योगशिखायाम्—

मननात्प्राणनाच्चैव मद्रूपस्यावबोधनात् ।
मन्त्रमित्युच्यते ब्रह्मन् मदधिष्ठानतोऽपि वा ।। इति ।।
मूलत्वात् सर्वमन्त्राणां मूलाधारसमुद्भवात् ।
मूलस्वरूपलिङ्गत्वान् मूलमन्त्र इति स्मृतः ।। इति च ।

तत्र लिङ्गं किमिति तदपि तत्रैवोक्तम्—

सूक्ष्मत्वात् कारणत्वाच्च लयनाद् गमनादपि ।
लक्षणात्परमेशस्य लिङ्गमित्यभिधीयते ।। इति ।

संक्षेपेण मन्त्रयोगनिरूपणम् ।

अथ क्रियायोगो निरूप्यते । तल्लक्षणमाह भगवान् पतञ्जलिः—

'तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः' इति । तत्र तपो नाम—

उपवासतपः कादिकृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं प्राहुः तपसान्तप उत्तमम् ।। इति ।

स्वाध्यायो नाम प्रणवादिपवित्रमन्त्राणां जप उपनिषदादिमोक्षशास्त्राणा-मध्ययनं च । ईश्वरप्रणिधानं च सर्वक्रियाणां परमगुरावीश्वरे समर्पणं तत्फल-सन्यासो वा । क्रियासमर्पणं यथा—

कामतोऽकामतो वापि यत्करोमि शुभाशुभम् ।
तत्सर्वं त्वयि सन्न्यस्तं त्वत्प्रयुक्तः करोम्यहम् ।। इति ।

फलसन्यासो नाम फलानभिसन्धानेन कर्मकरणम् । यथोक्तं भगवता—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।। इति ।

[गीता २।४७]

तथा च श्रूयते—

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।। इति ।

अत्र यद्यप्यनादिकर्मक्लेशवासनाजनितविविधविषयाशुचिर्नान्तरेण तपसा सम्भिद्यते । अत एव नातपस्विनो योगः सिद्ध्यतीति योगभाष्ये उक्तम् । तथापि द्वितीयभूमिकामापन्नानां योगिनां चित्तप्रसादाविरोध्येव तपोऽनुष्ठेयम् । चान्द्रायणाद्यभ्यासे धातुवैषम्यापत्तेः । उपवासाभ्यासे शरीरपातसंभवाच्च । तथा च कामानशनत्वं हितमितमेध्याशित्वं च योगिनां तप उच्यते । अत एव श्रुतौ—'तपसाऽनाशनकेनेत्याम्नातम्' । अयं च क्रियायोगः प्रथमभूमिकामारुरुक्षूणामुपदिष्टः । अत एव लययोगात् प्रागेव व्याख्यातोऽपीत्यवधेयमिति संक्षेपेण क्रियायोगनिरूपणम् । अथ लययोगो निरूप्यते, तल्लक्षणमाह योगतत्त्वे—

लययोगश्चित्तलयः कोटिशः परिकीर्तितः ।
गच्छन् तिष्ठन् स्वपन् भुञ्जन् ध्यायेन्निष्कलमीश्वरम् ॥
स एव लययोगः स्यात् हठयोगमतः शृणु ।। इति ।

प्राणायामादि विनैव निष्कलं ब्रह्म ध्यायन् शाम्भवीमुद्रादिभिः प्राणेन सहैव चित्तस्य लयो लययोग इत्यर्थः ।
अमनस्कखण्डे शाम्भवीमुद्रालक्षणमाह—

अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता ।
सा भवेच्छाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता ।। इति ।

तत्रान्तर्लक्ष्यदर्शने तिस्रो दृष्टयो भवन्ति । निमीलितदर्शनाऽमादृष्टिः । अर्धोन्मीलितदर्शना प्रतिपद्दृष्टिः । सर्वोन्मीलितदर्शना पूर्णिमादृष्टिरिति । अन्तर्लक्ष्यं च ब्रह्मरन्ध्रे भ्रूमध्ये हृदयदेशे च सच्चिदानन्दमयं तेजःकूटरूपं तारकं ब्रह्मेति । तद्दर्शनाभ्युपायस्तु सूक्ष्ममार्गावलम्बनम् । ब्रह्मरन्ध्रादित्रितयस्थानेषु तद्दर्शने सुषुम्णाया अवलम्बनम् । सा च मूलाधारादारभ्य मेरुसमालम्बिता ब्रह्मरन्ध्रपर्यन्तगामिनी सूर्याभा तां ध्यानेनावलम्बयेत् । तन्मध्ये तड़ित्कोटिसमा मृणालतन्तुसूक्ष्मा कुण्डलिनी महाशक्तिस्तत्र तमोनिवृत्तिः । तस्यादर्शनात् सर्वपापात् प्रमुच्यते । हृदयदेशे दहरपुण्डरीके तदवलोकने तु ब्रह्मनाडीसमालम्बनमपि द्वितीयसूक्ष्ममार्गावलम्बनम् । सा च नाभिकन्दादुत्थिता द्वादशाङ्गुलमूर्ध्वमागता छिन्नवंशाभा हृदयदेशस्थाऽधोमुखद्वादशच्छदसंकुचितदहरपुण्डरीकमुखेन सङ्गता । सुषुम्णा शाखाभूतामेतां सुषुम्णामपि केचिद् वदन्ति ।

अथ तर्जन्यग्रोन्मीलितकर्णरन्ध्रद्वये फूत्कारशब्दो जायते । तत्र स्थिते मनसि चक्षुर्मध्यनीलं ज्योतिः पश्यति । तद्दर्शनात् सर्वपापाद् विनिवृत्तो भवति निरतिशयं सुखं चाप्नोतीति ।

अयं च लययोगस्तारकममनस्कं चेति पूर्वोत्तरविभागाद् द्विविधः। तदुक्तं मण्डलब्राह्मणे—

तद् योगं च द्विधा विद्धि पूर्वोत्तरविभागतः।
पूर्वन्तु तारकं विद्यादमनस्कं तथोत्तरम्॥ इति।

तारकमपि द्विविधम् मूर्तितारकममूर्तितारकं चेति। तत्र यदिन्द्रियान्तं तन्मूर्तितारकम्। यद् भ्रूयुगातीतं तदमूर्तितारकमिति। मनोयुक्तान्तर्दृष्टिस्तारकप्रकाशाय भवति। उभयमपि मनोयुक्तमेवाभ्यसेदिति पूर्वंतारकम्।

उत्तरं त्वमनस्कम्। तच्च पयःस्रवानन्तरं धेनुस्तनक्षीरमिव सर्वेन्द्रियवर्गे परिनष्टे मनो नाशमिति।

तालुमूलोर्ध्वभागे महाज्योतिर्विद्यते। तद्दर्शनादणिमादिसिद्धिः। अन्तर्लक्ष्यं जलज्योतिः स्वरूपं महर्षिवेद्यमन्तर्बाह्येन्द्रियैरदृश्यं भवति। तत्रामनस्के किमन्तर्लक्ष्यमित्यत्र बहु मतान्तराणि सन्ति। सहस्रारे जलज्योतिरन्तर्लक्ष्यमिति केचित्। बुद्धिगुहायां सर्वाङ्गसुन्दरं पुरुषरूपमित्यन्ये। शीर्षान्तर्गतमण्डलमध्यगं पञ्चवक्त्रमुमासहायं नीलकण्ठं प्रशान्तमित्येके। अङ्गुष्ठमात्रः पुरुषोऽन्तर्लक्ष्यमित्यपरे। उक्तविकल्पं सर्वमात्मैवेत्येवं शाम्भवीमुद्रयान्तर्लक्ष्य दर्शनाभ्यासाद् कृतचित्तलयोऽणिमादि सकलैश्वर्यसम्पन्नो ब्रह्मनिष्ठो जीवन्मुक्तो भवतीति।

लक्ष्यस्य त्रैविध्यमप्युक्तं तत्रैव। अन्तर्लक्ष्यं बहिर्लक्ष्यं मध्यलक्ष्यं चेति। तत्रान्तर्लक्ष्यमुक्तम्। बहिर्लक्ष्यमिदानीमुच्यते। नासिकाग्रे चतुर्भिः षड्भिरष्टभिर्दशभिर्द्वादशभिः क्रमादङ्गुल्यन्ते नीलद्युतिश्यामलसदृक् रक्तभङ्गीस्फुरत् पीतशुक्लद्वयोपेतं व्योमावलोकनम्। तदेव खलु प्रणवस्वरूपम्। यदा तथा पश्यति तदा योगी भवति। चलनदृष्ट्या व्योमभागवीक्षितुः पुरुषस्य दृश्यग्रे ज्योतिर्मयूखा वर्तन्ते। तद्दर्शनेन योगी भवति। अपाङ्गान्ते भूमौ वा तप्तकाञ्चनसंकाशज्योतिर्मयूखाः दृश्यन्ते। तदा दृष्टिः स्थिरा भवति। यत्र कुत्र स्थितस्यापि शिरसि व्योमज्योतिर्दृष्टं चेत् स तु योगी भवति। यदा शीर्षोपरि द्वादशाङ्गुलमानज्योतिः पश्यति तदामृतत्वमेति

अथ मध्यलक्ष्यलक्षणम्। प्रातश्चित्रवर्णखण्डसूर्यचक्रवद् वह्निज्वालावलीव तद्विहीनान्तरिक्षवच्छून्यावलोकनमेव मध्यलक्ष्यमिति। तद्दर्शनाभ्यासात् पञ्चविधमाकाशं पश्यति। स बाह्याभ्यन्तरेऽन्धकारमयमाकाशम्। कालानलसदृशं पराकाशम् स बाह्याभ्यन्तरेऽमितद्युतिनिभं महाकाशम्। सूर्यकोटिसन्निभं सूर्याकाशम्। अनिर्वचनीयज्योतिः सर्वव्यापकं निरतिशयानन्दलक्षणं परमाकाशमिति। एवं तत्तल्लक्ष्यदर्शनात्तद्रूपो भवति। परमाकाशमेव परं ब्रह्म। खं ब्रह्मेति श्रुतेः। तदेव खलु ब्रह्मविष्ण्वादीनां ध्येयम्। तद्दर्शनात् सर्वबन्धविनिर्मुक्तः कैवल्यं प्राप्नोति।

एतल्लक्ष्यत्रयं व्योमपञ्चकं च योगिभिरवश्यमेव वेदितव्यम् । तदुक्तं मण्डलब्राह्मणे—

नवचक्रं षडाधारं त्रिलक्ष्यं व्योमपञ्चकम् ।
सम्यगेतन्न जानाति स योगी नामतो भवेत् ।। इति ।

तत्र स्वाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञेति षडाधारं विज्ञेयम् । नवचक्राण्युक्तानि । यथा सौभाग्यलक्ष्मीब्राह्मणे—आधारे ब्रह्मचक्रं त्रिरावृत्तं भगमण्डलाकारं तत्र कन्दे पवनाकारां शक्तिं ध्यायेत् । तत्रैव कामरूपपीठं सर्वकामप्रदं भवतीत्याधारचक्रं प्रथमम् ।

द्वितीयं स्वाधिष्ठानचक्रम् । तन्मध्ये पश्चिमाभिमुखं प्रवालाङ्कुरसदृशं लिङ्गं ध्यायेत् । तत्रैवोड्यानपीठं जगदाकर्षणसिद्धिदं भवति । तृतीयं नाभिपञ्चावर्तं सर्पकुटिलाकारम् । तन्मध्ये कुण्डलिनीं कालार्ककोटिप्रभां तड़ित्प्रभां तनुमध्यां ध्यायेत् सामर्थ्यंशक्तिः सर्वसिद्धिप्रदा भवति । चतुर्थं मणिपूरकचक्रम् । हृदयचक्रमष्टदलमधोमुखम् । तन्मध्ये ज्योतिर्मयलिङ्गाकारं ध्यायेत् । सैव हंसकला सर्वप्रिया सर्वलोकवश्यकरी भवति । पञ्चमं कण्ठचक्रम् षडङ्गुलम् । तत्र वामे इडा चन्द्रनाडी दक्षिणे पिङ्गला सूर्यनाडी, तन्मध्ये सुषुम्णां श्वेतवर्णां ध्यायेत् । य एवं वेद अनाहतं च सिद्धिदं भवति षष्ठं तालुचक्रम् । तत्रामृतधाराप्रवाहः । घण्टिका लिङ्गमूले चक्ररन्ध्रे राजदन्तावलम्बिनी विवरं दशद्वादशारं तत्र शून्यं ध्यायेत् । चित्तलयो भवति सप्तमं भ्रूचक्रमङ्गुष्ठमात्रम् । तत्र ज्ञाननेत्रं दीपशिखाकारं ध्यायेत् तदेव कपालकन्दं वाक्सिद्धिदं भवति । आज्ञाचक्रमष्टमम् । ब्रह्मरन्ध्रं निर्वाणचक्रम् । तत्र सूचिकागृहेतरं धूम्रशिखाकारं ध्यायेत् । तत्र जालन्धरपीठं मोक्षप्रदं भवति । परब्रह्मचक्रं नवममाकाशचक्रम् । तत्र षोडशदलपद्ममूर्ध्वमुखम् तन्मध्यकर्णिका त्रिकूटाकारं तन्मध्ये ऊर्ध्वशक्तिस्तां पश्यन् ध्यायेत् । तत्रैव पूर्णगिरिपीठं सर्वेच्छासिद्धिसाधनं भवतीति ।

अथ षण्मुखीकरणं तद्यथा योगचूडामणौ—

संबद्धासनमेढ्रमङ्घ्रियुगलं कर्णाक्षिनासापुट—
द्वारानङ्गुलिभिर्नियम्य पवने वक्त्रेण वा पूरितम् ।
वद्ध्वा वक्षसि वह्न्यपानसहितं मूर्ध्नि स्थितं धारये-
देवं यान्ति विशेषतत्त्वसमतां योगीश्वरास्तन्मनः [ताः] ।।

प्राणापानयोरैक्यं कृत्वा धृतकुम्भको नासाग्रदर्शनदृढभावनया द्विकराङ्गुलिभिः षण्मुखीकरणेन प्रणवध्वनिं निशम्य मनस्तत्र लीनं भवति । रवेरुदयास्तसमययोः किलैतत् कर्तव्यम् । उन्मन्या अमनस्कं भवति तदा ज्ञातृज्ञेयज्ञानरूपा त्रिपुटी निरस्यति

एवं त्रिपुट्यां निरस्तायां निस्तरङ्गसमुद्रवन्निवातस्थितदीपवदचलं सम्पूर्णभावाभाव-विहीनं कैवल्यज्योतिर्भवति । जाग्रच्चिदन्त:परिज्ञाने ब्रह्मविद् भवति । तस्य न कर्मलेप: । तस्य निश्चन्तता ध्यानम् । सर्वकर्मनिराकरणमावाहनम् । निश्चयज्ञान-मासनम् उन्मनीभाव: पाद्यम् । सदाऽमनस्कमर्घ्यम् । सदादीप्तिरपरामृतवृत्ति: स्नानम् । सर्वभावना गन्ध: दृढस्वरूपावस्थानमक्षता: चिदावृत्ति: पुष्पम् । चिदग्नि-स्वरूपं दीप: । परिपूर्णचन्द्रामृतरसस्यैकीकरणं नैवेद्यम् । निश्चलत्वं प्रदक्षिणम् । सोऽहंभावो नमस्कार: । मौनं स्तुति: । सर्वसन्तोषो विसर्जनमिति ।

तदुक्तं मण्डलब्राह्मणे —

अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनि: ।
ध्वनेरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मन: ॥
यन्मनस्त्रिजगत्सृष्टिस्थितिव्यसनकर्मकृत् ।
तन्मनो विलयं याति तद्विष्णो: परमं पदम् ॥ इति ।

तथा च वाराहोपनिषदि —

इन्द्रियाणां मनो नाथो मनोनाथस्तु मारुत: ।
मारुतस्य लयो नाथस्तं नाथं लयमाश्रये ॥
नि:श्रेष्ठो निर्विकारश्च लयो जीवति योगिनाम् ।
उच्छिन्नसर्वसंकल्पो नि:शेषाशेषचेष्टित: ॥
स्वावगम्यो लय: कोऽपि मनसा वागगोचर: ।
पुङ्खानुपुङ्खविषयलक्षणतत्परोऽपि ।
मौलिस्थकुम्भपरिरक्षणधीर्नटीव ।
सङ्गीततालयवाद्यवशंगतापि ।
मौलिस्थकुम्भपरिरक्षणधीर्नटीव ॥
सर्वचिन्तां परित्यज्य सावधानेन चेतसा ।
नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता ॥ इति ।

एवममनस्कमभ्यासेनैव नित्यतृप्तिरल्पमूत्रपुरीषो मितभोजनं दृढाङ्गानि अजाड्यम् अदृष्टवायुचलनम् ततो ब्रह्मसाक्षात्कार: प्रसिद्ध्यति । तस्य दर्शनेन सकलं जगत् पवित्रं भवति । तत्सेवापरोऽज्ञोऽपि विमुक्तो भवति । तत्कुलमेकोत्तरशतं तारयति तन्मातृपितृजायापत्यवर्गश्च विमुक्तं भवति । एवं मुद्रान्तरेणापि चित्तलयो लययोग एवेति संक्षेपेण लययोगनिरूपणम् ।

अथ हठयोगनिरूपणं तल्लक्षणमाह योगशिखायाम्—

हकारेण तु सूर्यः स्यात् ठकारेणेन्दुरुच्यते ।
सूर्याचन्द्रमसोरैक्यं हठ इत्यभिधीयते ।। इति

प्राणवायोर्बहिर्गमने उष्णस्पर्शाद् हृदयदेशे भास्करस्थानम् । आभ्यन्तरप्रवेशे च शीतलस्पर्शान्नासिकाग्रे द्वादशाङ्गुलान्ते चन्द्रस्थानमिति निश्चीयते । तदुक्तं काकभुसुण्डेन निर्वाणप्रकरणे वासिष्ठे —

द्वादशाङ्गुलपर्यन्ते नासाग्रे संस्थितं विधुम् ।
हृदये भास्करं देवं यः पश्यति स पश्यति ।। इति ।

तथा च तादृशसूर्यचन्द्रमसोरैक्यकरणमेव हठयोगः । स च प्राणायामादिना यदा प्राणापानयोरैक्यं भवति तदा प्रसिद्ध्यति । ततश्च जीवात्मपरमात्मनोरैक्यं भवति । जाड्यं च विनश्यति । तदुक्तं योगशिखायाम्—

हठेन ग्रस्यते जाड्यं सर्वदोषसमुद्भवम् ।
क्षेत्रज्ञः परमात्मा च तयोरैक्यं यदा भवेत् ।। इति ।

अन्येऽपि हठयोगस्य नाडीशुद्धिमुद्राभ्यासकुण्डलिनीबोधषट्चक्रभेदनादयोऽवान्तरभेदा उपयुक्तस्थले वक्ष्यन्ते इति संक्षेपेण हठयोगनिरूपणम् ।

अथ राजयोगे मन्त्रयोगादीनामन्तर्भावो निरुच्यते । मन्त्रयोगे चिरमन्त्रानुष्ठानेन सति नादश्रवणे मनोलयो जायते । स च राजयोगे सम्प्रज्ञातसमाधौ चिरं प्राणनिरोधेन सञ्जातनादश्रवणेन मनो लीयत एवेति तत्रैवास्यान्तर्भावः । तपःस्वाध्यायादीनां यमनियमयोर्वक्ष्यमाणत्वात् क्रियायोगस्य च राजयोगाङ्गयमनियमयोरेवान्तर्भावः । लययोगोऽपि राजयोगस्यासम्प्रज्ञातसमाधौ सर्वचित्तवृत्तीनां निरोधेन स्वतश्चित्तस्य विलयात्तत्रैवान्तर्भवतीति । हठयोगोऽपि प्राणायामादिना मनोनिरोधेन स्वतः प्राणापानयोरैक्यं जायते इति । येऽपि हठयोगस्यासनादिभेदास्तेऽपि राजयोगस्याङ्गभूता एवेति तत्रैवान्तर्भवन्ति । तदुक्तं हठयोगप्रदीपिकायाम्—

पीठानि कुम्भकाश्चित्रा दिव्यानि करणानि च ।
सर्वाण्यपि हठाभ्यासे राजयोगफलावधि ।। [१।६९] इति ।

यश्च जन्मसिद्धसमाधिलक्षणो वामदेवादीनामुत्पत्तियोगः सोऽपि पूर्वजन्माभ्यस्तराजयोगफलकत्वेन राजयोग एवान्तर्भवतीति ।

योऽपि पारदादिदिव्यौषधिलक्षणजनितान्तर्द्धादिजनकसमाधिलक्षणो दिव्यौषधियोगः सोऽपि वक्ष्यमाणसंयमफलकत्वेन राजयोग एवान्तर्भवतीति राजयोगे मन्त्रयोगादीनामन्तर्भावनिरूपणम् ।३।

तत्र कारणमाह—

सत्कारदीर्घकालाव्यवधानैर्विहितसाधनाभ्यासः ।
वैराग्यञ्चाख्यातं कारणमत्राथ साधनान्यष्टौ ॥४॥

सत्कारेत्यादि । अत्र राजयोगे सत्कारेण श्रद्धाविद्याब्रह्मचर्यात्मकेन दीर्घकालेन क्षणमुहूर्तार्धयामयामादिक्रमेण मासवर्षादिबहुकालेन । तथा चोपशमप्रकरणे वासिष्ठे—

जन्मान्तरचिराभ्यस्ता राम संसारसंस्थितिः ।
सा चिराभ्यासयोगेन विना न क्षीयते क्वचित् ॥

अव्यवधानेन नैरन्तर्येण च विहितः सम्पादितो यः साधनानां यमनियमाद्यङ्गानामभ्यासोऽनुष्ठानं नाम स्वाभाविकचाञ्चल्याद् बहिःप्रवाहशीलमपि चित्तं सर्वथा निरोत्स्यामीति एवंविधो मानसोत्साहात्मकप्रयत्नस्तेनावर्तनम्, वैराग्यञ्चेति द्वितयं कारणम् । चकारेण साधनाभ्यासवैराग्ययोः समुच्चये कारणतापर्याप्तिः प्रदर्शिता। अत एव भगवता [गीतायां]—

अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते । [६।३५।]

इति समुच्चयबोधकश्चकार उपात्तः ।

अयम्भावः । सर्वदा प्रवर्तमानवृत्तिप्रवाहेण प्रवहज्जलप्रख्येयं चित्तनदी जलप्रवहणायोग्योन्नतप्रदेशमिव कैवल्यं विहाय आत्मानात्मविवेकसुमार्गेण कल्याणवहा विषयभोगकुमार्गेण पापवहा च । तस्याः खलु सेतुबन्धेनेव तीव्रवेगनदीप्रवाहं वैराग्येण विषयप्रवाहं निवार्य कुल्याप्रणयणेनेव समाध्यभ्यासेन खिलीकरणतया प्रशान्तवाहित्वं सम्पाद्यत इति समुच्चय एव कारणता न तु विकल्प इति ।४॥

साधनान्याह—

यमनियमौ पीठानि प्राणायामश्च करणनिग्रहश्च ।
तदनु धारणा ध्यानं समाधिराहुः षडप्येके ॥५॥

यमनियमावति । पीठान्यासनानि । करणनिग्रहः प्रत्याहारः । तथा च यमादयोऽष्टावङ्गानि । तथा च योगियाज्ञवल्क्यः —

यमश्च नियमश्चैव आसनं च तथैव च ।
प्राणायामस्तथा गार्गि प्रत्याहारश्च धारणा ॥ [१।४५]
ध्यानं समाधिरेतानि योगाङ्गानि वरानने [१।४६] इति ।

एके पुनराचार्याः षडङ्गान्याहुः ।। तथा च ध्यानबिन्दौ—

आसनं प्राणसंरोधः प्राणायामश्च धारणा ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट् ॥ इति ।

अमृतनादब्राह्मणे तु

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥इति।
आगमस्याविरोधने ऊहनं तर्क उच्यते इति चोक्तम् ।

षडुक्तिरष्टानामुपलक्षणम् । यमनियमयोर्विशेषानुपयोगित्वं वा सूचयति ॥५॥

तत्र यमानाह—

तत्राहिंसनसत्येऽस्तेयदये धैर्यमार्जवं क्षान्तिः ।
शौचममैथुनमविद्रुमितभोजनमिति यमं दशकम् ॥६॥

तत्राहिंसनं नाम मनोवाक्कायकर्मभिः सर्वदा सर्वभूतेषु क्लेशाजननम् । तदुक्तं योगियाज्ञवल्क्येन—

कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा ।
अक्लेशजननं प्रोक्तमहिंसात्वेन योगिभिः ॥ [१।५०-५१] इति ।

यमेष्वस्यैव प्राधान्यमुक्तं मोक्षपर्वणि भारते—

यथा नागपदेऽन्यानि पदानि पदगामिनाम् ।
सर्वाण्येवापिधीयन्ते पदजातानि कौञ्जरे ॥
एवं सर्वमहिंसायां धर्मार्थमपि धीयते ॥इति।

मा हिंस्याः सर्वभूतानीति श्रुत्याप्याम्नातम् ।

अथ सत्यं नाम मनोवाक्कायकर्मभिः सर्वदा सर्वभूतहितयथार्थाभिभाषणम् । तथा च योगभाष्यम्—'यदि चैवमप्यधीयमानो भूतोपघातपरैव स्यात् न सत्यं भवेत् पापमेव भवेत् । तेन पुण्याभ्यासेन पुण्यप्रतिरूपकेण कष्टतमं प्राप्नुयात् । तस्मात् परीक्ष्य सर्वभूतहितं सत्यं ब्रूयादिति । तथा च मनुः—

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ।
प्रियञ्च नानृतं ब्रूयादिति धर्मः सनातनः ॥ इति ।

सत्यप्रशंसामाह मोक्षपर्वणि भारते—

सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ।
न पावनतमं किञ्चित् सत्यादधिगमं क्वचित् ॥
अश्वमेधसहस्राणि सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्रेभ्यः सत्यमेव विशिष्यते ॥ इति ।

अथास्तेयं नाम मनोवाक्कायकर्मभिः परद्रव्येषु निस्पृहा । यथोक्तं योगियाज्ञवल्क्येन—

कर्मणा मनसा वाचा परद्रव्येषु निस्पृहा ।
अस्तेयमिति संप्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥ इति ।

श्रीजाबालदर्शनब्राह्मणेऽपि—

अन्यदीये तृणे रत्ने काञ्चने मौक्तिकेऽपि वा ।
मनसा विनिवृत्तिर्या तदस्तेयं विदुर्बुधाः ॥ इति ।

अस्याः प्रशंसामाह वसिष्ठसंहितायाम्—

उपवासात् परं भैक्ष्यं दया दानात् विशिष्यते ॥ इति ।

सा च योगिभिः सामान्यरूपेण निषेवणीया । यथोक्तम्—

सर्वेऽत्र सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात् ॥ इति ।

यतः—यः प्रवृत्तः कुबुद्धीनां दयावान् दुःखमार्जने ।
स्वगतच्छन्ननिर्मृष्टसूर्यांशु स्विद्यते नभः ॥ इत्युपशमप्रकरणे वासिष्ठे प्रोक्तमिति ।

दयाफलमाह वसिष्ठसंहितायाम्—

अभयं सर्वभूतेभ्यो दत्वा चरति यो द्विजः ।
तस्यापि सर्वभूतेभ्यो न भयं जातु विद्यते ॥ इति ।

अथ धैर्यं नाम अर्थहानौ स्वेष्टबन्धुजनवियोगे तत्प्राप्तौ च सर्वत्र चेतः स्थापनम् । यथा—

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम् ।
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुदण्डम् ॥
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णम् ।
न प्राणान्ते प्रकृतिविकृतिर्जायते सज्जनानाम् ॥

किञ्च प्रत्यूहशाताातपेऽपि कार्यादनिवर्तनं धैर्यम् । यथोक्तं हरिणा—

आरभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानो
प्रारब्धमुत्तमजना न परित्यजन्ति ॥ इति ।

अथार्जवं नाम विहिताविहितकर्मसु मनोवाक्कायकर्मभिः प्रवृत्तौ निवृत्तौ वा एकरूपत्वम् । यदुक्तं योगियाज्ञवल्क्येन—

प्रियाप्रियेषु सर्वेषु समत्वं यच्छरीरिणाम् ।
क्षमा सैवेति विद्वद्भिर्गदिता वेदवादिभिः ।। [१।६३] इति ।।

क्षमाफलमाह मोक्षपर्वणि भारते —

परश्चेदेवमतिवादवाणैर्भृशं विध्येच्छम एवेह कार्यः ।
संरोष्यमाणः प्रतिहृष्यते यः स आदत्ते सुकृतं वै परस्य ।। इति ।

तत्र मनुः—

सुखं ह्यवमतः शेते सुखञ्च प्रतिबुध्यते ।
सुखञ्चरति लोकेऽस्मिन् नावमन्ता विनश्यति ।। इति ।
क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति । इत्यन्यत्राप्युक्तम् ।

किञ्च योगिनां जनावमानमेव हितम् । तथा च नारदपरिब्राजकब्राह्मणे—

सम्मानाद् ब्राह्मणो नित्यमुद्विजेत विषादिव ।
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा ।।
असंमानात् तपोवृद्धिः सम्मानाच्च तपः क्षयः ।
अर्चितः पूजितो विप्रो दुग्धा गौरिव सीदति ।।
तथाचरति वै योगी सतां धर्ममदूषयन् ।
जना यथावमन्येरन् गच्छेयुर्नैव सङ्गतिम् ।। इति ।

अवमतेनापि योगिना क्रोधो न कार्यस्तदुक्तं मोक्षपर्वणि महाभारते—

यत्क्रोधनो यजति यद्ददाति यद्वा तपस्तप्यति यज्जुहोति ।
वैवस्वतस्तद्धरतेऽस्य सर्वं मोघः श्रमो भवति हि क्रोधनस्य ।। इति ।

याज्ञवल्क्यब्राह्मणे तु—

अपकारिणि कोपश्चेत् कोपे कोपः कथं न ते ।
धर्मार्थकाममोक्षाणां प्रसह्य परिपन्थिनि ।। इति ।

क्षमाप्रशंसाफले वृद्धगौतमसंहितायामुक्तम—

क्षमाऽहिंसा क्षमा धर्म्मः क्षमा चेन्द्रियनिग्रहः ।
क्षमा दया क्षमा यज्ञः क्षमा धैर्यमुदाहृतम् ।।
क्षमावान् प्राप्यते स्वर्गं क्षमावान् प्राप्नुयाद् यशः ।
क्षमावान् प्राप्नुयान्मोक्षं क्षमावान् तीर्थमुच्यते ।। इति ।

अथ शौचम् । तद् द्विविधम्, वाह्यमाभ्यन्तरं चेति । यथोक्तं योगियाज्ञवल्क्येन—

शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ।
मृज्जलाभ्यां स्मृतं बाह्यं मनश्शुद्धिस्तथान्तरम् ।। इति ।

तत्र मनश्शुद्धिस्तु प्राणायामादिना वक्ष्यते । तयोरान्तरमेव श्रेयः । तदुक्तं वृद्धगौतमसंहितायाम्—

त्रिदण्डधारणं मौनं जटाधारणमुण्डनम् ।
वल्कलाजिनसर्वांशो व्रतचर्याभिषेचनम् ।।
अग्निहोत्रं वने वासः सत्कारो ध्यानसत्क्रिया ।
सर्वाण्येतानि वै मिथ्या यदि भावो न निर्मलः ।। इति ।

अत्र ब्रह्मचर्यं नाम सर्वावस्थासु मनोवाक्कायकर्मभिः सर्वत्र मैथुनत्यागः। तदुक्तं योगियाज्ञवल्क्येन—

कर्मणा मनसा वाचा सर्वावस्थासु सर्वथा ।
सर्वत्र मैथुनत्यागो ब्रह्मचर्यं प्रचक्षते ।। [१।५३-५४] इति ।।

तच्चाष्टविधम्—यथोक्तं दक्षसंहितायाम्—

ब्रह्मचर्यं यदा रक्षेदष्टधा लक्षणं पृथक् ।
स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।।
न ध्यातव्यं न वक्तव्यं न कर्तव्यं कदाचन ।
एतैस्सर्वैः विनिर्मुक्तो यतिर्भवति नेतरः ।।

तथा च स्मृत्यन्तरे—

न सम्भाषेत् स्त्रियं काञ्चित् पूर्वदृष्टां च न स्मरेत् ।
कथां च वर्जयेत्तासां न पश्येल्लिखितामपि ।।
असिद्धं तं विजानीयात् नरमब्रह्मचारिणम् ।
जरामरणसंकीर्णं सर्वक्लेशसमाश्रयम् । इति ।।

योगचूडामणौ तु—

यावद् बिन्दुः स्थितो देहे तावन्मृत्युभयं कुतः ।।इति ।
बिन्दुश्चलति यस्याङ्गे चित्तं तस्यैव चञ्चलम् । इति स्मृत्यन्तरम्।

बिन्दुधारणफलमाह योगतत्त्वे—

कन्दर्पस्य यथा रूपं तथा स्यादपि योगिनः ।
तद्रूपवशगा नार्यः काङ्क्ष्यन्ते तस्य सङ्गमम् ।।

यदि सङ्गं करोत्येष तस्य बिन्दुक्षयो भवेत् ।
वर्जयित्वा स्त्रियाः सङ्गं कुर्यादभ्यासमादरात् ॥
योगिनोऽङ्गे सुगन्धश्च जायते बिन्दुधारणात् । इति ।

मितभोजनं नाम चतुर्थांशावशेषकः सुस्निग्धमधुराहारः । तदुक्तं योगबीजे

सुस्निग्धमधुराहारश्चतुर्थांशविवर्जितः ।
भुज्यते शिवसम्प्रीत्यै मिताहारः स उच्यते । इति ।

वैद्यकेऽपि— द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत् ।
वायोः सञ्चलनार्थं हि चतुर्थमवशेषयेत् । इति ।

योगिनां भोज्यमाह हठयोगप्रदीपिकायाम्—

पुष्टं सुमधुरं स्निग्धं गव्यं धातुप्रपोषकम् ।
मनोऽभिलषितं योग्यं योगी भोजनमाचरेत् ॥इति। [१.६५]

यत्तु मोक्षपर्वणि भारते—

कणानां भक्षणे युक्तः पिण्याकस्य च भारत ।
स्नेहानां वर्जने युक्तो योगी बलमवाप्नुयात् ॥
भुञ्जानो यावकं रूक्षं दीर्घकालमरिन्दम ।
एकाहारो विशुद्धात्मा योगी बलमवाप्नुयात् ॥ इति।

उक्तं तच्च प्राणजयानन्तरमेव । अन्यथा धातुवैषम्यं शरीरपातश्च स्यात् ।

अत एव शिवसंहितायाम्—

अभ्यासकालं प्रथमं शस्तं क्षीराज्यभोजनम् ।
गोधूममुद्गशाल्यन्नं योगवृद्धिकरं विदुः ॥ इति ।

योगिनाममृतबिन्दौ वर्ज्यमाह—

भयं क्रोधमथालस्यमतिस्वप्नातिजागरम् ।
अत्याहारमनाहारं नित्यं योगी विवर्जयेत् ॥

मनुरप्याह—

अनायुष्यमनैश्वर्यमस्वर्ग्यञ्चातिभोजनम् । इति ।

अत एव नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः । इति । [६।१६] भगवताप्युक्तम् । योगतत्त्वे तु—

लवणं सार्षपं चाम्लमुष्णं रूक्षं च तीक्ष्णकम् ।
शाकजातं रामठादि वह्निस्त्री पथिसेवनम् ॥
प्रातःस्नानोपवासादि कायक्लेशांश्च वर्जयेत् । इति ।
बहुलं भ्रमणं प्रातः स्नानं तैलविदाहकम् ।

इत्यधिकं शिवसंहितायाम् ।

तथा चागमान्तरे—

अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः ।
जनसङ्गश्च लौल्यं च षड्भिर्योगी विनश्यति ।। इति ।

योगानुशासने तु—अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहाः यमा इति पञ्चविधा एव यमा प्रोक्ताः। तत्रापरिग्रहो नाम विषयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनाद स्वीकारः। सङ्गदोषोऽपि तत्रैवोक्तः । भोगाभ्यासमनुविवर्धन्ते रागाः कौशलानि चेन्द्रियाणाम् । हिंसादोषस्तु नानुपहत्य भूतान्युपभोगः सम्भवतीत्युक्तः । तदैश्वर्यं प्युक्तं तत्रैव । अपरिग्रहस्थैर्ये जन्मकथन्तासंबोध इति । शरीरविशिष्टैरिन्द्रियादिभि रभिसम्बन्धो जन्म तस्य कथन्ता किं प्रकारता तस्याः संबोधः साक्षात्कार इत्यर्थः। अतीतानागतसकलजन्मवृत्तान्तकोविदत्वमिति यावत् ।६।

एते चाहिंसादय सुप्रतिष्ठा एव वक्ष्यमाणस्वरूपफलानि जनयितुमीशते। तदाह—

क्वचिदपि च देशकालप्रसरैर्न स्खलिता निषेविता यदि ।
ऐश्वर्याण्यपि सुवते महाव्रतं सार्वभौमाः स्युः ।।७।।

ते हिंसादयः निषेविताः सुसेविताः क्वचिदपि च स्वस्वविषये देशकालप्रसरैर्न स्खलिता न च्युता यदि तदैश्वर्याणि योगिनो प्रथमसिद्धिसंसूचकानि तत्सन्निधौ वैरत्याग इत्यादीनि वक्ष्यमाणानि सुवते जनयन्ति । अपि च सार्वभौमाः सर्वासु देशकालप्रसररूपासु भूमिषु विदिता महाव्रतमित्याख्यायन्ते च । तत्र हिंसायाः स्खलनं यथा पञ्च पञ्चनखा भक्ष्या इति स्मृतेः पञ्चनखा इति कृत्वा तान् हन्यात् सापि हिंसैव । सा च तीर्थे निषेधादन्यत्र कृतेति देशनिबन्धनापि पञ्चपर्वादौ निषेधा- दन्यत्र कृतेति कालनिबन्धनापि याज्ञे कर्मणि श्राद्धेऽतिथिसत्कारे च विहितत्वात्। तत्रैव कृतेति प्रसरनिबन्धनापि अहिंसा महाव्रताच्च्यावयत्येव ।

एवम्—प्राणत्राणेऽनृतं वाच्यमात्मनो वा परस्य च ।
गुर्वर्थे स्त्रीषु चैव स्याद् विवाहकरणेषु च ।। इति स्मृतेः ।

प्राणत्राणाद्यर्थे कृतमपि समयनिबन्धनमनृतभाषणं सत्यमहाव्रताच्च्यावयत्येव। ऐतेन यथाकालं स्वभार्यायामपि भोगोऽपि ब्रह्मचर्यमेव । यथोक्तं श्रीजबालदर्शने—

कायेन मनसा वाचा स्त्रीणां परिवर्जनम् ।
ऋतौ भार्यां तदा स्वस्य ब्रह्मचर्यं तदुच्यते ।। इति

एवं दुर्भिक्षे मातापित्राद्यर्थे कृतं समयादिनिबन्धनमपि स्तेयम् स्तेयमहाव्रता- च्च्यावयत्येव ।। ७ ।।

अथावसरप्राप्तान् नियमानाह—

तप आस्तिक्यं दानं सन्तोषो ह्रीर्मतिर्जपो व्रतञ्च ।।
सिद्धान्तश्रवणं दश नियमाः पूजनमीश्वरस्य च ।। ८ ।।

स्पष्टम् ।

तथा च श्रीजाबालदर्शने—

तपःसन्तोषमास्तिक्यं दानमीश्वरपूजनम् ।
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम् ।।
एते च नियमाः प्रोक्ता इति ।

तत्र तपो नाम—

विधिनोक्तेन मार्गेण कृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं प्राहुस्तपसां तप उत्तमम् ।। इति याज्ञवल्क्यः ।

तपसस्त्रैविध्यमुक्तं भगवता [गीतायाम्]

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ।।
सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ।।
मूढग्राहेणात्मनो यत् पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ।। [१७।१७-१९]

यच्च तपःफलान्याह मनुः—

औषधान्यगदो विद्या दैवी च विविधा स्थितिः ।
तपसैव प्रसिद्धचन्ति तपस्तेषां हि साधनम् ।। इति ।

यच्च द्वितीयस्कन्धे श्रीमद्भागवते—

सञ्चिन्तय द्व्यक्षरमेकदाम्भस्युपाश्रृणोद् द्विर्गदितं वचो विभुः ।
स्पर्शेषु यत् षोडशमेकविंशं निष्किञ्चनानां नृप यद्धनं विदुः ।।

इत्युक्तम् । तत्त्वतस्तु—

मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमन्तपः ।
तज्ज्यायः सर्वधर्माणां स धर्मः पर उच्यते ।।

इति लक्षणलक्षितं समाधिरूपमेव । कृच्छ्रचान्द्रायणादीनां फलं तु मनुराह—

एतैर्व्रतैरपोहेयुर्महापातकिनो मलम् । इति ।

प्रकृते प्रथमभूमिकामारुरुक्षूणां मेदोमज्जादिविवृद्धौ तन्निवृत्यर्थं यत्किञ्चि-द्रुपयोगः। योगभाष्ये तु तपो नाम द्वन्द्वासहनमित्याह। द्वन्द्वश्च जिघत्सापिपासे, स्थानासने, काष्ठमौनाकारमौनञ्च। तत्रेङ्गितेनापि स्वाभिप्रायाप्रकाशनं काष्ठमौनम्, आकारमौनम् चावचनमात्रमिति।

वाराहोपनिषदि तु—

उप समीपे यो वासो जीवात्मपरमात्मनोः।
उपवासः स विज्ञेयो न तु कायस्य शोषणम् ॥ इति।

अथास्तिक्यं नाम श्रुतिस्मृतिविहितधर्माधर्मेषु विश्वासः। तदुक्तं श्रीजाबाल दर्शने—

धर्माधर्मेषु विश्वासो यस्तदास्तिक्यमुच्यते। इति।

नास्तिकानां योगाभ्यासादिशुभकर्मणि नाधिकारस्तदाह मनुः—

योऽवमन्येत ते मूले हेतुशास्त्राश्रयो द्विजः।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ इति।

ते मूले श्रुतिस्मृतिरूपे।

अथ दानं नाम न्यायार्जितस्य धनधान्यादेः श्रद्धयार्थिभ्यः प्रदानम्। तथा च योगियाज्ञवल्क्यः—

न्यायार्जितं धनं चापि विधिवद्यत् प्रदीयते।
अर्थिभ्यः श्रद्धया युक्तं दानमेतदुदाहृतम् ॥ इति।

तत्र हिरण्यादिदानानां प्रशंसामाह बृहस्पतिः—

अग्नेरपत्यं प्रथमं हिरण्यं
भूर्वैष्णवी सूर्यसुताश्च गावः।
लोकास्त्रयस्तेन भवन्ति दत्ता
यः काञ्चनं गाञ्च महीं च दद्यात् ॥ इति।

अन्नदानस्य प्रशंसामाह संवर्तसंहितायाम्—

सर्वेषामेव दानानामन्नदानं परं स्मृतम्।
सर्वेषामेव जन्तूनां यतस्तज्जीवनं फलम् ॥
यस्मादन्नात् प्रजाः सर्वाः कल्पे कल्पेऽसृजन् प्रभुः।
तस्मादन्नात् परं दानं न भूतं न भविष्यति ॥ इति।

दानप्रशंसामाह पराशरः—

दानेन प्राप्यते स्वर्गं दानेन सुखमश्नुते ।
इहामुत्र च दानेन पूज्यो भवति मानवः ।। इति ।

दानस्यावश्यकत्वं श्रुत्याप्याम्नातम्—यथा श्रद्धया देयमश्रद्धया देयम् श्रिया देयम् ह्रिया देयम् भिया देयं सर्वदा देयमिति ।

अन्यत्राप्युक्तम्—

उपार्जितानां वित्तानां दानमेव हि रक्षणम् ।
तडागोदरसंस्थानां परीवाह इवाम्भसाम् ।। इति ।

अदानफलमप्युक्तम्—

चत्वारो धनदायादा धर्माग्निनृपतस्कराः ।
ज्येष्ठस्य त्ववमानेन त्रयः कुप्यन्ति सोदराः ।। इति ।

दानस्योत्तमत्त्वादिमाह पराशरः—

अभिगम्योत्तमं दानमाहूतं चैव मध्यमम् ।
अधमं याच्यमानं स्यात् सेवादानं तु निष्फलम् ।। इति ।

सात्त्विकादिभेदेन दानस्य त्रैविध्यमुक्तं भगवता—

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः ।।
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ।।
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ।। [१७।२०-२२ ।]

अथ सन्तोषो नाम यदृच्छालाभसन्तुष्टिः । तदुक्तं श्रीजाबालदर्शने—

यदृच्छालाभतो नित्यं प्रीतिर्या जायते नृणाम् ।
तत्सन्तोषं विदुः प्राज्ञाः परिज्ञानैकतत्पराः ।। इति ।

सन्तोषप्रशंसामाह वासिष्ठे—

सन्तोषैश्वर्यसुखिनां चिरं विश्रान्तचेतसाम् ।
साम्राज्यमपि शान्तानां जरत्तृणलवायते ।। इति ।

तथा च मनुः—

सन्तोषं परमास्थाय सुखार्थी संयतो भवेत् ।
सन्तोषमूलं हि सुखं दुःखमूलं विपर्य्ययः ।। इति ।

अथ ह्रीर्नाम—लोकवेदयोः कुत्सिते कर्मणि लज्जा। तदाह योगियाज्ञवल्क्यः—

वेदलौकिकमार्गेषु कुत्सितं कर्म यद् भवेत्।
तस्मिन् भवति या ह्रीस्तु लज्जा सैवेति कीर्तिता। इति।

अथ मतिर्नाम श्रुतिस्मृतिविहितकर्मसु श्रद्धा। तदुक्तं श्रीजाबालदर्शने—

विहितेषु च सर्वेषु श्रद्धा या सा मतिर्भवेत्। इति।

सर्वं श्रद्धयानुष्ठितमेव फलति। तदुक्तं शिवसंहितायाम्—

फलिष्यतीति विश्वासः सिद्धेः प्रथमलक्षणम्॥ इति।

तथा च मोक्षपर्वणि भारते—

वाग्वृद्धं च मनोवृद्धं श्रद्धा सन्त्रायते नृप।
श्रद्धावृद्धं वाङ्मनसी न जातु कर्म त्रायते॥इति।

अत्र वृद्धस्य च्युतमित्यर्थः। भगवताप्युक्तम्—

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत्।
असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह॥ १७।२८। इति।

अथ जपो नाम विधिवदुपदिष्टानां वेदाविरुद्धमन्त्राणां वेदसूत्रपुराणेतिहास-सच्छास्त्राणां चाभ्यासः। तथा च योगियाज्ञवल्क्यः—

गुरुणा चोपदिष्टोऽपि वेदबाह्यविवर्जितः।
विधिनोक्तेन मार्गेण मन्त्राभ्यासो जपः स्मृतः॥ [२।१२।]
अधीत्य वेदं सूत्रं वा पुराणं वेतिहासकम्।
[अधीत्यवेदसूत्रे वा पुराणे सेतिहासके।
यदेष्वध्ययनं तच्च तदभ्यासो जपः स्मृतः।] इति मुद्रितपाठः
एतेष्वभ्यसतस्तस्य अभ्यासोऽपि जपः स्मृतः॥ इति २।१३।

स च वाचिको मानसश्च। तत्र उच्चैरुपांशुश्चैति द्वौ भेदौ वाचिकस्य। तत्र मन्दं स्वश्रोत्रमात्रगोचर उपांशुः। स्वश्रोत्रेणाप्यग्राह्यो मनोमात्रस्य गोचरस्तु मानसः। सोऽपि ध्यानरहितस्तत्सहितश्चेति द्विविधः। तेषु च ध्यानसहितो मानसः सर्वातिशायी।

तदुक्तं योगियाज्ञवल्क्येन—

उच्चैर्जपादुपांशुश्च सहस्रगुण उच्यते।
मानसश्च तथोपांशोः सहस्रगुण उच्यते॥
मानसाच्च तथा ध्यानं सहस्रगुण उच्यते। [२।१५-१६।] इति।

जपे चावश्यकान्याह स एव—

ऋषिं छन्दोऽधिदैवञ्च ध्यायन् मन्त्रस्य सत्तमे ।
यस्तु मन्त्रं जपेद् गार्गि तदेव हि फलप्रदम् ॥ [२।१८।] इति ।

वृद्धहारीतसंहितायान्तु—

इत्थं सञ्चिन्त्य मन्त्रार्थं जपेन्मन्त्रमतन्द्रितम् ।
अविदित्वा मनोरथं जपेत् प्रयतमानसः ॥
न स सिद्धिमवाप्नोति स्वरूपं च न विन्दति । इति ।

जपप्रशंसामाह मनुः—

ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् । इति ।

अत एव 'यज्ञानां जपयज्ञोऽस्मी'ति भगवताप्युक्तमिति । अत्रैव मन्त्रयोगस्यान्तर्भावः ।

अथ व्रतं नाम श्रुतिस्मृतिविहितविधिनिषेधानुष्ठाननैयत्यम् । भिक्षावृत्तिश्च विहिता । तथा च मनुः—

भैक्ष्येण वर्तयेन्नित्यं नैकान्नादी भवेद् व्रती ।
भैक्ष्येण व्रतिनां वृत्तिरुपवाससमा स्मृता । इति ।

अत्रिसंहितायान्तु—

चरेन्माधुकरीं वृत्तिमपि म्लेच्छकुलादपि ।
एकान्नं न तु भोक्तव्यं बृहस्पतिकुलादपि ॥ इति ।
दश शूना समं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमा वेशा दशवेशासमो नृपः ॥

इत्येषामन्नभक्षणनिषेधमाह मनुः । शूना चाण्डालः । चक्रं तैलकारः । ध्वजः कल्पपालः । वेशा वेश्येति ।

अथ वेदान्तश्रवणं नाम वेदान्तार्थविचारः । तथा च योगियाज्ञवल्क्यः—

'वेदान्तश्रवणं प्रोक्तं सिद्धान्तश्रवणं बुधैः' । इति ।

अथेश्वरपूजनं नाम प्रसन्नस्वभावेन हरिहरादीनामर्चनम् । अनृताविभाषणादूषितवाक्त्वे सति हिंसादिरहितकाये सति रागाद्यपेतं हृदयं वा । तथा च योगियाज्ञवल्क्यः—

[यत्प्रपन्नः] स्वभावेन विष्णुं वा रुद्र[प्यन्य]मेव वा ।
यथाशक्त्यर्चयेद् भक्त्या एतदीश्वरपूजनम् ॥

रागाद्यपेतं हृदयं वागदुष्टानृतादिभिः ।
हिंसादिरहितः कायः एतदीश्वरपूजनम् ॥ [२।६-७।] इति ।

सर्वोत्तमपूजनमाह—

गभीरे कासारे विशति विजने घोरविपिने ।
विशाले शैले च भ्रमति कुसुमार्थं जडमतिः ।
समर्प्यैकं चेतः सरसिजमुमानाथ भवते ।
सुखेनैव स्थातुं जन इह न जानाति किमहो ॥ इति ।

भगवान् पतञ्जलिस्तु—'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः' इति पञ्चविधानेव नियमानाह । तत्रेश्वरप्रणिधानं नाम तस्मिन् परमगुरौ सर्वकर्मार्पणम् ।

तथा च योगभाष्यकारः —

शय्यासनस्थोऽथ पथि व्रजन् वा स्वस्थः परिक्षीणवितर्कजालः ।
संसारबीजक्षयमीक्षमाणः स्यान्नित्यमुक्तोऽमृतभोगभोगी ॥

संसारबीजानां रागादिसंस्काराणां क्षयमनुदिनमुपलभमानः अमृतभोगभोगी जीवन्मुक्तिसुखानुभवीत्यर्थः ॥८॥

ननु श्रेयांसि बहुविघ्नानीति यमनियमानुष्ठानान्निवर्तयितुं यदि विरुद्धभावना उत्पद्येरन् तदानेन किं कृतं स्यादित्याह —

क्रोधाद्वा यदि मोहाल्लोभाद्वा बाधितुं समुद्युक्ताः ।
हिंसादयो वितर्का उन्मूल्याः प्रतिपक्षभावनातः ॥९॥

क्रोधाद्वेत्यादि । यदि हिंसादयो नाम कृतकारितानुमोदितेति त्रिविधहिंसाऽनृतभाषणचौर्यमैथुनादयः । वितर्का विपरीतभावनाविषया विरोधिन इति यावत् । क्रोधादितो बाधितुं महाव्रताच्च्यावितुं समुद्युक्ता समुद्यताः स्युः । यथापकारिणमेतं हनिष्यामि, अनृतमपि कथयिष्यामि, धनधान्यमस्यापहरिष्यामि, अस्य दारेषु व्यवायी भविष्यामीत्येवमादयः । प्रतिपक्षभावनाया एते खलु महाशत्रवो यत्पुनरनुष्ठानान्निवर्तयितुं मां नियोजयन्तीति भावनया उन्मूल्याः समूलं विनाश्याः । यथोक्तं योगभाष्ये—

'घोरेषु संसाराङ्गारेषु पच्यमानेन मया शरणमुपगतः सर्वभूताभयप्रदानेन योगधर्मः स खल्वहं वितर्कान् पुनस्तानाददानस्तुल्यः श्ववृत्तेन । यथा श्वा वान्तावलेही तथा त्यक्तस्य पुनराददान इति' ॥९॥

तत्र १ भगवतः प्रथमसिद्धिसूचकानि यमनियमजनितानि कतिपयैश्वर्याणि प्रदर्शयति—

विरमत्यपि शाश्वतिकं सुदृढ़ा सिंहस्य सन्निधौ वैरम् ।
उदयति च तत्र भवतो वाक्सिद्धिः सत्यनिष्ठस्य ॥१०॥

सुदृढ़ा सिंहस्य भगवतः सन्निधौ शाश्वतिकमपि वैरं गोव्याघ्रादीनां विरमति विनिवर्तते । किं पुनस्तात्कालिकम् । तदुक्तमुपशमप्रकरणे वासिष्ठे—

समसंविद्विलासाढ्ये यद् यदायाति देहके ।
हिंस्रचेतः पतत्याशु समतामेति तत्तदा ॥
योगिदेहसमीपात्तु गत्वा नाप्नोति हिंस्रताम् । इति ।

तत्रभवतः सत्यनिष्ठस्य वाक्सिद्धिरुदयति । अप्रतिहता खल्वस्य वाग् भवति । अपुत्रमपि ब्रूयात् पुत्रवान् भवेति लभते पुत्रम् । पापिष्ठमपि ब्रूयात् स्वर्गं प्राप्नुहीति स्वर्गं प्राप्नोतीति ॥१०॥

समुपस्थितिरस्तेये प्रतिष्ठिते भवति सर्वरत्नानाम् ।
सिद्धिः शक्तिमनल्पामवचिनुते ब्रह्मचर्येऽसौ ॥११॥

तत्रभवतः प्रतिष्ठितेऽस्तेये सर्वरत्नानां सर्वदिक्स्थानामुपस्थितिर्भवति । ब्रह्मचर्ये प्रतिष्ठिते पुनः सिद्धोऽणिमाद्यैश्वर्यसम्पन्नः सन्नसौ अनल्पामधिकां शक्तिं शिष्येषु विद्यामाधातुं सामर्थ्यमवचिनोति उत्कर्षयतीत्यर्थः ॥११॥

स्वाङ्गेषु दोषदर्शी शौचात्कुरुते परैर्न संसर्गम् ।
चितिसाक्षात्कृतिशक्तिं ह्यान्तरो लभते पुनरेषः ॥१२॥

शौचात् पुनः स्वाङ्गेषु दोषदर्शी भवति । कायस्वभावमालोक्यात्यन्ताशुचिस्वमपि शरीरं जिहासुः परैः संसर्गं न कुरुते परकीयशरीरस्पर्शादिभ्यो विरमति । कायस्याशुचित्वं यथोक्तम्—

स्थानाद् बीजादुपष्टम्भात् निस्पन्दान्निधनादपि ।
कायमाधेयशौचत्वात् पण्डिता ह्यशुचिं विदुः ॥ इति ।

तत्र स्थानं मूत्राद्युपहतं मातुरुदरम्, मातापित्रोर्लोहितरेतसी बीजम्, शरीरसन्धारकोऽशितपीताहाररसादिभाव उपष्टम्भः, निधनं मरणम् अपवित्रयति मृतमृषिशरीरमपि, शवस्पर्शे स्नानविधानात् । स्वाभाविकाशुचेरपि शौचमाधेयमित्येते-

हेतुभिः पण्डिताः कायमशुचिं विदुरित्यर्थः । एष पुनरान्तरात् शौचाद्धि चितिसाक्षात्कृतिशक्तिमात्मसाक्षात्कारयोग्यतां लभत इति । आन्तरशुचेः सत्त्वशुद्धिस्ततः सौमनस्यम्, तदस्त्वेकाग्रता, तत इन्द्रियाणां जयः, ततः समाधियोग्यतेति क्रमेण बोध्यमिति ।।१२।।

सुखमतिशयितं लभते सन्तोषात् सुपरिरक्षितादधिकम् ।
तपसोऽशुद्धिविरामे कायेन्द्रियसिद्धिमादत्ते ।।१३।।

सुपरिरक्षितसन्तोषेण परमसुखमधिकं प्राप्नोति । यथोक्तम्—

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ।। इति ।

तत्र कामसुखमैहिकविषयजनितम्, दिव्यन्तु स्वर्गभवम् । यथा वृद्धे पितरि पुरौ राजनि यौवनमर्पयता ययातिनोक्तम्—

या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्णताम् ।
तां तृष्णां सन्त्यजन् प्राज्ञः सुखेनैवाभिपूर्यते ।। इति ।

तपसाऽशुद्धिक्षये तु अणिमा महिमा लघिमा प्राप्तिश्चेति कायसिद्धिं दूराच्छ्रवणदर्शनाद्यामिन्द्रियसिद्धिञ्च प्राप्नोतीत्यर्थं इति ।।१३।।

जपनिरतस्य च देवा ऋषयस्सिद्धाः समक्षतां यान्ति ।
ईश्वरमाराधयतः फलति समाधिर्विरतकामस्य ।।१४।।

निगदव्याख्यातम् ।

ननु निष्कामेश्वराराधनादेव समाधिसिद्धौ कृतं यमनियमाद्यङ्गैरिति चेन्न ईश्वरसिद्धौ सम्प्रज्ञातसिद्धौ च आसनाद्यङ्गानां दृष्टफलकतया यमनियमानामशुद्धिक्षयरूपादृष्टाद्वारोभयत्र संयोगपृथक्त्वन्यायेनोपयोगात् । तथा हि एकस्य तूभयत्वे संयोगपृथक्त्वम् । [मी० सू० ४।३।५।]

एकस्य दध्यादेरुभयत्वे क्रत्वर्थपुरुषार्थत्वे संयोगस्य क्रत्वर्थपुरुषार्थत्वबोधकविनियोजकवाक्यस्य पृथक्त्वं भिन्नत्वं नियामकमिति शेषः ।

न चैवमपि समाधौ ईश्वरप्रणिधानमेवान्तरङ्गं न तु धारणाद्यङ्गत्रयमिति वाच्यम् । सम्प्रज्ञातसिद्धौ धारणाद्यङ्गत्रयस्य सम्प्रज्ञातसमानगोचरतयान्तरङ्गत्वेनाङ्गान्तराणामतद्गोचराणां बहिरङ्गतया प्रतीतेः । यदनन्तरं यद् भवति तत्तस्यान्तरङ्गमिति नियमादिति । योगतत्त्वे तु यमेषु मितभोजनस्य नियमेषु चाहिंसायाः प्राधान्यमाह—

लघ्वाहारो यमेष्वेको मुख्यो भवति नेतरः ।
अहिंसा नियमेष्वेका मुख्या वै चतुरानन ।। इति ।

इति श्रीत्रिदश्रीठक्कनशर्मविरचितयोगरत्नावल्यां प्रथमं गुच्छकम् ।।

अथ तृतीयगुच्छकम्

अथ क्रमप्राप्तां धारणां लक्षयति

एभ्योऽन्तरङ्गमङ्गत्रयमथ तत्रापि धारणा पूर्वा ।
चित्तस्य देशबन्धोऽभिहिता सेयं पुराविद्भिः ॥२८॥

एभ्य इत्यादि । अत्रैभ्यो यमनियमादिपञ्चाङ्गेभ्योऽन्तरङ्गमङ्गत्रयमुच्यत इति शेषः । अङ्गानामन्तरङ्गबहिरङ्गभावो निरूपितः प्राक् । तत्रापि अन्तरङ्गत्रयेऽपि धारणा पूर्वा प्रथमा । धारणाध्यानसमाधीनां कार्यकारणभावेन नियतपौर्वापर्यादिति भावः । सेयं धारणा चित्तस्य देशबन्धो नाम चित्तं तद्देशे वृत्तिप्रबन्धेन स्थापनरूपा पुराविद्भिरभिहितेति ॥२८॥

देशविशेषानाह—

नाभ्यादिरान्तरो वै देशो बाह्यश्च चन्द्ररत्नाद्यः ।
नैवापयाति तस्माच्चेतः सा स्यात्तदा सिद्धा ॥२९॥

तत्र चाध्यात्मिका इत्युच्यते—नाभिचक्र-हृदयपुण्डरीक-मूर्धस्थज्योतिस्तत्त्व नासिकाग्रजिह्वाग्रादय आभ्यन्तराः । चन्द्रमण्डल-सूर्यमण्डल-ध्रुवादिनक्षत्रप्रदीपादयो आधिदैविकाः रत्नमणिशालिग्रामदेवताप्रतिमादय आधिभौतिकाश्च बाह्या देशा इत्युच्यन्ते आध्यात्मिकाः ।

धारणादिषु कालनियममाह स्कान्दे—

धारणा पञ्चनाडीका ध्यानं स्यात् षष्टिनाडिकम् ।
दिनद्वादशकेनैव समाधिरिह भण्यते ॥ इति ।
प्राणायामैर्द्वादशभिर्यावत्कालः कृतो भवेत् ।
स तावत्कालपर्यन्तं मनो ब्रह्मणि धारयेत् ॥
तस्यैव ब्रह्मणि प्रोक्तं ध्यानं द्वादशधारणा ।
ध्यानद्वादशपर्यन्तं मनो ब्रह्मणि योजयेत् ॥
तिष्ठेत्तु लयतो युक्तः समाधिः सोऽभिधीयते । इति च गारुडे ।

धारणाविशेषमाह योगतन्त्रे—

भूमिरापोऽनलो वायुराकाशश्चेति पञ्चकः ।
तेषु पञ्चसु देवानां धारणा पञ्चधोच्यते ॥

तत्प्रकारमप्याह तत्रैव —

पादादिजानुपर्यन्तं पृथिवीस्थानमुच्यते ।
पृथिवीचतुरस्रञ्च पीतवर्णं लवर्णकम् ।।
पार्थिवे वायुमारोप्य लकारेण समान्वितम् ।
ध्यायंश्चतुर्भुजाकारं चतुर्वक्त्रं हिरण्मयम् ।।
धारयेत् पञ्चघटिकाः पृथिवीजयमाप्नुयात् ।
पृथिवीयोगतो मृत्युर्न भवेदस्य योगिनः ।।
आजानोः पायुपर्यन्तमपां स्थानं प्रकीर्तितम् ।
आपोऽर्धचन्द्रं शुक्लञ्च वं बीजं परिकीर्तितम् ।।
वारुणे वायुमारोप्य वकारेण समन्वितम् ।
स्मरन्नारायणं देवं चतुर्बाहुं किरीटिनम् ।।
शुद्धस्फटिकसंकाशं पीतवाससमच्युतम् ।
धारयेत् पञ्चघटिकाः सर्वपापैः प्रमुच्यते ।।
ततो जलाद्भयं नास्ति जले मृत्युर्न विद्यते ।
आपायोर्हृदयान्तञ्च वह्निस्थानं प्रकीर्तितम् ।।
वह्निस्त्रिकोणं रक्तञ्च रेफाक्षरसमन्वितम् ।
वह्नौ चानिलमारोप्य रेफाक्षरसमुज्वलम् ।।
त्रियक्षं वरदं रुद्रं तरुणादित्यसन्निभम् ।
भस्मोद्धूलितसर्वाङ्गं सुप्रसन्नमनुस्मरन् ।।
धारयेत् पञ्चघटिका वह्निनासौ न दह्यते ।
न दह्यते शरीरञ्च प्रविष्टस्याग्निमण्डले ।।
आहृदयाद्भ्रुवोर्मध्यं वायुस्थानं प्रकीर्तितम् ।
वायुः षट्कोणकं कृष्णं यकाराक्षरभास्वरम् ।।
मारुतं मरुतां स्थाने यकाराक्षरभास्वरम् ।
धारयेत्तत्र सर्वज्ञमीश्वरं सर्वतोमुखम् ।।
धारयेत् पञ्चघटिका वायुवद् व्योमगो भवेत् ।
मरणन्न तु नायोश्च भयं भवति योगिनः ।।
आभ्रूमध्यात्तु मूर्धान्तमाकाशस्थानमुच्यते ।
व्योमवृत्तञ्च धूम्रञ्च हकाराक्षरभास्वरम् ।।
आकाशे वायुमारोप्य हकारोपरि शङ्करम् ।

बिन्दुरूपं महादेवं व्योमाकारं सदाशिवम् ।।
शुद्धस्फटिकसङ्काशं धृतबालेन्दुमौलिनम् ।
पञ्चवक्त्रयुतं सौम्यं दशबाहुं त्रिलोचनम् ।।
सर्वायुधैर्धृताकारं सर्वभूषणभूषितम् ।
उमार्धदेहं वरदं सर्वकारणकारणम् ।।
आकाशधारणात्तस्य खेचरत्वं भवेद् ध्रुवम् ।
यत्र कुत्र स्थितो वापि सुखमत्यन्तमश्नुते ।।
एवञ्च धारणाः पञ्च कुर्याद् योगी विचक्षणः ।
ततो दृढशरीरः स्यान्मृत्युस्तस्य न विद्यते ।।
ब्रह्मणः प्रलयेनापि न सीदति महामतिः ।।इति ।

प्रत्याहारोत्तरमेव धारणासु विनियोगस्तथा च स्मृतिः—

प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम् ।
वशीकृत्य ततः कुर्याच्चित्तं स्थाने शुभाश्रये ।। इति ।

अथ शरीरे ब्रह्माण्डनिरूपणं, यथा शिवसंहितायाम्—

देहेऽस्मिन् वर्तते मेरुः सप्तद्वीपसमन्वितः ।
सरितः सागराश्शैलाः क्षेत्राणि क्षेत्रपालकाः ।।
ऋषयो मुनयः सर्वे नक्षत्राणि ग्रहास्तथा ।
पुण्यतीर्थानि पीठानि वर्तन्ते पीठदेवताः ।।
सृष्टिसंहारकर्तारौ भ्रमन्तौ शशिभास्करौ ।
नभो वह्निश्च वायुश्च जलं पृथ्वी तथैव च ।।
त्रैलोक्ये यानि भूतानि तानि सर्वाणि देहतः ।
मेरुं संवेष्ट्य सर्वत्र व्यवहारः प्रवर्तते ।।
जानाति यः सर्वमिदं स योगी नात्र संशयः । इति ।
सुखं स्वान्तर्गतं विश्वं तस्मिन् सर्वं प्रतिष्ठितम् ।

इत्यदि योगशिखायामपि ।

ब्रह्मादीनां स्थानमाह ब्रह्मविद्योपनिषदि—

ब्रह्मणो हृदयस्थानं कण्ठे विष्णुः समाश्रितः ।
तालुमध्ये स्थितो रुद्रो ललाटस्थो महेश्वरः ।।
नासाग्रे ह्यच्युतं विद्यात् तस्यान्ते तु परं पदम् ।
परत्वात्तु परन्नास्तीत्येवं शास्त्रस्य निर्णयः ।।

देहातीतं तु तं विद्यान्नासाग्रे द्वादशाङ्गुलम् ।
तदन्तं तं विजानीयात्तत्रस्थो व्यापयेत् प्रभुः ॥
मनोऽप्यत्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम् ।
तथापि योगिनां योगो ह्यविच्छिन्नः प्रवर्तते ॥ इति ।

चन्द्रस्थानमाह शिवसंहितायाम्—

मेरुशृङ्गे सुधारश्मिर्बहिरष्टकलायुतः ;
वर्त्ततेऽहर्निशं सोऽपि सुधां वर्षत्यधोमुखः ॥
ततोऽमृतं द्विधाभूतं याति सूक्ष्मं यथा च वै ।
इडामार्गेण पुष्ट्यर्थं याति मन्दाकिनीजलम् ॥
पुष्णाति सकलं देहमिडामार्गेण निश्चितम् ॥ इति ।

सूर्यस्थानमाह तत्रैव—

मेरुमूले स्थितः सूर्यः कलाद्वादशसंयुतः ।
दक्षिणे पथि रश्मिभिर्वहत्यूर्ध्वं प्रजापतिः ॥

तत्रैव गङ्गामाह—

सुषुम्णा मेरुणा याता ब्रह्मरन्ध्रं यतोऽस्ति वै ।
ततश्चैषा परावृत्य तदाज्ञापद्मदक्षिणे ॥
ज्ञाननासापुटं याति गङ्गेति परिगीयते ।

उदग्वहवृत्तान्तमाह—

आज्ञापङ्कजदक्षांसाद् वामनासापुटावधि ।
उदग्वहेति तत्रेडा गङ्गेति समुदाहृता ॥ इति ।

असीमाह—

मूलाधारे हि यत्पद्मं चतुष्पत्रं व्यवस्थितम् ।
तत्र कन्देऽस्ति या योनिस्तस्यां सूर्यो व्यवस्थितः ॥
तत्सूर्यमण्डलद्वारा विषं क्षरति संततम् ।
पिङ्गलायां विषं तत्र समर्पयति तापनः ॥
विषं तत्र वहन्ती या धारारूपं निरन्तरम् ।
दक्षनासापुटे याति कल्पितेयं तु पूर्ववत् ॥
आज्ञापङ्कजवामांसात् दक्षनासापुटङ्गता ।
उदग्वहा पिङ्गलापि पुरासीति प्रकीर्तिता ॥ इति ।

इडा गङ्गा पुरा प्रोक्ता पिङ्गला चार्कपुत्रिका ।
मध्या सरस्वती प्रोक्ता तासां सङ्गोऽतिदुर्लभः ।। इति ।

अथ षट्चक्रनिरूपणम् —

मूलाधारादि षट्चक्रं शक्तिस्थानमुदीरितम् ।
कण्ठादुपरि मूर्धान्तं शाम्भवस्थानमुच्यते ।।

इति च वाराहोपनिषदि ।

भ्रुवोर्मध्ये ललाटे तु नासिकायास्तु मूलतः ।
जानीयादमृतं स्थानं तद् ब्रह्मायतनं महत् ।।

इति च ध्यानबिन्दौ ।

योगचूडामणौ—

चतुर्दलः स्यादाधारो स्वाधिष्ठानश्च षट्दलम् ।
नाभौ दशदलं प्रोक्तं हृदये द्वादशारकम् ।।
षोडशारं विशुद्धाख्यं भ्रूमध्ये द्विदलं तथा ।
सहस्रदलसंख्यातं ब्रह्मरन्ध्रे महापथि ।। इति ।

पीठान्याह योगशिखायाम्—

दशद्वारपुरं देहं दशनाडीमहापथम् ।
दशभिर्वायुभिर्व्याप्तं दशेन्द्रियपरिच्छदम् ।।
षडाधारापवरकं षडन्वयमहावलम् ।
चतुःपीठसमाकीर्णं चतुराम्नायदीपकम् ।।
बिन्दुनादमहालिङ्गं शिवशक्तिनिकेतनम् ।
देहं शिवालयं प्रोक्तं सिद्धिदं सर्वदेहिनाम् ।।
गुदमेढ्रान्तरालस्थं मूलाधारं त्रिकोणकम् ।
शिवस्य जीवरूपस्य स्थानं तद्धि प्रचक्षते ।।
यत्र कुण्डलिनी नाम परा शक्तिः प्रतिष्ठिता ।
यस्मादुत्पद्यते वायुर्यस्माद्वह्निः प्रवर्तते ।।
यस्मादुत्पद्यते बिन्दुर्यस्मान्नादः प्रवर्तते ।
यस्मादुत्पद्यते हंसो यस्मादुत्पद्यते मनः ।।
तदेतत् कामरूपाख्यं पीठं कामफलप्रदम् ।
स्वाधिष्ठानाह्वयं चक्रं लिङ्गमूले षडस्रके ।।

नाभिमूले स्थितं चक्रं दशारं मणिपूरकम् ।
द्वादशारं महाचक्रं हृदये चाप्यनाहतम् ॥
तदेतत् पूर्णगिर्याख्यं पीठं कमलसम्भव ।
कण्ठकूपे विशुद्धाख्यं यच्चक्रं षोडशास्त्रकम् ॥
पीठं जालन्धरन्नाम तिष्ठत्यत्र सुरेश्वर ।
आज्ञा नाम भ्रूवोर्मध्ये द्विदलं चक्रमुत्तमम् ॥
उड्डचानाख्यं महापीठमुपरिष्टात्प्रतिष्ठितम् ॥ इति ।

विशेषमाह ध्यानविन्दौ—

आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् ।
योनिस्थानं तयोर्मध्ये कामरूपं निगद्यते ॥
आधाराख्ये गुदस्थाने पङ्कजं यच्चतुर्दलम् ।
तन्मध्ये प्रोच्यते योनिः कामाख्या सिद्धवन्दिता ॥
योनिमध्ये स्थितं लिङ्गं पश्चिमाभिमुखं तथा ।
मस्तके मणिवद्भिन्नं यो जानाति स योगवित् ॥
चतुरस्रमुपर्यग्नेरधो मेढ्रात्प्रतिष्ठितम् ।
स्वशब्देन भवेत्प्राणः स्वाधिष्ठानं तदाश्रयम् ॥
मणिवत्तन्तुना यत्र वायुना पूरितं वपुः ।
तन्नाभिमण्डलं चक्रं प्रोच्यते मणिपूरकम् ॥
द्वादशारमहाचक्रे पुण्यपापनियन्त्रितः ।
तावज्जीवो भ्रमत्येव यावत्तत्त्वं न विन्दति ॥ इति ।

ब्रह्मरन्ध्रमाह शिवसंहितायाम्—

तत्त्वे स्थाने च यत्पद्मं सहस्रारं पुरोदितम् ।
तत्कन्दे योनिरेकास्ति पश्चिमाभिमुखी मता ॥
तस्य मध्ये सुषुम्णाया मूलं सविवरं स्थितम् ।
ब्रह्मरन्ध्रं तदेवोक्तमामूलाधारपङ्कजम् ॥ इति ।

विशेषपीठान्याह श्रीजाबालदर्शने—

श्रीपर्वतं शिरःस्थाने केदारं तु ललाटके ।
वाराणसी महाप्राज्ञ भ्रुवोर्घ्राणस्य मध्यमे ॥
कुरुक्षेत्रं कुचस्थाने प्रयागं हृत्सरोरुहे ।
चिदम्बरन्तु हृन्मध्ये आधारे कमलालयम् ॥ इति ।

वाराणसीमाह जावालोपनिषदि—

अथ हैनमत्रिः पप्रच्छ याज्ञवल्क्यं य एषोऽनन्तोऽव्यक्त आत्मा तं कथमहं विजानीयामिति । स होवाच याज्ञवल्क्यः सोऽहं विमुक्त उपास्यो य एषोऽनन्तऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति । सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति रचनायां वरणायां नश्यां च मध्ये प्रतिष्ठित इति । का वै वरणा का च नशीति । सर्वानिन्द्रिय-कृतान् दोषान् वारयति, तेन वरणा भवतीति । सर्वानिन्द्रियकृतान् पापान्नाशयति' तेन नशी भवतीति । कतमं चास्य स्थानं भवतीति । भ्रुवोर्घ्राणस्य च यः सन्धिः स एष द्यौर्लोकस्य परस्य च सन्धिर्भवतीति । एतद्वै सन्ध्यां ब्रह्मविद उपासते । सोऽविमुक्त उपास्य इति । सोऽविमुक्तं ज्ञानमाचष्टे, यो वै तदेवं वेदेति । अत एव काश्यां मरणान्मुक्तिरिति श्रुतिरप्येतत्परैव । तथा च भगवद्वाक्यम्—

प्रयाणकाले मनसाचलेनेत्यादि । [गीता ८।१० ।]

शक्तिपीठान्याह योगशिखायाम्—

ब्रह्मरन्ध्रे महास्थाने वर्तन्ते सततं शिवा ।
चिच्छक्तिः परमा देवी मध्यमे सुप्रतिष्ठिता ॥
मायाशक्तिर्ललाटाग्रभागे व्योमाम्बुजे सदा ।
नादरूपा पराशक्तिर्ललाटस्य तु मध्यमे ॥
भागे बिन्दुमयी शक्तिर्ललाटस्यापरांशके ।
बिन्दुमध्ये च जीवात्मा सूक्ष्मरूपेण वर्तते ॥ इति ।

नवचक्राणि च लययोगनिरूपणे व्याख्यातानि । पर्वाण्याह श्री जाबालदर्शने—

पिङ्गलायामिडायान्तु वायोः सङ्क्रमणन्तु यत् ।
तदुत्तरायणं प्रोक्तं मूले वेदान्तवेदिभिः ॥
इडायां पिङ्गलायान्तु प्राणसङ्क्रमणं मुने ।
दक्षिणायणमित्युक्तं पिङ्गलायामिति श्रुतिः ॥
इडापिङ्गलयोः सन्धिं यदा प्राणः समागतः ।
अमावास्या तदा प्रोक्ता देहे देहभृतां वर ॥
मूलाधारं यदा प्राणः प्रविष्टः पण्डितोत्तमः ।
तदाद्यं विषुवं प्रोक्तं तापसैस्तापसोत्तमः ।
प्राणसंज्ञो मुनिश्रेष्ठ मूर्धानं प्रविशेद् यदा ।
तदन्त्यं विषुवं प्रोक्तं तापसैस्तत्त्वचिन्तकैः ॥
निःश्वासोच्छ्वासनं सर्वं मासानां सङ्क्रमो भवेत् ।

ईडया कुण्डलीस्थानं यदा प्राणः समागतः ।।
सोमग्रहणमित्युक्तं तदा तत्त्वविदां वर ।
यदा पिङ्गलया प्राणः कुण्डलीस्थानमागतः ।।
तदा तदा भवेत्सूर्यग्रहणं मुनिपुङ्गव । इति ।

आत्मतीर्थप्रशंसामाह तत्रैव —

आत्मतीर्थं समुत्सृज्य बहिस्तीर्थानि यो व्रजेत् ।
करस्थं स महारत्नं त्यक्त्वा काचं विमार्गते ।।
भावतीर्थं परं तीर्थं प्रमाणं सर्वकर्मसु ।
अन्यथालिङ्ग्यते कान्ता अन्यथालिङ्ग्यते सुता ।।
तीर्थानि तोयपूर्णानि देवान् काष्ठादिनिर्मितान् ।
योगिनो नो पूजयन्ति स्वात्मप्रत्ययकारणात् ।।
बहिस्तीर्थात्परं तीर्थमन्तस्तीर्थं महामुने ।
आत्मतीर्थं महातीर्थमन्यत्तीर्थं निरर्थकम् ।।
चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुद्धयति ।
शतशोऽपि जलैर्धौतं सुराभाण्डमिवाशुचि ।।
विषुवायतनकालेषु ग्रहणे चान्तरे सदा ।
वाराणस्यादिके स्थाने स्नात्वा शुद्धो भवेन्नरः ।।
ज्ञातयोगपराणान्तु पादप्रक्षालितं जलम् ।
भावशुद्धयर्थमज्ञानां तत्तीर्थं मुनिपुङ्गव ।
तीर्थे दाने जपे यज्ञे काष्ठे पाषाणके सदा ।
शिवं पश्यति मूढात्मा शिवे देहे प्रतिष्ठिते ।।
अन्तःस्थं मां परित्यज्य बहिष्ठं यस्तु सेवते ।
हस्तस्थं पिण्डमुत्सृज्य लिहेत्कूर्परमात्मनः ।
शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः ।
अज्ञानां भावनार्थाय प्रतिमाः परिकल्पिताः ।
अपूर्वमपरं ब्रह्म स्वात्मानं सत्यमव्ययम् ।
प्रज्ञानघनमानन्दं यः पश्यति स पश्यति ।। इति

अथाधारादिदेशेषु धारणाफलानि निर्दिश्यन्ते ।

आधारशक्तिनिद्रायां विश्वं भरति निद्रया ।।
तस्यां शक्तिप्रबोधेन त्रैलोक्यं प्रतिबुध्यते ।

आधारं यो विजानाति तमसः परमश्नुते ।
आधारचक्रमहसा पुण्यपापे निकृन्तयेत् ।
आधारवातरोधेन नीयते गगनान्तरे ।। इत्यादि योगशिखायाम् ।

तथा च शिवसंहितायाम्—

य: करोति सदा ध्यानं मूलाधारे विचक्षण: ।
तस्य स्याद् दार्दुरीसिद्धिर्भूमित्यागक्रमेण वै ।। इति ।

तथा च—

आधारे पश्चिमे भागे त्रिवेणी सङ्गमो भवेत् ।
तत्र स्नात्वा च पीत्वा नरः पापात्प्रमुच्यते ।
आधारे पश्चिमे लिङ्गं कवाटं तत्र विद्यते ।
तस्योद्घाटनमात्रेण मुच्यते भवबन्धनात् ।
आधारपश्चिमे भागे चन्द्रसूर्यौ स्थिरौ यदि ।
तत्र तिष्ठति विश्वेशो ध्यात्वा ब्रह्ममयो भवेत् । इति च

योगशिखायाम् ।

अथ स्वाधिष्ठानफलमाह शिवसंहितायाम्—

यो ध्यायति सदा दिव्यं स्वाधिष्ठानारविन्दकम् ।
तस्य कामाङ्गनाः सर्वा भजन्ते काममोहिताः ।
विविधं चाश्रुतं शास्त्रं निःशङ्को वै वदेद् ध्रुवम् ।
सर्वरोगविनिर्मुक्तो लोके चरति निर्भयः ।। इति ।

अथ मणिपूरकफलमाह तत्रैव—

तस्मिन् ध्यानं सदा योगी करोति मणिपूरके ।
तस्य पातालसिद्धिः स्यान्निरन्तरसुखावहा ।।
ईप्सितश्च भवेल्लोके दुःखरोगविनाशनम् ।
कालस्य वञ्चनञ्चापि परदेहप्रवेशनम् ।।

अनाहतफलमाह तत्रैव—

एतस्मिन् सततं ध्यानं हृत्पाथोजे करोति यः ।
क्षुभ्यन्ते तस्य कान्ता वै कामार्त्ता दिव्ययोषितः ।।
ज्ञानञ्चाप्रतिमं तस्य त्रिकालविषयं भवेत् ।
दुरश्रुतिर्दूरदृष्टिः स्वेच्छया खगतां व्रजेत् ।। इति ।

विशुद्धाख्यफलं तत्रैव—

ध्यानं करोति यो नित्यं स योगीश्वरपण्डितः ।
किन्त्वस्य योगिनोऽन्यत्र विशुद्धाख्ये सरोरुहे ।।
चतुर्वेदा विभासन्ते सरहस्या निधेरिव ।
इह स्थाने स्थितो योगी यदा क्रोधवशो भवेत् ।।
तदा समस्तं त्रैलोक्यं कम्पते नात्र संशयः ।

आज्ञाचक्रफलं तत्रैव—

तत्र देवः परन्तेजः सर्वतन्त्रेषु मन्त्रिणः ।
चिन्तयित्वा परां सिद्धिं लभते नात्र संशयः ।।
तुरीयं तृतीयं लिङ्गं तदाहं मुक्तिदायकः ।
ध्यानमात्रेण योगीन्द्रो मत्समो भवति ध्रुवम् ।। इति.
यानि यानि हि प्रोक्तानि पञ्चपद्मे फलानि वै ।
तानि सर्वाणि सुतरामेतज्ज्ञानाद् भवन्ति हि ।। इति :

ब्रह्मरन्ध्रफलमाह तत्रैव—

ब्रह्मरन्ध्रे मनो दत्वा क्षणार्द्धं यदि तिष्ठति ।
सर्वपापविनिर्मुक्तः स याति परमां गतिम् ।।
स्वस्मिन् लीनं मनो यस्य स योगी मयि लीयते ।
अणिमादिगुणान् त्यक्त्वा स्वेच्छया पुरुषोत्तमः ।। इति ।
वामदक्षे निरुन्धन्ति प्रविशन्ति सुषुम्णया ।
ब्रह्मरन्ध्रं प्रविश्यान्तस्ते यान्ति परमां गतिम् ।। इति च
योगशिखायाम् ।

चक्रान्तरेष्वपि चित्तस्थापनफलानि नवचक्रनिरूपणे लययोगप्रकरणे निरूपितानि।

त्रिवेणीस्नानमाह शिवसंहितायाम्—

सितासिते सङ्गमे यो मनसा स्नानमाचरेत् ।
सर्वपापविनिर्मुक्तो याति ब्रह्म सनातनम् ।।
मृत्युकाले प्लुतं देहं त्रिवेण्याः सलिले यदा ।
विचिन्तयंस्त्यजेत् प्राणान् स तदा मोक्षमाप्नुयात् ।। इति ।

सुषुम्णामाहात्म्यं यथा योगशिखायाम्—

सुषुम्णायां प्रवेशेन चन्द्रसूर्यौ लयं गतौ ।
तदा समरसंभारं यो जानाति स योगवित् ।।

सुषुम्णायां यदा योगी क्षणार्द्धमपि तिष्ठति ।
× × ×
सुषुम्णायां यदा योगी लीयते क्षीरनीरवत् ॥
भिद्यते च तदा ग्रन्थिच्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते परमाकाशे ते यान्ति परमां गतिम् ॥ इति ।

अथ देशविशेषेषु धारणाफलान्याह शिवसंहितायाम्—

योगी पद्मासने तिष्ठन् कण्ठकूपे यदा स्मरन् ।
जिह्वां कृत्वा तालुमूले क्षुत्पिपासा निवर्तते ॥
कण्ठकूपादधः स्थाने कूर्मनाड्यस्ति शोभना ।
तस्मिन् योगी मनो दत्वा चित्तस्थैर्यं लभेद् भृशम् ॥
शिरः कपाले रुद्राक्षं विवरं चिन्तयेद् यदा ।
तदा ज्योतिः प्रकाशः स्याद्विद्युत्पुञ्जसमप्रभः ॥
एतच्चिन्तनमात्रेण पापानां संक्षयो भवेद् ।
दुराचारोऽपि पुरुषो लभते परमं पदम् ॥
अहर्निशं यदा चिन्तां तत्करोति विचक्षणः ।
सिद्धानां दर्शनं तस्य भाषणञ्च भवेद् ध्रुवम् ॥
तिष्ठन् गच्छन् स्वपन् भुञ्जन् ध्यायेच्छून्यमहर्निशम् ।
तदाकाशमयो योगी चिदाकाशे विलीयते ॥
नासाग्रे दृश्यते येन पद्मासनगतेन वै ।
मनसो मरणं तस्य खेचरत्वं प्रसिद्धयति ॥
उत्तानशयने भूमौ स्वप्नाध्यायनिरन्तरम् ।
सद्यः श्रमविनाशाय स्वयं योगी विचक्षणः ॥
शिरः पश्चात्तु भागस्य ध्याने मृत्युञ्जयो भवेद् ।

अथ प्रतीकोपासनं यथा तत्रैव—

गाढातपे स्वप्रतिविम्बितेश्वरं
निरीक्ष्य विस्फारित लोचनद्वयः ।
यदा नभः पश्यति स्वप्रतीकं
नभोऽङ्गणे तत्क्षणमेव पश्यति ।

गाढातपे स्वच्छायाया कण्ठदेशं भ्रूमध्यदेशं वा स्थिरकायो लम्बितबाहुः स्थिरमना निश्चलदृशा पश्यन् क्लीं परब्रह्मणे नम इति मन्त्रमष्टोत्तरशतं जप्त्वा विस्फारितलोचनो नभसि स्वप्रतीकं पश्येदित्यधिकं शिवस्वरोदये द्रष्टव्यम् ।

प्रत्यहं पश्यते यो वै स्वप्रतीकं नभोऽङ्गणे ।
आयुर्वृद्धिर्भवेत्तस्य न मृत्युः स्यात् कदाचन ।। इति ।

विषयाश्च गन्धादयो वेदितव्याः ।।२९।।

ननु धारणासिद्धौ किं स्यात् ? तदाह—

ज्योतिष्मती विशोका विषयवती वा प्रवृत्तिरुत्पन्ना ।
मैत्र्यादिभावनातः प्रसन्नचित्तं स्थितिन्तनुते ।।३०।।

ज्योतिष्मतीत्यादि । हृदयपुण्डरीके चित्तं धारयतो बुद्धिसंवित् जायते । तथा च योगसूत्रं—हृदयपुण्डरीके चित्तसंविदिति । सा बुद्धिसत्वस्य भास्वरतया तत्र स्थिति-कौशलेन सूर्येन्दुग्रहमणिप्रभारूपाकारेण विकल्पिता । तथास्मितासमापन्नस्य च चित्तस्य निस्तरङ्गमहोदधिकल्पतया प्रशान्ततयाऽनन्ततया चास्मिता मात्रा चैषा द्वयी विशोका दुःखरहिता ज्योतिष्मती प्रकाशरूपा उत्पन्ना प्रवृत्तिः ।

तदाम्नातं कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषदि—

नीहारधूमार्कानलानिलानां
खद्योतविद्युत्स्फटिकशशीनाम् ।
एतानि रूपाणि पुरःसराणि
ब्रह्मण्यभिव्यक्तिकराणि योगे ।। इति ।

तथा च वाशिष्ठे उपशमप्रकरणे उद्दालकोपाख्याने—

तमस्युपरते स्वान्ते तेजःपुञ्जं ददर्श स । इति ।

अथ वा उत्पन्ना विषयवती प्रवृत्तिः मैत्र्यादिभावनातः प्रसन्नस्य चित्तस्य स्थिति-मेकाग्रतां ध्यानादियोग्यतामिति भावः, तनुते वर्द्धयतीत्यर्थः । तथा च योगभाष्ये –

नासिकाग्रे धारयतोऽस्य या दिव्यगन्धसंवित् सा गन्धप्रवृत्तिः जिह्वाग्रे दिव्य-रससंवित् । तालुनि रूपसंवित् । जिह्वामूले स्पर्शसंवित् । जिह्वामूले शब्दसंवित् इत्येताः प्रवृत्तय उत्पन्नाश्चित्तं स्थितौ निबन्धन्तीति । एवं चन्द्ररत्नादिबाह्यदेशेषु चित्तन्धारयतोऽपि जाता प्रवृत्तिर्विषयवत्येवेति बोध्यम् ।

यच्चागमान्तरे—

ज्योतिष्मती स्पर्शवती तथा रसवती परा ।
गन्धवत्यपरा प्रोक्ता चतस्रस्तु प्रवृत्तयः ।। इत्युक्तम् ।

तच्च शब्दप्रवृत्तेरायूपलक्षणमिति यद्यपि विषयवती प्रवृत्तिः कैवल्यं प्रति नोपयुज्यते तथापि शास्त्रादिप्रतिपादितार्थेषु दृढविश्वासार्थमुपादेया ।

तथा च योगभाष्ये—

यद्यपि तत्तच्छास्त्रानुमानाचार्योपदेशैरवगतमर्थतत्त्वं सद्भूतमेव भवति। एतेषां यथाभूतार्थप्रतिपादनसामर्थ्यात्। तथापि यावदेकदेशोऽपि कश्चिन्न स्वकरणसंवेद्यो भवति तावत्सर्वं परोक्षमिवापवर्गादिषु सूक्ष्मेष्वर्थेषु न दृढां बुद्धिमुत्पादयति। तस्माच्छास्त्रानुमानाचार्योपदेशोपोद्बलनार्थमेवावश्यं कश्चिद्विशेषः प्रत्यक्षीकर्त्तव्य इति।

स्मृतौ हृदयपुण्डरीकमाह—

अतिरम्यं हि भूतानां पञ्चछिद्रमधोमुखम्।
वितस्तिमात्रतो देशे नाभेरुर्ध्वमवस्थितम्॥
यथैवाष्टदलं पद्मं सुरक्तं मुकुलीकृतम्।
एवं हृदयपद्मन्तु लभ्यते हृदयस्थले॥
सोमाग्निरविनक्षत्रविद्युद्वत्तेजसा युतम्।
भाति विश्वस्य कृत्स्नस्य ह्याश्रयो योगिनां सदा॥ इति।

तथा च योगतत्त्वे—

हृदि स्थाने स्थितं पद्मं तस्य वक्त्रमधोमुखम्।
उर्ध्वनालमधो बिन्दुस्तस्य मध्ये स्थितं मनः॥
अकारे रेचितं पद्ममुकारेणैव भिद्यते।
मकारे लभ्यते नादमर्धमात्रा तु निश्चला॥ इति।
अष्टपत्रन्तु हृत्पद्मं द्वात्रिंशत्केसरान्वितम्।
तस्य मध्ये स्थितो भानुर्भानुमध्यगतः शशी॥
शशिमध्यगतो वह्निर्वह्निमध्यगता प्रभा।
त्रिस्थानञ्च त्रिमात्रञ्च त्रिब्रह्म च त्रयाक्षरम्॥
त्रिमात्रमर्धमात्रं वा यस्तं वेद स योगवित्।

इति च ध्यानबिन्दौ। एतत्सर्वमभिप्रेत्याह वाचस्पत्यें—

उदरोरसोर्मध्ये पद्ममधोमुखं तिष्ठत्यष्टरेचकप्राणायामेण तदूर्ध्वमुखं कृत्वा तत्र चित्तन्धारयेत्। तन्मध्ये सूर्यमण्डलमकारो जागरितस्थानम्। तस्योपरि चन्द्रमण्डलमुकारः स्वप्नस्थानम्। तस्योपरि वह्निमण्डलं मकारः सुषुप्तिस्थानम्। यस्योपरि परं व्योमात्मकं ब्रह्मनादं तुरीयस्थानमर्धमात्रमुदाहरन्ति ब्रह्मवादिनः। तत्र कर्णिकायां (पद्मबीजकोशे) ऊर्ध्वमुखी सूर्यादिमण्डलमध्यगता ब्रह्मनाडी ततोऽप्युर्ध्वं प्रवृत्ता सुषुम्णा नाड़ी। तया खलु बाह्यान्यपि सूर्यादीनि मण्डलानि प्रोतानि। सा हि चित्तस्थानम्। तस्यां धारयतो योगिनश्चित्तसंविदुपजायत इति।

अथ वा स्वप्ने यां काञ्चिन्मनोहारिणीं हरिहरादिमूर्त्तिं पश्यन् प्रबुद्धस्तस्यां मनो धारयन् झटिति स्थितिपदं लभते । अथ वा वेदान्तशास्त्रश्रवणमननाभ्यां सुषुप्तमिवाखिलं जगत् पश्यन् चित्तं स्थितिपदं लभते । तथा च योगवार्त्तिककारः—

दीर्घस्वप्नमिमं विद्धि दीर्घं वा चित्तविभ्रमम् ।
चराचरं लय इव प्रसुप्तमिह पश्यताम् ॥ इति ।

मैत्र्यादिभावनाचतुष्टयमाह —

सुखशालिनि सौहार्दं दीने करुणाश्च पुण्यशीलेषु ।
प्रमदमुपेक्षां पापिनि चित्तं भावयतः प्रसीदति ॥

सुखसम्भोगापन्नेषु सर्वप्राणिषु मैत्रीम्भावयेत् । तथा सति—परमाभ्युदयासहनरूपेर्ष्याकालुष्यं स्नेहादनुभूयमानं सुखमनुशेते, सुखजातं सर्वं मे भूयादिति, राजसो बुद्धिवृत्तिविशेषो रागः । सोऽपि सर्वसुखासम्पत्त्या चित्तं विक्षिप्य कलुषीकरोतीति रागकालुष्यमपि चित्तस्य विनिवर्त्तते । तथा सति—तत्सुखादिकं स्वकीयमेव सम्पन्नं पुत्रादिराज्यवदिति यावत् । तथा दुःखितेषु करुणा नाम आत्मनीव परस्मिन् दुःखप्रहाणेच्छां भावयेत् । तथा सति परापकारचिकीर्षाकालुष्यं चित्तस्य । यश्च दुःखमनुशेते । सर्वदेदृशं दुःखं मे माभूदिति तमोऽनुगतो राजसो धीवृत्तिविशेषो द्वेषः । सोऽपि, सर्वे दुःखहेतवो न शक्यन्ते विहन्तुमिति सर्वदा हृदयं दहतीति द्वेषकालुष्यमपि विनिवर्त्तते । स्वस्येव परेषामपि दुःखहेतुभूतानां शत्रुव्याघ्रादीनां तदा प्रतिकूलं दुःखं मा भूदिति व्याघ्रादिद्वेषविनिवृत्तिरिति ।

तथा च स्मृतिः—

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः ॥ इति ।

तथा पुण्यशीलेषु प्राणिषु प्रमदं नाम तु मुदितां भावयेत् । तथा सति परगुणेषु दोषाविष्करणरूपा असूयाकालुष्यं निवर्त्तते चित्तस्य । अपुण्यशीलेषु प्राणिषु चोपेक्षां नाम माध्यस्थ्यं भावयेत् । तथा सति अमर्षकालुष्यं विनिवर्त्तते चित्तस्येत्येवं मैत्र्यादिभावनाचतुष्टयेन राजसतामसधर्मनिवृत्तौ चितस्य सात्त्विकः शुद्धो धर्म उपजायते । ततश्च चित्तं प्रसीदति ।

तथा चान्नपूर्णोपनिषदि—

मैत्र्यादिभिर्गुणैर्युक्तं भवत्युत्तमवासनम् ।
भूयो जन्मविनिर्मुक्तं जीवन्मुक्तश्च तन्मनः ॥ इति ।

प्रसन्नञ्च चित्तं धारणाद्युपायेभ्य एकाग्रं स्थितिपदं लभत इति। तदुक्तं भगवता [गीतायां]।

प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते। (२।६५।) इति।

तथा च भगवान् पतञ्जलिः—स्थितिपदञ्च चित्तस्य स्वायत्तमिति।

परमाणुपरममहत्त्वान्तो वशीकारादवगन्तव्यम्। परमाणुपरममहत्त्वान्तोऽस्य वशीकारः [यो० सू० १'४०।]। इति।

परमाणुर्नाम—

जालान्तर्गते भानौ सूक्ष्मं यद्दृश्यते राजः।
तस्य षष्टितमो भागः परमाणुः स उच्यते ॥ इति।

परममहत्त्वञ्च मूलप्रकृतेः प्रथमो विकार इति। ततश्च बहिरङ्गाङ्गाभ्यासापेक्षा विनिवर्त्तते ॥

तथा च योगभाष्ये—

तद्वशीकारात्परिपूर्णं योगिनश्चित्तं न पुनरभ्यासकृतं परिकर्मापेक्षत इति। वशीकारो नाम चित्तस्य परमाणुपरममहत्त्वान्तं निविशमानस्याप्रतिघात इति।

धारणादेशेभ्यः निवृत्तं चित्तं प्रयत्नेन तत्तद्देशे स्थापनीयम्। तथा च भगवान्—

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ इति।

तथा च माण्डूक्योपनिषत्कारिकायां गौडपादाचार्यैः—

उत्सेक उदधेर्यद्वत् कुशाग्रेणैकबिन्दुना।
मनसो निग्रहस्तद्वद् भवेदपरिखेदतः ॥ इति।

धारणायाः दुष्करता यथा भारते मोक्षपर्वणि—

विपन्ना धारणास्तावत् नयन्ति न शुभां गतिम्।
नेतृहीना यथा नावः पुरुषानर्णवे नृप ॥
यस्तु तिष्ठति कौन्तेय धारणासु यथाविधि।
मरणं जन्म दुःखञ्च सुखञ्च स विमुञ्चति ॥
स्वस्थेयं क्षुरधारासु निशितासु महीपते।
धारणासु च योगस्य दुःस्थेयमकृतात्मभिः ॥
स्नेहपूर्णे यथा पात्रे मनः आधाय निश्चलम्।
पुरुषो युक्त आरोहेत् सोपानं मुक्तमानसः ॥ इति।

इति धारणाप्रकरणम्।

अथ ध्यान प्रकरणम्

धारणासाध्यं ध्यानमाह—

तस्मिन् देशविशेषे सुचिरं ध्येयावलम्बनं ज्ञानम् ।
नैवावगाहतेऽन्यत् किञ्चित्तद्ध्यानमाख्यातम् ।।३१।।

तस्मिन्नित्यादि । देशविशेषे हृदयपुण्डरीकादौ ध्येयावलम्बनं चतुर्भजादिगोचरं ज्ञानं सुचिरं ध्यानं स्यात् षष्टिनाडीकमित्युपलक्षितसमयं यावत् किञ्चिदन्यद् ध्येयातिरिक्तं नावगाहते न विषयीकरोति तज्ज्ञानं, ध्यानमाख्यातम् । ज्ञानस्य ध्येयमात्रविषयकतैलधारावत् निरन्तरप्रवाहो ध्यानमित्यर्थः । तथा च पुराणम्—

तद्रूपप्रत्ययैकाग्र्य सन्ततिश्चान्यनिस्पृहा ।
तद् ध्यानं षड्भिरङ्गैस्तु प्रथमैर्निष्पाद्यते नृप ।। इति ।३१।

ध्यानस्य द्वैविध्यमाह—

सगुणत्वनिर्गुणत्वप्रविभेदात्तदुदीरितं द्विविधम् ।
आद्ये सकलं ध्येयं त्वन्यस्मिन् निष्कलं ब्रह्म ।। ३२ ।।

सगुणत्वेत्यादि । तद् ध्यानं सगुणत्वनिर्गुणत्वप्रविभेदाद् द्विविधमुदीरितम् । सगुणं निर्गुणञ्चेति द्विविधं ध्यानमित्यर्थः । तत्राद्ये सकलं मूर्तिमच्चतुर्भुजादिध्येयमपरस्मिन् निर्गुणे तु निष्कलं मूर्तिरहितं चैतन्यात्मकं नित्यं परमानन्दरूपं परमाकाशादिलक्षणं ब्रह्म ध्येयमिति यावदिति । केचित्तु समन्तकं सगर्भमिति अमन्तकं निगर्भमिति च ध्यानस्य द्वैविध्यमाहुरिति ।

सगुणध्यानस्य पञ्च भेदानाह याज्ञवल्क्यसंहितायाम् । तत्र विष्णुध्यानं यथा—

हृत्पद्मेऽष्टदलोपेते कन्दमध्यात् समुत्थिते ।
द्वादशाङ्गुलनालेऽस्मिंश्चतुरङ्गुलवन्मुखे ।।
प्राणायामैर्विकसिते केशरान्वितकर्णिके ।
वासुदेवं जगद्योनिं नारायणमजं विभुम् ।।
चतुर्भुजमुदाराङ्गं शङ्खचक्रगदाधरम् ।
किरीटकेयूरधरं पद्मपत्रनिभेक्षणम् ।।
श्रीवत्सवक्षसं श्रीशं पूर्णचन्द्रनिभाननम् ।
नीलोत्पलदलाभासं सुप्रसन्नं शुचि स्मितम् ।
शुद्धस्फटिकसंकाशं पीतवाससमच्युतम् ।।

पद्मस्थस्वपदद्वन्द्वं परमात्मानमव्ययम् ।
प्रभाभिर्भासयद्रूपं परितः पुरुषोत्तमम् ॥
मनसालोक्य देवेशं सर्वभूतहृदि स्थितम् ।
सोऽहमात्मेति विज्ञानं सगुणं ध्यानमुच्यते ॥ इति ।

वह्निध्यानं यथा—

हृत्सरोरुहमध्येऽस्मिन् प्रकृत्यात्मककर्णिके ।
अष्टैश्वर्यदलोपेते विकारमयकेशरे ॥
ज्ञाननाले बृहत्कन्दे प्राणायामप्रबोधिते ॥
विश्वार्चिचषं महावह्नि ज्वलन्तं विश्वतो मुखम् ।
वैश्वानरं जगद्योनिं शिखानां बीजमीश्वरम् ॥
तापयन्तं स्वकं देहमापादतलमस्तकम् ।
निर्वातदीपवत्तस्मिन् दीपितं हव्यवाहनम् ॥
दृष्ट्वा तस्य शिखामध्ये परमात्मानमक्षरम् ।
नीलतोयदमध्यस्थं विद्युल्लेखेव राजितम् ।
नीवारशूकवद्रूपं पीताभं सर्वकारणम् ॥
ज्ञात्वा वैश्वानरं देवं सोऽहमात्मेति या मतिः ।
सगुणेषूत्तमं ह्येतद् ध्यानं योगविदो विदुः ॥ इति ।

सूर्यध्यानं यथा--

अथ वा मण्डलं पश्येदादित्यस्य महात्मनः ।
आत्मानं सर्वजगतः पुरुषं हेमरूपिणम् ॥
हिरण्यश्मश्रुकेशं च हिरण्मयनखं हरिम् ।
पद्मासनं चतुर्वक्त्रं सृष्टिस्थित्यन्तकारिणम् ॥
पद्मासनस्थितं सौम्यं प्रबुद्धकमलासनम् ।
भासयन्तं जगत्सर्वं दृष्ट्वा लोकैकसाक्षिणम् ॥
सोऽहमात्मेति या बुद्धिः सा च ध्यानेषु शस्यते ॥ इति ।

अन्तरात्मध्यानं यथा—

भ्रुवोर्मध्येऽन्तरात्मानं भारूपं सर्वकारणम् ।
स्थाणुवन्मूर्ध्नि पर्यन्तं देहमध्यात्समुत्थितम् ॥
जगत्कारणमव्यक्तं ज्वलन्तममितौजसम् ।
मनसालोक्य सोऽहं स्यामित्येतद् ध्यानमुत्तमम् ॥ इति ।

भोक्तृपुरुषध्यानं यथा—

उन्निद्रहृदयाम्भोजे सोममण्डलमध्यमे ।
स्वात्मानं मण्डलाकारं भोक्तृरूपिणमक्षरम् ॥
सुधारश्मिविमुञ्चद्भिः शशिरश्मिभिरावृतम् ।
सहस्रच्छदसंयुक्ताच्छिरःपद्मादधोमुखात् ॥
निर्गतामृतधाराभिः सहस्राभिः समन्ततः ।
प्लावितं पुरुषं तत्र चिन्तयेत्तु समाहितः ॥
तेनामृतरसेनैव साङ्गोपाङ्गकलेवरम् ॥
अहमेव परं ब्रह्म सच्चिदानन्दलक्षणम् ।
एवं ध्यानामृतं कुर्वन् षण्मासान्मृत्युजिद् भवेत् ॥
वत्सरान्मुक्त एव स्याज्जीवन्नपि न संशयः ॥ इति ।

निर्गुणध्यानं यथा तत्रैव

एकं ज्योतिर्मयं शुद्धं सर्वगं व्योमवद् दृढम् ॥
अनन्तमचलं नित्यमादिमध्यान्तवर्जितम् ।
स्थूलं सूक्ष्ममनाकाशमसवर्णमचाक्षुषम् ॥
न रसं न च गन्धाख्यमप्रमेयमनामयम् ॥
आनन्दमजरं नित्यं सदसत्सर्वकारणम् ।
सर्वाधारं जगद्रूपममूर्त्तमजमव्ययम् ॥
अदृश्यं दृश्यमन्तःस्थं बहिस्थं सर्वतोमुखम् ।
सर्वदृक् सर्वतः पादं सर्वस्पृक् सर्वतः करम् ॥
ब्रह्म ब्रह्ममयोऽहं स्यामिति यद्वेदनं भवेत् ।
तदेतन्निर्गुणध्यानं ब्रह्म ब्रह्मविदो विदुः ॥ इति ।
अन्यान्यपि बहून्याहुर्ध्यानानि मुनिपुगङ्वाः ।
मुख्यान्येतानि चैतेभ्यो जघन्यानीतराणि तु ॥

वस्तुतस्तु निर्दिष्टाध्यात्मादि तत्तद्देशान्यतमाधारे यथागमं यत्किञ्चिदिष्ट-देवताध्यानं प्रशस्तमेव । यथाभिमतध्यानाद्वेति [यो०सू० १।३९] पातञ्जलसूत्रस्वरसात् तत्रापि चित्ते प्रथमाभ्यासे ध्येयदेवताया यदेवाङ्गं प्रत्यङ्गं भूषणायुधेषु प्रथमं लग्नं भवेत्तदेव भावयन् चित्तं लयं नयेत् । तदुक्तम्—

यदेव लग्नं स्याच्चित्ते त्वङ्गं प्रत्यङ्गमेव वा ।
भूषणं चायुधं चापि तत्र चित्तं लयं नयेत् ॥ इति ।

निर्गुणध्यानेऽपि ध्येयविकल्पं लययोगनिरूपणे प्रदर्शितम्। तत्रापि हृदयस्थ-दहरपुण्डरीके चिदाकाशध्यानमतीव शस्यते। तथा च मुण्डकश्रुतिः—

ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः परायतमसः परस्तात्।

यः सर्वज्ञः स सर्वविद्यस्यैष महिमा भुवि।
दिव्ये ब्रह्मपुरे ह्येष व्योम्नि आत्मा प्रतिष्ठितः॥ इति।
हिरण्मये परे कोशे विरजं ब्रह्मनिष्कलम्।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद् यदात्मविदो विदुः।, इति।

तथा च छान्दोग्यश्रुतिः—अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वा विजिज्ञासितव्यमिति। तथा च महोपनिषदि—

सन्त्यज्य हृद्गुहेशानं देवमन्यं प्रयान्ति ये।
ते रत्नमभिवाञ्छन्ति त्यक्तहस्तस्थकौस्तुभाः॥ इति।

दहरपुण्डरीके चिदाकाशध्यानमपि सगुणब्रह्मोपासनेनैव निर्णीतं शारीरके निरुक्तनिर्गुणब्रह्मध्यानरूपनिर्गुणब्रह्मोपानसान्तःबुद्धिगुहायामेव। छान्दोग्यश्रुतौ ध्यानस्यैवोपास्यत्वेन नारदं प्रति सनत्कुमारस्योपदेशस्तथा हि ध्यानं वावचित्ताद् भूयो ध्यायतीव पृथिवी ध्यायतीवान्तरीक्षं ध्यायतीव द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्वताः ध्यायन्तीव देवमनुष्यास्तस्माद् यदाह मनुष्याणां महतां प्राप्नुवन्ति ध्यानपादाङ्कुशा इहैव ते भवन्त्यथ ये अन्धाः कलहिनः पिशुना उपवादिनस्तेऽथ ये प्रभवो ध्यानपादाङ्कुशा इहैव ते भवन्ति ध्यानमुपास्स्वेति येऽन्धा इत्यस्य ध्यानरहिताः शूद्रा इत्यर्थः।

ध्यानमेवात्मसाक्षात्कारकारणमिति चाम्नायते मण्डूकश्रुत्या। तथा हि—

न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा।
ज्ञानप्रसादेन विशुद्धसत्त्व—
स्ततस्तु तं पश्यति निष्कलं ध्यायमानः॥ इति।

स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्।
ध्याननिर्मन्थनाभ्यासाद् देवं पश्येन्निगूढवत्॥ इति।

यदि शैलसमं पापं विस्तीर्णं योजनान् बहून्।
भिद्यते ध्यानयोगेन नान्यभेदः कथञ्चन॥ इति

ध्यानबिन्दुश्रुतिः ।

ध्यानाभ्यासेन च विक्षेपकारणे रजस्तमसी चाभिभूय सत्त्वं विवर्द्धते, समाधिश्चाभिमुखो भवति । तथा च विवेकचूडामणौ—

यथा सुवर्णं पुटपाकशोधितं ।
त्यक्त्वा मलं स्वात्मगुणं समृच्छति ॥
तथा मनः सत्वरजस्तमोमलं ।
ध्यानेन संत्यज्य समेति तत्त्वम् ॥ इति ।

ध्यानस्य दुष्करत्वमाम्नातं तेजोबिन्दूपनिषदि—

दुःसाध्यञ्च दुराराध्यं दुष्प्रेक्ष्यं च दुराश्रयम् ।
दुर्लक्ष्यं दुस्तरं ध्यानं मुनीनाञ्च मनीषिणाम् ॥ इति ।

इति ध्यानप्रकरणम्

अथ ध्यानसाध्यं समाधिं लक्षयति—

आलम्बनस्वभावावेशाद् ध्यानं यदात्मरूपेण ।
उपरतमिवार्थमात्राभासञ्चेदन्त्यमङ्गं तत् ॥३३॥

आलम्बनेत्यादि । ध्यानं यदा चिरकालाभ्यासेन आलम्बनस्वभावावेशात् ध्येयाकारस्यैव निर्भासाद्धेतोरात्मरूपेण प्रत्ययात्मकस्वरूपेण उपरतमिव शून्यमिव न तु वस्तुतः शून्यमित्यर्थः । अर्थमात्राभासञ्चेत् ध्येयाकारतया निर्भासते तदन्त्यमङ्गं समाधिरिति यावत् । तथा च पुराणम्—

तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥ इति ।
सरित्पतौ निविष्टाम्बु यथाभिन्नं लयन्त्वियात् ।
तथाभिन्नं मनस्तत्र समाधिं सममाप्नुयात् ॥ इति
च योगियाज्ञवल्क्यः ।

सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते ।
ध्यानस्य विस्मृतिः सम्यक् समाधिरभिधीयते ॥ इति
च त्रिशिखिब्राह्मणे ।

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक् समाधिरभिधीयते ॥ इति
च तेजोबिन्दूपनिषदि ।

ध्यातृध्याने परित्यज्य क्रमाद् ध्येयैकगोचरम् ।
निवातदीपवच्चित्तं समाधिरभिधीयते ।। इति

चाध्यात्मोपनिषदि ।

समाधिप्रशंसा यथा मैत्रायणीब्राह्मणे—

समाधिनिर्धूतमलस्य चेतसो
निवेशितस्यात्मनि यत्सुखं लभेत् ।
स शक्यते वर्तयितुं गिरा तदा
स्वयं तदन्तःकरणेन गृह्यते ।।
अपामपोऽग्निमग्नौ वा व्योम्नि व्योम न लक्षयेत् ।
एवमन्तर्गतं चित्तं पुरुषः प्रतिमुच्यते ।' इति । ३३ ।

चित्तवृत्तिनिरोधे द्वितीयं कारणं वैराग्यं निरूपयति—

परमपरञ्च द्विविधं वैराग्यं तत्र भिद्यते त्वपरम् ।
संज्ञाभिश्च चतुर्धा गीताभिः शास्त्रतत्त्वज्ञैः ।। ३४ ।।

परमित्यादि । वैराग्यं विषयवैतृष्ण्यं परमपरञ्चेति द्विविधम् । तत्रापरं वैराग्यन्तु शास्त्रतत्त्वज्ञैर्गीताभिश्चतुर्धा भिद्यते इति ।। ३४ ।।

यतमानसंज्ञा, व्यतिरेकसंज्ञा, एकेन्द्रियसंज्ञा, वशीकारसंज्ञा चेति चतस्रः संज्ञा अपरवैराग्यस्य । तत्र यतमानसंज्ञामाह—

विषयेषु मा प्रवृत्तिः करणानामिति विधूनने यत्नः ।
चित्तमलानां तदिदं यतमानाभिधमिष्यते किल ।। ३५ ।।

विषयेष्वित्यादि । करणानामिन्द्रियाणां विषयेषु रूपादिषु प्रवृत्तिर्माभूदित्यालोच्य चित्तमलानां रागादीनां विधूनने यत्नः चित्तमलप्रक्षालनाय मैत्र्यादिभावनारम्भस्तदिदं यतमानाभिधं वैराग्यमिष्यते किल । चित्तवर्तिनो रागादय एव यथास्वमिन्द्रियाणां विषयेषु प्रवर्त्तयन्तीति यावदिति ।३५।

व्यतिरेकसंज्ञामाह—

यत्ने निर्धूतानां व्यतिरेकेणावधारणं तेषु ।
व्यतिरेकसंज्ञकं तद्वैराग्यं [च] परमर्षिसम्मतम् ।। ३६ ।।

यत्न इत्यादि । यत्नारम्भे सति तेभ्यः पक्ष्यमाणरागादिचित्तमलेभ्यः निर्धूतानां प्रक्षालितानां व्यतिरेकेणावधारणम्, तत्परमर्षिसम्मतं व्यतिरेकसंज्ञकं वैराग्यमिति ।।३६।।

एकेन्द्रियसंज्ञामाह—

विषयेषु चेन्द्रियाणां चित्तकषायाः प्रवर्त्तनाहीना ।
एकेन्द्रियसंज्ञा स्यात् स्पृहयन्तो मनसि स्थिता यदि ॥ ३७ ॥

विषयेष्वित्यादि । चित्तकषाया रागादयः पक्वा इति यावत् । इन्द्रियाणां यथास्वं विषयेषु प्रवर्त्तनाहीना मनसि स्पृहयन्तः औत्सुक्यमात्रेण यदि स्थिता तदा चैकेन्द्रियसंज्ञा स्यादिति ॥ ३७ ॥

वशीकारसंज्ञामाह—

समुपस्थितेऽपि विषये दोषपरिज्ञावितृष्णचित्तस्य ।
दृष्टे चानुश्रविके भवत्युपेक्षा वशीकारः ॥ ३८ ॥

समुपस्थित इत्यादि । दृष्टे स्त्र्यन्नपानाधिपत्याद्यैहिके, आनुश्रविके अनुश्रवो वेदस्तदधिगतस्वर्गादौ दिव्ये च विषये समुपस्थितेऽपि एतेनासम्प्रयोगे वैतृष्ण्यमात्रेण वैराग्यत्वनिरासः । दोषस्य परिज्ञा तया वितृष्णचित्तस्य दोषपरिज्ञया विवेकेन वितृष्णचित्तस्य या उपेक्षा हेयोपादेयशून्या रागद्वेषरहिता अभोगात्मिका बुद्धिः सोऽस्य वशीकारः वशीकारसंज्ञावैराग्यमित्यर्थं इति ।

तथा च नारदपरिव्राजकोपनिषदि—

संसारदोषदृष्ट्यैव विरक्तिर्जायते सदा ।
विरक्तस्य च संसारात्संन्यासः स्यान्न संशयः ॥ इति ।

तथा च भर्तृहरिः गङ्गातरङ्गेत्यादि । द्वितीयस्कन्दे श्रीमद्भागवते सत्यां क्षिताविति । श्रीमच्छङ्कराचार्यः—सर्पाः पिबन्ति इति ।

स्त्रीदोषो यथा याज्ञवल्क्योपनिषदि—

मांसपाञ्चालिकायास्तु यन्त्रलोकेऽङ्गपञ्जरे ।
स्नाय्वस्थिग्रन्थिशालिन्यः स्त्रियः किमिव शोभनम् ॥
त्वङ्मांसरक्तवाष्पासु पृथक् कृत्वा विलोचने ।
समालोकय रम्यञ्चेत् किं मुधा परिमुह्यसि ॥
मेरुश्रृङ्गतटोल्लासिगङ्गाजलरयोपमा ।
दृष्टा यस्मिन् मुने मुक्ताहारस्योल्लासशालिता ॥
श्मशानेषु दिगन्तेषु स एव ललनास्तनः ।
श्वभिरास्वाद्यते काले लघुपिण्ड इवान्धसः ॥
केशकज्जलधारिण्यो दुःस्पर्शा लोचनप्रियाः ।

दुष्कृताग्निशिखा नार्य्यो दहन्ति तृणवन्नरम् ॥
ज्वलना अतिदूरेऽपि सरसा अपि नीरसा।
स्त्रियो हि नरकाग्नीनामिन्धनं चारुदारुणम् ॥
कामनाम्ना किरातेन विकीर्णा मुग्धचेतसः।
नार्यो नरविहङ्गानामङ्गबन्धनवागुराः ॥
जन्मपल्वलमत्स्यानां चित्तकर्द्दमवारिणाम्।
पुंसां दुर्वासनारज्जुर्नारी वडिशपिण्डिका ॥
सर्वेषां दोषरत्नानां स्वसमुद्रिकयानया।
दुःखश्रृङ्खलया नित्यमलमस्तु मम स्त्रिया ॥
यस्य स्त्री तस्य भोगेच्छा निस्त्रीकस्य क्व भोगभूः।
स्त्रियं त्यक्त्वा जगत् त्यक्तं जगत् त्यक्त्वा सुखी भवेत ॥ इति।

तथा च नारदपरिव्राजके—

स्त्रीणामवाच्यदेशस्य क्लिन्ननाडीव्रणस्य च।
अभेदेऽपि मनोभेदाज्जनः प्रायेण वञ्च्यते ॥
चर्मखण्डन्द्विधा भिन्नमपानोद्गारधूपितम्।
ये रमन्ति नमस्तेभ्यः साहसं किमतः परम् ॥ इति।
त्वङ्मांसरुधिरस्नायुमज्जामेदोऽस्थिसंहतौ।
विण्मूत्रपूये रमतां क्रिमीणां कियदन्तरम् ॥ इति।

देहदोषो यथा तत्रैव—

अस्थिस्थूलं स्नायुबद्धं मांसशोणितलेपितम्।
चर्मावबद्धं दुर्गन्धिपूर्णं मूत्रपुरीषयोः ॥
जराशोकसमाविष्टं रोगायतनमातुरम्।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥
मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ।
देहे चेत्प्रीतिमान् मूढो भविता नरकेऽपि सः ॥
सा कालपूयपदवी सा महावीचिवागुरा।
साऽसिपत्रवलश्रेणी या देहेऽहमिति स्थितिः ॥ इति।

अपत्यदोषो यथा याज्ञवल्क्योपनिषदि—

अलभ्यमानस्तनयः पितरौ क्लेशयेच्चिरम्।
लब्धो हि गर्भपातेन प्रसवेन च बाधते ॥

जातस्य ग्रहरोगादि कुमारस्य च धूर्तता ।
उपनीतेऽप्यविद्यत्वमनुद्वाहश्च पण्डिते ।।
यूनश्च परदारादि दारिद्र्यञ्च कुटुम्बिनः ।
पूतदोषस्य नाद्यन्तो धनी चेन्म्रियते तदा ।। इति ।

अर्थदोषो यथा—

अर्थानामर्ज्जने क्लेशस्तथैव परिपालने ।
नष्टे दुःखं व्यये दुःखं धिगर्थान् क्लेशकारिणः ।। इति ।

गृहदोषमाह यदुनृपतिं प्रति दत्तात्रेयः—

गृहारम्भो हि दुःखाय न सुखाय कदाचन ।
सर्पः परकृतं वेश्म प्रविश्य सुखमश्नुते ।। इति ।

शरीरशैशवाद्यवस्थादोषो यथा महोपनिषदि—

नास्ति देहसमः शोच्यो नीचो गुणविवर्ज्जितः ।
कलेवरमहङ्कारगृहस्थस्य महागृहम् ।।
न च लभ्येत वा स्थैर्यं किमनेन गुरो मम ।
पङ्क्तिबद्धेन्द्रियपशुं वलात्तृष्णा गृहाङ्गणम् ।।
चित्तभृत्यजनाकीर्णं नेष्टं देहगृहं मम ।
जिह्वामर्कटिकाक्रान्तवदनद्वारभीषणम् ।।
दृष्टदन्तास्थिशकलं नेष्टं देहगृहं मम ।
रक्तमांसमयस्यास्य सबाह्याभ्यन्तरे मुने ।।
नाशैकधर्मिणो ब्रूहि कैव कायस्य रम्यता ।
तडित्सु शरदभ्रेषु गन्धर्वनगरेषु च ।।
स्थैर्यं येन विनिर्णीतं स विश्वसितु विग्रहे ।
शैशवे गुरुतो भीतिर्मातृतः पितृतस्तथा ।।
जनतो ज्येष्ठबालाच्च शैशवं भयमन्दिरम् ।
स्वचित्तबिलसंस्थेन नानाविभ्रमकारिणा ।।
बलात् कामपिशाचेन विवशः परिभूयते ।
दासाः पुत्राः स्त्रियश्चैव बान्धवाः सुहृदस्तथा ।।
हसन्त्युन्मत्तकमिवं नरं वार्द्धककम्पितम् ।
दैन्यदोषमयी दीर्घा वर्द्धते वार्द्धके स्पृहा ।।
सर्वापदामेकसखी हृदि दाहप्रदायिनी ।
क्वचिद् वा विद्यते चैषा संसारे सुखभावना ।।

आयुःस्तम्बमिवासाद्य कालस्तामपि कृन्तति ।
तृणं पांशुं महेन्द्रञ्च सुवर्णं मेरुसर्षपम् ॥
आत्मंभरितया सर्वमात्मसात्कर्तुमुद्यतः ।
कालोऽयं सर्वसंहारी तेनाक्रान्तं जगत्त्रयम् ॥ इति ।

विविधदोषो यथा स्मृत्यन्तरे —

परोत्कर्षासहिष्णुत्वे स्पर्द्धा चैव समैश्च तैः ।
क्षीणे पुण्ये विशन्त्येतं मर्त्यलोकञ्च मानवाः ॥
किं नामेदं वत सुखं येयं संसारसंसृतिः ।
जायते मृतये लोको म्रियते जननाय च ॥
चिन्तानिचयचक्राणि नानन्दाय धनानि मे ।
सम्प्रभूतकलत्राणि गृहाण्युग्रापदामिव ॥
पुत्रमित्रकलत्रादि तृष्णया नित्यकृष्टया ।
खगेष्विव किरात्येदं जालं लोकेषु रच्यते ॥ इति ।
आयुःपल्लवकोणाग्रलम्बाम्बुकलभङ्गुरम् ।
उन्मत्त इव सन्त्यज्य याम्यकाण्डे शरीरकम् ॥
विषयाशीविषासङ्गपरिजर्जरचेतसाम् ।
अप्रौढात्मविवेकानामायुरायासकारणम् ॥
युज्यते वेष्टनं वायोराकाशस्य च खण्डनम् ।
ग्रथनञ्च तरङ्गानामास्थानायुषि युज्यते ॥
प्राप्यं सम्प्राप्यते येन भूयो येन न शोच्यते ।
पराया निर्वृत्तेः स्थानं यत्तज्जीवितमुच्यते ॥
तरवोऽपि हि जीवन्ति जीवन्ति मृगपक्षिणः ।
स जीवति मनो यस्य मननेनोपजीवति ॥
जातास्त एव जगति जन्तवः साधुजीविताः ।
ये पुनर्नेह जायन्ते शेषा जरठगर्दभाः ॥
भारो विवेकिनः शास्त्रं भारो ज्ञानं च रागिणः ।
अशान्तस्य मनो भारो भारोऽनात्मविदो वपुः ॥
अहङ्कारवशादापदहङ्काराद्दुराधयः ।
अहङ्कारवशादीहा नाहङ्कारात्परो रिपुः ॥ इति च

महोपनिषदि ।

अधीत्य चतुरो वेदान् सर्वशास्त्राण्यनेकशः ।
ब्रह्मतत्त्वं न जानाति दर्वीपाकरसं यथा ॥
स्वदेहाशुचिगन्धेन न विरज्येत यः पुमान् ।
विरागकारणं तस्य किमन्यदुपदिश्यते ॥ इति

मुक्तिकोपनिषदि ।

यः स्तनः पूर्वंपीतस्तं निष्पीड्य मुदमश्नुते ।
यस्माज्जातो भगाद् पूर्वं तस्मिन्नेव भगे रमन् ॥
या माता सा पुनर्भार्या या भार्या मातरेव हि ।
यः पिता स पुनः पुत्रो यः पुत्रः स पुनः पिता ॥
एवं संसारचक्रेण कूपचक्रे घटा इव ।
भ्रमन्ते योनिजन्मानि ।..............

इत्यादि च योगतत्त्वे ।

आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद् विश्वकर्तारं को न मुच्येत बन्धनात् ॥ इति च

वराहोपनिषदि ।

सत्यां क्षितौ किं कशिपोः प्रयासै—
बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ।
सत्यञ्जलौ किं पुरुधान्नपात्र्या
दिग्वल्कलादौ सति किं दुकूलैः ॥

इति च श्रीमद्भागवते द्वितीयस्कन्धे ।

विविधदोषो यथा महोपनिषदि—

अज्ञानोपहतो बाल्ये यौवने वनिताहृतः ।
शेषे कलत्रचिन्तार्त्तः किं करोति नराधमः ॥
सतोऽसत्ता स्थिता मूर्ध्नि रम्याणां मूर्ध्न्यरम्यता ।
सुखानां मूर्ध्नि दुःखानि किमेकं संश्रयाम्यहम् ॥
येषां निमेषणोन्मेषौ जगतः प्रलयोदयौ ।
तादृशः पुरुषा यान्ति मादृशां गणनैव का ॥
संसार एव दुःखानां सीमान्त इति कथ्यते ॥
तन्मध्ये पतिते देहे सुखमासाद्यते कथम् ॥ इति ।

दिशोऽपि न हि दृश्यन्ते देशोऽप्यन्योपदेशकृत् ।
शैला अपि विशीर्यन्ते शीर्यन्ते तारका अपि ॥
शुष्यन्त्यपि समुद्राश्च ध्रुवोऽप्यध्रुवजीवनः ।
सिद्धा अपि विनश्यन्ति जीर्यन्ते दानवादयः ॥
परमेष्ठ्यप्यनिष्ठावान् हीयते हरिरप्यजः ।
भावोऽप्यभावमायाति जीर्यन्ते वै दिगीश्वराः ॥
ब्रह्मा विष्णुश्च रुद्रश्च सर्वा वा भूतजातयः ।
नाशमेवानुधावन्ति सलिलानीव वाडवम् ॥
आपदः क्षणमायान्ति क्षणमायान्ति सम्पदः ।
क्षणं जन्माथ मरणं सर्वं नश्वरमेव तत् ॥ इति च ।
विषं विषयवैषम्यं न विषं विषमुच्यते ।
जन्मान्तरघ्ना विषया एकजन्महरं विषम् ॥ इति । ३८ ।

परवैराग्यमाह—

तदनु च पुरुषख्यातेर्गुणवैतृष्ण्यं परन्तदेवैतत् ।
ज्ञानप्रसादमात्रं कैवल्यं यदविनाभावि ॥ ३९ ॥

तदनु चेत्यादि । तदन्वित्यनेन परवैराग्यस्यापरवैराग्यसाध्यत्वं दर्शितम् । अपरवैराग्यकुशलस्य दृष्टानुश्रविकविषयदोषदर्शिनस्तत्प्रभवतः पुरुषख्यातेः पुरुषस्यागमादिसमधिगतस्य ख्यातेः समाधौ दर्शनाभ्यासेन सत्वैकतानतया पुरुषश्शुद्धोऽनन्तस्तद्विपरीता गुणा इति विवेकस्तस्मात् यद्गुणवैतृष्ण्यं सत्वपुरुषान्यताख्यातावपि व्यक्ताव्यक्तधर्मकेभ्यो गुणेभ्यो विरतिः, तदेवैतत् परं वैराग्यमित्यर्थः । स्वरूपमाह—ज्ञानप्रसादमात्रमिति । ज्ञानस्यैव पराकाष्ठेत्यर्थः । यदविनाभावि यस्य परवैराग्यस्याविनाभावि नान्तरीयकं कैवल्यमित्यर्थ इति ।

यस्योदये सत्येवं मन्यते——

धन्योऽहं धन्योऽहं नित्यं स्वात्मानमञ्जसा वेद्मि ।
धन्योऽहं धन्योऽहं ब्रह्मानन्दो विभाति मे स्पष्टम् ॥
धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्ष्यते अद्य ।
धन्योऽहं धन्योऽहं स्वस्याज्ञानं पलायितं क्वापि ॥
धन्योऽहं धन्योऽहं कर्त्तव्यं मे न विद्यते किञ्चित् ।
धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वमद्य सम्पन्नम् ॥
धन्योऽहं धन्योऽहं

धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके ।
धन्योऽहं धन्योऽहं धन्यो धन्यः पुनः पुनर्धन्यः ।।

इत्यवधूतोपनिषदि ।

सम्प्राप्यैनं ऋषयो ज्ञानतृप्ताः
कृतात्मानो वीतरागाः प्रशान्ताः ।
ते सर्वगं सर्वतः प्राप्य धीराः ।
युक्तात्मानः सर्वमेवाविशन्ति ।। इति । ३९ ।

वैराग्यस्य फलमाह अध्यात्मोपनिषदि—

वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् ।
स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम् ।।
यद्युत्तरोत्तराभावः पूर्वरूपन्तु निष्फलम् ।
निवृत्तिः परमा तृप्तिरानन्देऽनुपमः स्वतः ।। इति ।

अथ निरोद्धव्या वृत्तयः कति का वेत्याकाक्षां पूरयन्नाह—

अथ वृत्तयस्तु पञ्च क्लिष्टाऽक्लिष्टाः सता निरोद्धव्याः ।
कर्माशयनिचयस्य क्षेत्रीभूताश्च ताः क्लिष्टाः ।।४०।।

अथेत्यादि । सता साधकेन निरोद्धव्या वृत्तयः पञ्च प्रमाणविपर्ययादिवक्ष्यमाणरूपा पञ्चैवेत्यर्थः । ताश्च पुनः क्लिष्टाऽक्लिष्टाः क्लिष्टाश्चाक्लिष्टाश्चेति द्विविधेत्यर्थः । तत्र कर्माशयनिचयस्य धर्माधर्मवासनासमूहस्य क्षेत्रीभूताः प्रसवभूमयः ताः प्रमाणादिवृत्तयः क्लिष्टाः । क्लिष्टं क्लेशस्तदस्त्यासामिति क्लिष्टाः । क्लेशा अस्मितादयो हेतवः प्रवृत्तिकारणं पुंसां वृत्तीनां ता वृत्त्यर्थं इति ।। ४० ।

अक्लिष्टा वृत्तीराह—

या वै विवेकविषया सत्त्वपुरुषयोः समाप्तकृत्यानाम् ।
अधिकारस्य गुणानामक्लिष्टास्ता विरोधिन्यः ।।४१।।

या इत्यादि । याः प्रमाणादिवृत्तयः सत्त्वपुरुषयोर्विवेकविषयाः विधूतरजस्तमसो बुद्धिसत्त्वस्य प्रशान्तवाहिनः प्रज्ञाप्रसादो विवेकस्तद्विषयाः सत्त्वपुरुषान्यताख्यातिविषया इत्यर्थः ।

अत एव कार्यारम्भणञ्च समाप्तकृत्यानां विवेकख्यातिपर्यवसानगुणानामधिकार इति सम्पादिताधिकाराणां गुणानामधिकारस्य विरोधिन्यस्ता अक्लिष्टा इत्यर्थः ।

तथा च साधनानुष्ठानेनाक्लिष्टा वृत्तीरुपादाय क्लिष्टा निरोद्धव्याः, अक्लिष्टाश्च परेण वैराग्येणेति यावत् । इत्थञ्च चित्तवृत्तिनिरोधे वृत्तिनिबन्धनाया वासनाया अनुत्पादाद् भवसंक्रमाभावोऽभिनिवर्तते ।

तदुक्तं योगभाष्ये— तथा जातीयकाः संस्कारा वृत्तिभिरेव क्रियन्ते। संस्कारैश्च वृत्तय इत्येवं वृत्तिसंस्कारचक्रमनिशमावर्त्तते। तदेवं भूतं चित्तमवसिताधिकारमात्मकल्पेन व्यवतिष्ठते प्रलयं वा गच्छतीति।

तथा चान्नपूर्णोपनिषदि—

यावद्विलीनं न मनो न तावद्वासनाक्षयः।
न क्षीणा वासना यावच्चित्तं तावन्न शाम्यति॥
यावन्न तत्त्वविज्ञानं तावच्चित्तशमः कुतः।
यावन्न चित्तोपशमो न तावत्तत्त्ववेदनम्॥
यावन्न वासनानाशस्तावत्तत्वागमः कुतः।
यावन्न तत्त्वसंप्राप्तिर्न तावद्वासनाक्षयः॥
तत्त्वज्ञानं मनो नाशो वासनाक्षय एव च।
मिथः कारणतां गत्वा दुःसाध्यानि स्थितान्यतः॥

इत्याद्याम्नाय

प्राणस्पन्दनिरोधाच्च यथेच्छसि तथा कुरु।

इत्याम्नातमिति।

मनो हि द्विविधं प्रोक्तं शुद्धश्चाशुद्धमेव च।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम्॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥
यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते।
तस्मान्निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा॥
निरस्तविषयासङ्गं संनिरुद्धं मनो हृदि।
यदा यात्युन्मनीभावं तदा तत्परमं पदम्॥
तावदेव निरोद्धव्यं यावद् हृदि क्षयं गतम्।
एतज्ज्ञानञ्च मोक्षञ्च अतोऽन्यो ग्रन्थविस्तरः॥

इति च ब्रह्मबिन्दूपनिषदि।

चित्तमेव हि संसारो रोगादिक्लेशदूषितम्।
तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते॥
मनसा भाव्यमानो हि देहतां याति देहकः।
देहवासनया मुक्तो देहधर्मैर्न लिप्यते॥

कल्पं क्षणीकरोत्यन्तः क्षणं नयति कल्पताम् ।
मनोविलाससंसार इति मे निश्चिता मतिः ॥ इति ।
भवभावनया मुक्तो मुक्तः परमया धिया ।
धारयात्मानमव्यग्रो ग्रस्तचित्तं चितः पदम् ॥
परं पौरुषमास्थाय नीत्वा चित्तमचित्तताम् ।
ध्यानतो हृदयाकाशे चिति चिच्चक्रधारया ॥
मनो मारय निःशङ्कं त्वां प्रबध्नन्ति नारयः ।
इति च महोपनिषदि ।

मृतचित्तलक्षणं यथान्नपूर्णोपनिषदि—

सुखदुःखदशाधीरं साम्यान्न प्रोद्धरन्ति यम् ।
निश्वासा इव शैलेन्द्रं चित्तं तस्य मृतं विदुः ॥
आपत्कार्पण्यमुत्साहो मदो मान्द्यं महोत्सवः ।
यं नयन्ति न वैरूप्यं तस्य नष्टं मनो विदुः ॥ इति । ४२ ।

पञ्चवृत्तीर्निरूपयिष्यन् प्रमाणं विभजते—

तासु प्रमाणविपर्ययविकल्पनिद्रास्मृतिस्वरूपासु ।
प्रत्यक्षमथानुमानं शब्दश्चेति प्रमाणानि ॥ ४३ ॥

अनधिगततत्वबोधः पौरुषेयो व्यवहारहेतुः प्रमा तत्करणं प्रमाणम् । यद्यपि यथार्थानुभवः प्रत्यक्षमेवेति चार्वाकाः । अनुमितिरपीति काणादबौद्धाः उपमितिरपीति नैयायिकैकदेशिनः । शब्दोऽपीति नैयायिकाः । अर्थापत्तिरपीति प्राभाकराः । अनुपलब्धिरपीति भाट्टवेदान्तिनो साम्भविकैतिह्यकावपीति पौराणिकाः । चेष्टापीति तान्त्रिका इति ।

तथापि प्रत्यक्षानुमितिशाब्देति त्रिविधप्रमितेरावश्यकतया तत्रैव चान्यासामपि प्रमितीनां यथायथमन्तर्भावेण च तेषाम्मतेऽस्वरसं सम्भाव्य त्रिविधमेव प्रमाणं पातञ्जला आमनन्तीत्यत उक्तं प्रत्यक्षमथेत्यादीति ॥४३॥

तत्र प्रत्यक्षप्रमाणमाह—

आद्यं बाह्ये वस्तुनि चित्तस्येन्द्रियनालयोपरागात् ।
तद्विषयार्थविशेषावधारणपरेष्यते वृत्तिः ॥ ४४ ॥

आद्यमित्यादि । इन्द्रियनालया इन्द्रियाणि नाला कुल्या इव चित्तवृत्तिसञ्चरणमार्गास्तया इन्द्रियद्वारेति यावत् । चित्तस्य बाह्ये वस्तुनि घटपटादौ उपरागात्सम्बन्धात् । या तद्विषया उपरक्तवस्तुविषया अनेन चानुव्यवसाये ज्ञानाकारस्य स्मृतेश्च

व्यावृत्तिः उपरक्तवस्तुविषयत्वाभावात् । अर्थविशेषावधारणपरा । अर्थस्य सामान्य-विशेषात्मनः विशेषावधारणं परं प्रधानं यस्याः प्रत्यक्षविषयतया भासमानमपि घटत्वादिसामान्यं घटादिव्यक्तिं प्रति विशेषणीभूतमिति यावत् । सेयं वृत्तिराद्यम् प्रत्यक्षप्रमाणमित्यर्थः । सकलप्रमाणमूलत्वादस्याद्यत्वमिति यावत् । विशेषावधारण-परेत्वनेन अनुमानागमविषयात्प्रत्यक्षविषयव्यवच्छेदः । यद्यप्येतेन चित्तवृत्तेरेव मुख्यं प्रमाणत्वं चक्षुरादीनान्तु द्वारत्वमेव । तथापि नेत्रादिगतकामलादिदोषेण पीतः शङ्ख इत्यादिप्रतीतिदर्शनाच्चित्तस्येन्द्रियसाहित्येनैव तत्तदर्थाकारपरिणामो न तु केवलस्येति तावन्मात्रेणैव करणत्वव्यवहार इति बोध्यम् ।

प्रमाणफलञ्च बोधो बुद्ध्यात्मकः प्रमाणभूता वृत्तिरपि बुद्ध्यात्मिकेति चितिचित्तयोश्चाभेदग्रहादिति पौरुषेयश्चित्तवृत्तिबोध इत्युपचर्यते । वस्तुतस्तु बुद्धावेव प्रमाख्यं फलं जायते ।

अयं भावः

बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् ।
अज्ञानञ्च धिया नश्यदाभासेन घटः स्फुरन् ॥ इत्यागमात्

इन्द्रियप्रणालिकया घटादिविषयदेशमागत्य बुद्धिरावरणरूपमज्ञानं विनाशयति । बुद्धिदर्पणप्रतिबिम्बितं चैतन्यञ्च घटादितत्तदर्थाकारतया परिणमते । तथा चेन्द्रिय-प्रणालिकया अर्थसन्निकर्षानन्तरं जायमानाया अयं घट इत्याकारा चित्तवृत्तिस्तस्या यो बोधस्तदर्थोपरक्तचित्तवृत्तिविषयको घटमहं जानामीत्याकारकप्रमाणभूतायाश्चित्त-वृत्तेः फलात्मकः । स च बौद्धोऽपि पुरुषस्य बुद्धौ प्रतिबिम्बितत्त्वेन तत्तादात्म्यापत्त्या बुद्धिधर्मारोपात् पौरुषेय इति बोध्यम् ।

तथा च श्रुतिः—

असङ्गोऽयं पुरुषो ध्यायतीव लेलायतीव । इति ।

स्मृतिरपि—

ज्ञानं नैवात्मनो धर्मो न गुणो वा कथञ्चन ।
ज्ञानस्वरूप एवात्मा नित्यः सर्वगतः शिवः ॥ इत्यादित्यपुराणेऽपि ।

स्मृत्यन्तरेऽपि—

तस्मिंश्चिद्दर्पणे स्फारे समस्ताः वस्तुदृष्टयः ।
इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः ॥ इति ।

आदित्यपुराणेऽपि—

नित्यः सर्वगतो ह्यात्मा बुद्धिसान्निध्यसत्तया ।
यथा यथा भवेद् बुद्धिरात्मा तद्वदिहेष्यते ॥ इति । ४३ ॥

आगमं प्रत्यनुमानस्योपजीव्यत्वादागमात् प्रागनुमानं निरूपयति—

अनुमेयस्य सपक्षेष्वनुवृत्तं विपक्षविनिवृत्तञ्च ।
लिङ्गं यत्तद्विषया धर्मपरावृत्तिरनुमानम् ।। ४४ ।।

अनुमेयस्येत्यादि । अनुमेयस्य जिज्ञासितधर्मवतः साध्यविशिष्टस्य पक्षस्येति यावत् । सपक्षेषु निश्चितसाध्यवत्त्वेष्वनुवृत्तं सम्बन्धवत् साध्यसमानाधिकरणाभावाप्रतियोगीति यावत्। अनेन च साध्यव्यापकीभूताभावप्रतियोगित्वरूपविरुद्धत्वम् । सपक्षविपक्षव्यावृत्तत्वरूपासाधारणधर्मत्वञ्च हेतोर्निराकृतम् । विपक्षविनिवृत्तञ्च विपक्षाः साध्याभाववन्तोऽपक्षा इति यावत् । तेभ्यो व्यावृत्तं तन्निरूपितवृत्तित्वाभाववदित्यर्थः । अनेन च सपक्षविपक्षवृत्तित्वरूपासाधारणानैकान्तिकत्वं निराकृतं हेतोः । यल्लिङ्गं लीनमर्थं गमयतीति लिङ्गं साधनम् । अनेन च व्याप्तिविशिष्टपक्षधर्मतां दर्शयन् हेतोः पक्षे हेत्वभावरूपां स्वरूपासिद्धतां निराकरोति ।

तद्विषया तत् लिङ्गं विषयः निबन्धनं यस्याः सा व्याप्तिज्ञानाधीनसत्ताकेत्यर्थः। षिञ् बन्धने इत्यस्माद् व्युत्पादितो विषयशब्दोऽत्र कारणपरः । धर्मपरा धर्मः सामान्यं तत्परा अवधारणविषयतयेति शेषः, सामान्यावधारणपरेत्यर्थः । अनेन च प्रत्यक्षविषयतो व्यवच्छेदः । तथा चानुमानं व्यक्तीनामानन्त्याद् दुर्ग्रहत्वेन सामान्यमेव गोचरयतीति यावत् । वृत्तिरन्तःकरणस्य व्यापारविशेषस्तदनुमानम् । उदाहरणं यथा योगभाष्ये—देशान्तरप्राप्तेर्गतिमच्चन्द्रतारकं चैत्रवदिति ।।४४।

शब्दप्रमाणमाह—

दृष्टार्थस्य परत्रानुमितार्थस्य च संविदे प्रयुक्तात् ।
शब्दात्तदर्थविषया वृत्तिः स्यादागमश्श्रोतुः ।। ४५ ।।

दृष्टार्थस्येत्यादि । दृष्टार्थस्य ज्योतिष्टोमादेरनुमितार्थस्य चाष्टकादिरूपार्थस्य परत्र संविदे सुबोधसङ्क्रान्तये इत्यर्थः । प्रयुक्तादुपदिष्टात् आप्तेनेति शेषः । करणपटुस्तत्त्वदर्शी कारुण्यवांश्चाप्तः स खलु हितप्राप्तयेऽहितपरिहाराय च श्रोतुः तत्तदर्थानुपायतयोपदिशतीति शब्दात् स्वर्गकामो यजेत इत्यादिश्रुतिरूपात् मन्वाद्युपदिष्टस्मृतिरूपाच्च श्रोतुर्या तत्तदर्थविषयावृत्तिः स आगमः शब्दप्रमाणमित्यर्थः । यश्चादृष्टाननुमितार्थवादी सोऽश्रद्धेयऽवक्ता तस्यागमोऽप्रमाणम् । यथा चैत्यं वन्देत् स्वर्गकाम इति । ४५ ।

इति प्रमाणनिरूपणम् ।

विपर्ययाख्यां वृत्तिं लक्षयति—

तद्रूपेण प्रतिष्ठेत्ययथार्थानुभवो विपर्ययः।
नोऽनुपजातविरोधी बाधितुमीष्टे प्रमाणं सः ॥ ४७ ॥

तद्रूपेणेत्यादि । तद्धर्माभाववति तद्धर्मप्रकारकज्ञानमयथार्थानुभवः स विपर्ययः । विपर्ययस्तदाख्या वृत्तिरिति यावत् । अयथार्थानुभवस्य तत्त्वे हेतुमाह—तद्रूपेण प्रतिष्ठेति । तद्रूपेण ज्ञानप्रतिभासिरूपेण मिथ्याज्ञानस्य न प्रतिष्ठा नाम । यत्प्रकारकं यद्विशेष्यकं रूपं ज्ञाने न प्रतिभासते तस्मिन् रूपे यज्ज्ञानं न प्रतिष्ठते किन्तूत्तर-कालिकज्ञानेन बाध्यत इति यावदिति हेतोस्तज्ज्ञानं विपर्यय इत्यर्थः । अतद्रूपप्रतिष्ठ-मेककोटिकं द्विकोटिकं वा ज्ञानं विपर्यय इति एकधर्मिकविरुद्धकोटिद्वयावगाहि संशयोऽपि अतद्रूपप्रतिष्ठत्वाद्विपर्ययत्वेन संगृहीत इति यावत् । ननु प्रमाणमेव विपर्ययेन कुतो न बाध्यत इत्यत आह—नोऽनुपजातेत्यादि । स विपर्यय अनुपजातविरोधी न उपजातो विरोधी यस्येत्येवंभूतः हेतुगर्भविशेषणमिदम् । यतस्तदानीं विपर्यय-वृत्त्युत्पत्तिकाले प्रमाणमजातमेव तदित्यर्थः । प्रमाणं बाधितुं नो इष्टे न समर्थ इत्यर्थः । उपजातविरोधिता हि बाधकताबीजमनुपजातविरोधिता च बाध्यत्वे इति कथमनुप-जातविरोधी प्रमाणबाध्यो विपर्ययः प्रमाणं बाधितुं शक्नुयात् । सति च प्रमाणे विपर्ययस्यानुत्पत्तिरेव प्रतिबन्धकस्य प्रमाणस्य सद्भावात् प्रमाणेन चाप्रमाणस्य बाधनम् । यथैकचन्द्रदर्शनेन द्विचन्द्रदर्शनस्येति ॥४७॥

विकल्पवृत्तिं लक्षयति—

शब्दज्ञानमहिम्नाऽसद्विषयो विषयत्वमेति यस्याम् ।
व्यपदेशादनुगम्या वृत्तिः सा स्याद्विकल्पाख्या ॥४८॥

शब्दज्ञानमहिम्नेत्यादि । शब्दज्ञानमहिम्ना शब्दज्ञानमाहात्म्येन असद्विषयोऽप्रसिद्धोऽपि वन्ध्यासुतादिः यस्यां वृत्तौ विषयत्वमेति प्रसिद्धविषयवदाभासते सा व्यपदेशाद् व्यवहारादनुगम्या प्रत्येतव्या विकल्पाख्या वृत्तिरिति । अस्याश्चासद्विषय मात्रार्थप्रतीतिपर्यवसायकः गोचरतया प्रमाणान्तर्भावो निराकृतः । शब्दज्ञानमाहात्म्ये निबन्धनेन च विपर्ययान्तर्भावोऽपि ।

अयम्भाव --यथा चैतन्यं पुरुषस्य स्वरूपमित्यत्र चैतन्यात्मकस्य पुरुषस्य चैतन्ये, यथा वा राहोः शिर इत्यादौ शिरसि राहोः क्वचिच्च भेदेऽप्यभेदारोपः। यथाऽनुत्पत्ति-धर्मा पुरुष इत्यत्र उत्पत्तिधर्मस्य पुरुषेऽसद्भावेनाप्रसिद्धप्रतियोगिकाभावस्य चाप्रसि-द्धावपि उत्पत्तिधर्माभावमात्रार्थं प्रतीतिपर्यवसायकः उत्पत्तिधर्माभाववतो विशेष्य-विशेषणभावात्मकः तत्तदारोपितार्थश्च बुद्धिपरिकल्पितत्वाद्बौद्ध इत्युच्यते । स च

राहोः शिर इत्यादौ षष्ठ्यादि विभक्तिप्रतिपादनरूपा व्यवहारात् प्रतीयते। तस्याश्च स्वत्वादिभेद संसर्गार्थेऽनुशासनात्। सा चैवंभूता वृत्तिर्विकल्पाख्येति यावदिति। ४८।

निद्रावृत्तिं लक्षयति—

अभिभूय सत्त्वरजसी करणान्यावृत्य यत्तमोवृद्धौ।
जनयति च वृत्त्यभावं निद्रा सा तन्मयी वृत्तिः॥ ४९॥

अभिभूयेत्यादि। वुद्धौ त्रिगुणात्मके बुद्धिसत्त्वे यदा यत् प्रवृद्धं तमः सत्त्वरजसी अभिभूय करणानि चक्षुरादीन्द्रियाणि आवृत्य आच्छाद्य च वृत्त्यभावं प्रमाणादिवृत्तीनामभावं जनयति तदा तन्मयी समस्तकरणावरकप्रवृद्धतमोमयी या वृत्तिः सा निद्रेति। तदानीञ्च बुद्धेर्विषयाकारपरिणामाभावात् प्रवृद्धतमोमयीं बुद्धिं मन्यमानः सुषुप्तः पुरुषोऽन्तःप्रज्ञ इत्युच्यते। ४९।

नन्वस्तु वृत्त्यभाव एव निद्रा निरुद्धकैवल्ययोरिवेति चेन्न। सुप्तोत्थितस्य सुखमहमस्वाप्समित्यादिस्मरणसद्भावात्।

अयम्भावः—निद्राया वृत्त्यभावात्मकत्वे वृत्त्यभावकारणानुभवे प्रवुद्धमात्रस्य प्रबोधकाले सुखस्वापादिविषयकस्मृतिर्न स्यात् तद्विषयकसंस्काराभावात् तत्तदर्थविषयकस्मृतिजनकसंस्कारे तत्तदर्थविषयकानुभवस्य कारणत्वात्। तस्माद् वृत्तिविशेष एव निद्रेति समाधौ सापि निरोद्धव्यैव। ४९।

स्मृतिं लक्षयति—

ग्राह्योपरक्तबोधप्रभवात् संस्कारतः सजातीया।
वृत्त्यन्तरविषयीकृतविषया वृत्तिः स्मृतिर्जाता॥ ५०।

ग्राह्येत्यादि। ग्राह्योपरक्तबोधप्रभवात् ग्राह्येण प्रमाणादिवृत्तिगृहीतविषयेण उपरक्तस्तत्तदर्थविशिष्टानाम् पूर्वानुभूतविषयगोचरो घटमहं जानामीत्येवमनुव्यवसायात्मक इति यावत्। बोधोऽनुभवस्तत्प्रभवात् संस्कारतः अनुव्यवसायात्मकज्ञानजनितत्वात्साजात्येन ग्राह्यग्रहणोभयात्मकात् संस्कारादित्यर्थः। जातोत्पन्ना सजातीया, संस्कारसजातीया, ग्राह्यग्रहणोभयात्मिकेत्यर्थः। स्मृतेः संस्कारसाजात्येन ग्राह्यग्रहणोभयात्मकत्वेऽपि ग्रहणाकारपरा बुद्धिरेव। स्मृतिस्तु ग्राह्याकारमात्रपरेत्यतः स्वरूपमाह—वृत्यन्तरविषयीकृतविषयेति। अप्रमाणादिभिरधिगतार्थविषयाः न तु प्रमाणादिवदनधिगतार्थबोधिकेत्यर्थः। एतेनास्याः पूर्वानुभवात् समानविषयत्वं न्यूनविषयत्वं वा न तु तदतिरिक्तविषयत्वमिति यावत्। या वृत्तिः सा स्मृतिरिति। सा चेयं पित्रादेरतीतस्याननुभूतचरदेशसम्बन्धदर्शनेन स्वप्ने भावितं स्मर्तव्या। जाग्रत्समये चाभावितस्मर्तव्येति द्विविधेति। सुखदुःखमोहात्मिका एताः सर्वा अपि वृत्तयः समाधौ निरोद्धव्या इति॥५०॥

क्लिष्टा वृत्तय इत्यत्र क्लिष्टा इत्यस्य क्लेशहेतुका इत्यर्थः । तत्र के क्लेशाः कति चेत्यत आह—

क्लेशाः पञ्चाविद्यास्मिता च रागस्तथा द्वेषः ।
अन्त्यश्चाभिनिवेशः प्राज्ञैर्ज्ञेया यथाशास्त्रम् ॥५१॥

क्लेशा इति । क्लिश्यन्त इति क्लेशा अविद्यादयः पञ्चैव क्लेशा यथाशास्त्रं ज्ञेया इत्यर्थः । तत्राविद्यानां विद्याविपरीतं ज्ञानान्तरं न च सा प्रमाणं प्रमाणाभावो वा, किन्तु अनित्ये नित्यख्यातिर्यथा अमृता दिवौकस इति । एवमशुचौ शुचिख्याति र्यथा कमनीयेयं कन्या इति । कायस्य स्थानादिदोषैर्यथा वीभत्सता तथा प्राग्-व्याख्याता । तथा अपुण्ये पुण्यप्रत्ययोऽनर्थे चार्थप्रत्ययो दुःखे सुखख्यातिरूपा । एवं भोगोपकरणेषु भोगाधिष्ठाने वा शरीरे पुरुषोपकरणे वा मनस्यनात्मनि चात्मख्याति-रूपा चेति । अस्मिता नाम—दृक्शक्तेः साक्षिणः पुरुषस्य दर्शनशक्त्या बुद्ध्यैक-स्वरूपापत्तिरूपा । सुखाभिज्ञस्य सुखानुस्मृतिपूर्विका तृष्णा राग इति । दुःखाभिज्ञस्य च तथा दुःखे तत्साधने वा जिघांसा द्वेष इति । पूर्वजन्मानुभूतमरणदुःखानुमापित-क्लेशस्वरसवाही । कुशलस्याकुशलस्य वा मरणत्रासोऽभिनिवेशः । तत्र स्मितादयः । प्रसुप्ततनुविच्छिन्नोदाराभिधाः चतुर्विधाः कल्पिताः । तत्र प्रसुप्तिर्नाम अदग्ध बीजानां पुनः प्ररोहो दग्धबीजानामप्ररोहश्च । प्रतिपक्षभावनयोपहतानां क्लेशानाम-ल्पता तनुत्वम् । भावनया विच्छिद्य विच्छिद्य पुनः समुदाचारो विच्छेदः विषये लब्ध-वृत्तिरुदार इति । अविद्या पञ्चपर्वा भवतीति वक्ष्यते । एते च पञ्च क्लेशाः परस्पर-साचिव्येन कर्मविपाकं सम्पादयन्ति । स्यन्दमाना पुनर्गुणाधिकारं द्रढयन्ति । अव्यक्त-महदहङ्कारपरम्परया कार्यकारणभावप्रवाहमुद्भावयन्ति । तेष्वपि चास्मितादीनां प्रसवभूमिरविद्यैव । विपर्ययज्ञानवासनारूपा सेयं दशति दन्दशूक इव छिनत्ति करवाल इवान्धयति नक्तमिवावेष्टयति रज्जुरिवेति सर्वविपत्तिजननी पुनरेषैवेति ॥५१॥

अविद्यादीनां क्लेशत्वं सम्पादयन्नाह—

जात्यायुर्भोगानां प्रभवं कर्माशयं नियतम् ।
जनयन्ति ते च हेया योगाङ्गाभ्यासतो नितराम् ॥५२॥

जात्यायुर्भोगानामिति । तेऽविद्यादयः क्लेशाः चो हेतौ यतः, जात्यायुर्भोगानां प्रभवं जनकं नियतं तत्तज्जात्यायुर्भोगाभिव्याप्तं कर्माशयम् आशेरतेऽस्मिन् पुरुषा इत्याशयः धर्माधर्मरूपः कर्मणामन्तःकरणवृत्तीनामाशयस्तं जनयन्ति, अतः क्लेशाः । अत एव च योगाङ्गाभ्यासतो नितरां हेया इति जातिर्जन्म आयुर्जीवनकालः भोगः

ह्लादपरितापफलज्ञा सुखदुःखात्मिका चित्तवृत्तिरिति। स च धर्माधर्मात्मकः कर्माशयः कामलोभमोहक्रोधप्रसवो दृष्टादृष्टानेकजन्मसु विपाकारम्भी भवति यदि च तीव्रवेगी स्यात्तदा इहैव। यथाह योगभाष्ये 'तीव्रसंवेगेन मन्त्रतपःसमाधिभिर्निर्वर्त्तितः ईश्वर-देवतामहर्षिमहानुभावानामाराधनाद्वा यः परिनिष्पन्नः स सद्यः परिभाव्यते पुण्यकर्माशय इति तथा तीव्रक्लेशेन भीतव्याधिकृपणेषु विश्वासोपगतेषु वा महानुभावेषु वा तप-स्विषु कृतः पुनः पुनरपकारः स चापि पापकर्माशयः सद्य एव परिभाव्यते यथा नन्दी-श्वरः कुमारो मनुष्यपरिणामं हित्वा देवत्वेन परिणतस्तथा नहुषोऽपि देवानामिन्द्रः स्वकं परिणामं हित्वा तिर्यक्त्वेन परिणत इति। तत्र नाराकाणां दृष्टजन्मवेदनीय क्षीणक्लेशानाञ्चादृष्टजन्मवेदनीयश्च कर्माशयो नास्तीति।

शारीरकं प्राग्व्याख्यातं तत्रावशिष्टाः कतिपये विषया अत्र निर्दिश्यन्ते। अथान्नमयप्राणमयेत्यादि कश्चिदद्वन्धमोक्षं प्रयातीत्यन्तं विलिख्य हृदयस्य मध्ये लोहितं मांसपिण्डमित्यादीति सुबालब्राह्मणस्य चतुर्थः खण्डः इत्यन्तं विलिखेत्। ततश्च मनुष्ययोनौ जीवः कथमुत्पद्यते तदुच्यते इत्यादि लिङ्गं शरीरं हृदयग्रन्थिरित्युच्यते। तत् यत्प्रकाशते चैतन्यं स क्षेत्रज्ञः प्रत्यगात्मा पुरुषो जीव इति चोच्यते इत्यन्तं विलिखेत्। हृदयस्य मध्ये लोहितं मांसपिण्डं यस्मिंस्तद्दहरं पुण्डरीकं कुमुदमिवानेकधा विकसितं हृदयस्य दश च्छिद्राणि भवन्ति येषु प्राणाः प्रतिष्ठिताः। स यदा प्राणेन सह संयुज्यते तदा पश्यति नद्यो नगराणि बहूनि विविधानि च स यदा व्यानेन सह संयुज्यते तदा पश्यति यक्षराक्षसगन्धर्वान्। यदोदानेन सह संयुज्यते तदा पश्यति देवलोकान् देवान् स्कन्दं जयन्तञ्चेति यदा समानेन सह संयुज्यते तदा पश्यति देव-लोकान् धनानि च यदा वैरम्भेण सह संयुज्यते दृष्टञ्च श्रुतञ्च मुक्तञ्चामुक्तञ्च सच्चा-सच्च सर्वं पश्यति अथेमा दश दश नाड्यो भवन्ति। तासामेकैकस्य द्वासप्ततिर्द्वासप्त-तिश्शाखा नाडीसहस्राणि भवन्ति यस्मिन्नयमात्मा स्वपिति शब्दानाञ्च करोत्यथ यदि द्वितीये संकोशे स्वपिति तदेमञ्च लोकं परञ्च लोकं पश्यति सर्वान्छब्दान् विजानाति स सम्प्रसाद इत्याचक्षते। प्राणः शरीरं परिरक्षति। हरितस्य नीलस्य पीतस्य लोहितस्य श्वेतस्य नाड्यो रुधिरस्य पूर्णाः। अथास्यैतद्दहरं पुण्डरीकं कुमुदमिवानेकधा विकसितं यथा केशः सहस्रधा भिन्नः तथा हि ता नाम नाड्यो भवन्ति। हृद्याकाशे परे कोशे दिव्योऽयमात्मा स्वपिति यत्र सुप्तो न कञ्चन कामं कामयते। न कञ्चन स्वप्नं पश्यति न तत्र देवा न देवलोका। यज्ञा नायज्ञा वा न माता न पिता न बन्धुर्न बान्धवो। न स्तेनो न ब्रह्महा। तेजस्कायममृतं सलिल एवेदम् सलिलं बलं भूयस्तेनैव मार्गेण जाग्राय धावति सम्राडिति होवाच। इति स्वबालब्राह्मणस्य चतुर्थः खण्डः।५१।

क्लेशानां हेयत्वं हानोपायश्चोक्त्वा हानेर्विशेषमाह—

सूक्ष्मीकृताश्च चेतसि लीना ध्यानेन चेतसा सार्धम् ।
परिदग्धबीजकल्पा ह्यस्तमितास्तेन वा प्ररोहेषु ।। ५२ ।।

सूक्ष्मीकृताश्चेति । ते अविद्यादयः क्लेशाः सूक्ष्मीकृताः योगाङ्गाभ्यासेन तनूकृताः चेतसि लीने सति वक्ष्यमाणासम्प्रज्ञातसमाधिना चित्तस्य स्वकारणे प्रलये सतीत्यर्थः । ध्यानेन प्रसङ्ख्याग्निना परिदग्धबीजकल्पाश्चेतसा सार्द्धमस्तमिता न वा प्ररोहेषुः । यथा दग्धबीजा अङ्कुराय न प्रभवन्ति तथा क्लेशा अपि जात्यायुर्भोगेभ्यो नेत्यर्थं इति ।। ५२ ।।

इति तृतीयं गुच्छकम् ।

अथ चतुर्थं गुच्छकम्

सम्प्रति मोक्षस्य नान्तरीयकविवेकख्यातिं वक्ष्यन् मधुमुखिकया शिशूनिवौषधे योगे प्रवृत्त्यर्थं कतिपयसिद्धीः प्रदर्शयितुमुपक्रमते—

परिभाषितस्तु संयम इह तद्विजयात् समाधिप्रज्ञायाः ।
आलोकश्चानन्तरभूमिषु विनियोग इष्यते तस्य ॥५३॥

पभिाषित इति । इह पातञ्जले योगशास्त्रे संयम इति परिभाषितस्तु लाघवार्थं महर्षिणा एकत्र धारणाध्यानसमाध्येतत्त्रितयस्य तान्त्रिकी संज्ञा कृतेत्यर्थः तद्विजयात् तस्य संयमस्य विजयात् समाधिप्रज्ञायाः आलोकः ज्ञानान्तररहितनिर्मल प्रवाहेऽवस्थानम् अनन्तरभूमिषु जितभूम्यपेक्षया व्यवहितोत्तरभूमिषु अवस्थाविशेषेषु विनियोगश्च इष्यते मत इति । तथा च योगभाष्ये भूमेरस्या इयमनन्तरा भूमिरित्यत्र योग एव उपाध्याय इति । तथा हि—

योगेन योगो ज्ञातव्यो योगो योगात् प्रवर्त्तते ।
योऽप्रमत्तस्तु योगेन स योगे रमते चिरम् ॥ इति ।

स्थूलविषये संयमसिद्धौ क्रमेण सूक्ष्मातिसूक्ष्मविषयेषु संयमः कार्यं इति भावः । अत एव—

ततः शङ्खगदाचक्रशार्ङ्गादिरहितं बुधः ।
चिन्तयेद् भगवद्रूपं प्रशान्तं साक्षसूत्रकम् ॥
यदा च धारणा तस्मिन्नवस्थानवती ततः ।
किरीटकेयूरमुखैर्भूषणै रहितं स्मरेत् ॥
तदेकावयवं देवं सोऽहञ्चेति पुनर्बुधः ।
कुर्यात्ततो ह्यहमिति प्रणिधानपरो भवेत् ॥

इति क्रमेण समाधिरवतारित इति । । ५३ ॥

जातिस्मरत्वं परचित्तज्ञानञ्चाह—

संस्कार संयमतस्त्वनुपश्यति पूर्वजन्मवृत्तान्तम् ।
परचित्तस्य च ज्ञानं परचित्ते संयमाल्लभते ॥५४॥

संस्कार इति । द्विविधः संस्कारः स्मृतिक्लेशजनको वासनारूपो जात्यायुर्भोगजनको धर्माधर्मरूपश्च उभावपि चित्तधर्मौ । तत्र संयमात् पूर्वजन्मवृत्तान्तमनु-

पश्यति साक्षात्करोति योगजप्रत्यक्षे देशकालादिनिमित्तानपेक्षणादिति भावः। एवं परसंस्कारे संयमात्परजातिसंवेदनमपीति बोध्यम्। तथा परचित्ते संयमात्परचित्तमात्रस्य ज्ञानं भवतीति। संस्कारसंयमस्तु सानुबन्धसंस्कारविषयः। अयन्तु परचित्तमात्रविषयको रागयुक्तं परप्रत्ययं जानाति न त्वस्मिन् विषये रक्तमिति विशिष्य-जानातीत्यभिप्राय इति ।५४।

कायस्य च रूपादावन्तर्धानादिसिद्धयस्तस्मात्।
द्विविधे कर्मणि मरणज्ञानं चारिष्टतोऽप्येवम् ।।५५।।

कायस्येति। कायस्य पञ्चभूतात्मकशरीरस्य रूपादौ चक्षुरादीन्द्रियग्राह्यविषयेषु रूपादिषु आदिपदेन रसगन्धस्पर्शशब्दाः बोद्धव्याः। तस्मात् संयमात् अन्तर्धानादिसिद्धयो भवन्ति। अयम्भावः, कायश्च रूपवत्तया चक्षुर्विषयो भवति तत्र रूपे यदा योगिना संयमविशेषः क्रियते तदा रूपस्य ग्राह्यशक्तिः रूपवत्कायप्रत्यक्षताहेतुः स्तम्भ्यते। तस्माद् ग्राह्यशक्तिस्तम्भेऽन्तर्द्धानम्भवति योगिनः। परकीयचक्षुर्ज्ञानाविषयत्वं योगिनः कायस्येति यावत्। एवं काये रसगन्धस्पर्शशब्दसंयमात्तद्ग्राह्यशक्तिस्तम्भे रसनाघ्राणत्वक्श्रोत्रप्रकाशासम्प्रयोगे रसाद्यन्तर्द्धानं भवति। तदा योगिनो रसादिकं न केनचित् साक्षात्क्रियत इति।

द्विविधे कर्मणीति। आयुर्विपाकं कर्म द्विविधं सोपक्रमं निरुपक्रमञ्चेति योगभाष्यम्। तत्रोपक्रमो व्यापारस्तत्सहितमाद्यम्। तद्रहितं मन्दव्यापारवदिति यावत् द्वितीयम्। अचिरेण चिरेण च भोगजनकमिति द्विविधं कर्म तस्मिन् संयमात्। एवमरिष्टतोऽपि च मरणज्ञानं भवतीति। तत्रारिवत्त्रासयतीत्यरिष्टम् मरणचिह्नम्। तत् त्रिविधम् आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकञ्चेति तत्राध्यात्मिकं यथा तर्जनीभ्यां श्रोत्रविवरे सन्निरुध्य स्वदेहाभ्यन्तरभवं ध्वनिं यदा न शृणोति तदा जनीयादुपस्थितं मे मरणमिति। तथा चारण्यकश्रुतिः—

अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे येनेदमन्नं पच्यते। यदिदं मन्यते तस्य घोषो भवति। यमेतत्कर्णावपिधाय शृणोति। स यदोत्क्रमन् भवति नैनं घोषं शृणोतीति। एवं नेत्रे निमीलिते नीरश्मिकं शुद्धमेवादित्यमण्डलं पश्यति अङ्गुल्यादिना भ्रामिते वा अन्तर्वह्निकणतुल्यं ज्योतिर्न पश्यति तदापि सन्निहितं मरणं जानीयात्। तथा चारण्यकश्रुतिः—

तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षणपुरुषस्तावेतावन्यस्मिन् प्रतिष्ठितौ। रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः प्राणैरय-

मनुष्मिन् । स यदोत्क्रमिष्यन् भवति शुद्धमेवैतन्मण्डलं पश्यति । नैनमेते रश्मयः प्रत्यायन्तीति ।

आधिभौतिकं यथा यमपुरुषान् पश्यति अकस्मादतीतान् पितॄन् पश्यति । तदापि स्वान्तं विजानीयात् । आधिदैविकं यथा स्वर्गं पश्यति अकस्मात् सिद्धान् वा पश्यति । सर्वं वा विपरीतं पश्यति । सर्वं वा प्रकृतिशरीरादिविपरीतं परिणमति तदापि सन्निहितं मरणं विजानीयादिति । तथा चागमः—

कृपणोऽपि वदान्यः स्याद् वदान्यः कृपणो यदि ।
प्रकृतेर्विकृतिश्चेत्स्यात्तदा पञ्चत्वमृच्छति ।। इति ।

एवमकस्मात्स्थूलः कृशः कृशः स्थूलश्चेद् भवति, तदापि सन्निहितं मरणं जानीयादिति ।

अरिष्टान्तराणि यथा त्रिशिखिब्राह्मणे—

अरिष्टैर्जीवितस्यापि जानीयात् क्षयमात्मनः ।
ज्ञात्वा यतेत कैवल्यप्राप्तये योगवित्तमः ।।
पादाङ्गुष्ठे कराङ्गुष्ठे स्फुरणं यस्य न श्रुतिः ।
तस्य संवत्सरादूर्ध्वं जीवितस्य क्षयो भवेत् ।।
मणिबन्धे तथा गुल्फे स्फुरणं यस्य नश्यति ।
षण्मासावधिरेतस्य जीवितस्य स्थितिर्भवेत् ।।
कूर्परे स्फुरणं यस्य तस्य त्रैमासिकी स्थितिः ।
कौक्षिमेहनपार्श्वे च स्फुरणानुपलम्भने ।।
मासावधिर्जीवितस्य तदर्द्धस्य तु दर्शने ।
आश्रिते जठरद्वारे दिनानि दश जीवितम् ।।
ज्योतिः खद्योतवद् यस्य तदर्द्धं तस्य जीवितम् ।
जिह्वाग्रादर्शने त्रीणि दिनानि स्थितिरात्मनः ।।
ज्वालाया दर्शने मृत्युर्द्विदिने भवति ध्रुवम् ।। इति ।

अन्यान्यपि चाशीर्षच्छायादिदर्शनाद्यरिष्टानि प्रतीकोपासकैर्विज्ञेयानि । यथा—

तद्रूपं कृष्णवर्णञ्च यः पश्यति व्योम्नि मण्डले ।
षण्मासान्मृत्युमाप्नोति स योगी नात्र संशयः ।।
पीते व्याधिभयं रक्ते नीले हानिं च निर्दिशेत् ।
नानावर्णेऽथ चैतस्मिन् सिद्धश्च गीयते महान् ।।

पदेऽङ्गुष्ठे च जठरे विनाशः क्रमशो भवेत् ।
विनश्यतो यदा बाहू स्वयन्तु म्रियते ध्रुवम् ॥
वामबाहौ तथा भार्या नश्येन्नष्टे न संशयः ।
दक्षिणे बन्धुनाशो हि मृत्युमात्मनि निर्दिशेत् ॥
अशिरो मासमरणं विना जङ्घे दिनाष्टकम् ।
अष्टभिः स्कन्धनाशेन च्छायालोपेन तत्क्षणात् ॥ इति ।

तद्रूपमिति स्वप्रतीकस्य रूपमित्यर्थः । अरिष्टान्तराणि यथा—

प्रातः पृष्ठगते रवौ च निमिषाच्छायाङ्गुली चाधरं
दृष्ट्वार्द्धेन मृतिस्त्वनन्तरमहो च्छायानरं पश्यति ।
तत्कर्णांशकरास्यपार्श्वहृदयाभावेक्षणार्द्धात्स्वयं
दिङ्मूढो हि नरः शिरो विगमतो मासांस्तु षड् जीवति ॥

अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च ।
आयुर्हीना न पश्यन्ति चतुर्थं मातृमण्डलम् ॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमेव च ।
भ्रूवौ विष्णुपदं ज्ञेयं तारकं मातृमण्डलम् ॥
नवभ्रुवं सप्तघोषं पञ्चतारां त्रिनासिकाम् ।
जिह्वामेकदिनं प्रोक्तं म्रियते मानवो ध्रुवम् ॥
कोणावक्ष्णोरङ्गुलीभ्यां किञ्चित्पीड्य निरीक्षयेत् ।
यदा न दृश्यते बिन्दुर्दशाहेन भवेन्मृतः ॥
अकस्माच्चित्तविकृतिरकस्मात् पुरुषोत्तमः ।
अकस्मादिन्द्रियोत्पातः सन्निपाताग्रलक्षणम् ॥
शरीरं शीतलं यस्य प्रकृतिर्विकृता भवेत् ।
तदरिष्टं समासेन व्यासतस्तु निबोध मे ॥
दुष्टशब्देषु रमते शुद्धशब्देषु चात्मनि ।
पश्चात्तापो भवेद् यस्य तस्य मृत्युर्न संशयः ॥
हुंकारः शीतलो यस्य फुत्कारो वह्निसन्निभः ।
महावैद्योऽवैद्यः स्यात्तस्य मृत्युर्भवेद्ध्रुवम् ॥
वाप्यां पुरीषमूत्राणि सुवर्णं रजतं तथा ।
प्रत्यक्षमथ वा स्वप्ने दशमासान्न जीवति ॥

क्वचित्पश्यति यो दीपं सुवर्णञ्च कषान्वितम् ।
विरूपाणि च भूतानि नवमासान्न जीवति ।।
न यस्य स्मरणं किञ्चिद् विद्यते स्तनचर्मणि ।
सोऽवश्यं पञ्चमे मासि स्कन्धारूढो भविष्यति ।। इति

अहोरात्रं यदैकत्र वहते यस्य मारुतः ।
तदा तस्य भवेन्मृत्युः सम्पूर्णे वत्सरत्रये ।।
अहोरात्रद्वयं यस्य पिङ्गलायां सदा गतिः ।
तस्य वर्षद्वयं प्रोक्तं जीवितं तत्त्ववेदिभिः ।।
त्रिरात्रं वहते यस्य वायुरेकपुटे स्थितः ।
तदा संवत्सरायुस्तं प्रवदन्ति मनीषिणः ।।
रात्रौ चन्द्रो दिवा सूर्यो वहेद् यस्य निरन्तरम् ।
जानीयात्तस्य वै मृत्युः षण्मासाभ्यन्तरे भवेत् ।।
एकादिषोडशाहानि यदि भानुर्निरन्तरम् ।
वहेत्तस्य भवेन्मृत्युः नोषाहे [?] न च मासिके ।।

सम्पूर्णं वहते सूर्यश्चन्द्रमा नैव दृश्यते ।
पक्षेण जायते मृत्युः कालज्ञेनानुभाषितम् ।।
सम्पूर्णं वहते चन्द्रः सूर्यो नैव च दृश्यते ।
मासेन जायते मृत्युः कालज्ञेनानुभाषितम् ।।
मूत्रं पुरीषं वायुश्च समकालं प्रवर्त्तते ।
तदासौ चलितो ज्ञेयो दशाहे म्रियते ध्रुवम् ।। इति

लक्ष्यं लक्षितलक्षणेन सलिलं भानुर्यदा दृश्यते ।
क्षीणो दक्षिणपश्चिमोत्तरपुरः षट्त्रिद्विमासैकतः ।।
मध्यं छिद्रमिदं भवेद्दशदिनं धूमाकुलं तद्दिने ।
सर्वज्ञैरपि भाषितं मुनिवरैरायुःप्रमाणं स्फुटम् ।। इति ।

यदि चारिष्टादिभ्यः समागतमपि मृत्युं ज्ञात्वा नेच्छेत् तदा शक्तश्चेत्कालं वञ्चयेद् यथाह खेचरीपटले पार्वतीं प्रति महेश्वरः —

यदि वञ्चितुमुद्युक्तः कालं कालविभागवित् ।
कालस्तु यावद् व्रजति तावत्तत्र सुखं वसेत् ।।
ब्रह्मद्वारार्गलस्याधो देहं कालप्रयोजनम् ।

तस्मादूर्ध्वंपदं देहं न हि कालप्रयोजनम् ॥
यदा देव्यात्मनः कालमतिक्रान्तं प्रपश्यति ।
तदा ब्रह्मार्गलं भित्वा शक्तिं मूलपदं नयेत् ॥
शक्तिदेहप्रसूतन्तु स्वजीवञ्चेन्द्रियैः सह ॥
तत्तत्कर्माणि संयोज्य स्वस्थदेहः सुखं चरेत् ।
अनेन देवि योगेन वञ्चयेत्कालमागतम् ॥ इति ।

चिरजीवित्वप्रकारो यथा—

मारुतं बन्धयित्वा तु सूर्यं बन्धयते यदि ।
अभ्यासाज्जीवते जीवः सूर्यकालेऽपि वञ्चिते ॥
गगनात्स्रवते चन्द्रः कायपद्मं विकासयेत् ।
कर्मयोगसदाभ्यासैरमरः शशिसंश्रयात् ॥
शशाङ्कं वारयेद् रात्रौ दिवा वार्यो दिवाकरः ।
इत्यभ्यासरतो नित्यं स योगी नात्र संशयः ॥
वामे चामृतरूपा स्याज्जगदाप्यायनं परम् ।
दक्षिणे चरभागेन जगदुत्पादयेत्सदा ॥
मध्यमा भवति क्रूरा नष्टा सर्वत्र कर्मसु ।
सर्वत्र शुभकार्येषु वामा भवति सिद्धिदा ॥
निर्गमे तु शुभा वामा प्रवेशे दक्षिणा शुभा ।
चन्द्रः समस्तु विज्ञेयो रविस्तु विषमः सदा ॥ इति ।

तथा च मोक्षपर्वणि भारते युधिष्ठिरं प्रति भीष्मः—

न यमो नान्तकः क्रुद्धो न मृत्युर्भीमविक्रमः ।
ईशते नृपते सर्वे योगिनोऽमिततेजसः ॥ इति ।

यदि पुनस्तत्रासक्तो विरक्तो वा तदा खेचरपटलोक्तप्रकारेणैव तनुंस्त्यजेत् तद् यथा ।

यदा तु योगिनो बुद्धिस्त्यक्तुं देहमिमं भवेत् ।
तदा स्थिरासनो भूत्वा मूलाच्छक्तिं समुज्वलाम् ॥
सूर्यकोटिप्रतीकाशां भावयेच्चिरमात्मनि ।
आपादतलपर्यन्तं प्रसृतं जीवमात्मनः ॥

संहृत्य क्रमयोगेन मूलाधारपदं नयेत् ।
तत्र कुण्डलिनीं शक्तिं सर्वत्रानलसन्निभाम् ।।
जीवं निजञ्चेन्द्रियाणि ग्रसन्तीं चिन्तयेद्धिया ।
सम्प्राप्य कुम्भकावस्थां तडिज्ज्वलनभास्वराम् ।।
मूलाधाराद्यतिर्देवि स्वाधिष्ठानपदन्नयेत् ।
तत्रस्थं जीवमखिलं ग्रसन्तीं चिन्तयेद् व्रती ।।
तडित्कोटिप्रतीकाशां तस्मादुन्नीय सत्वरम् ।
मणिपूरपदं प्राप्य तत्र पूर्ववदाचरेत् ।।
तत्र स्थिता क्षणन्देवि पूर्ववद्योगमार्गवित् ।
अनाहतन्नयेद्योगी तत्र पूर्ववदाचरेत् ।।
उन्नीय तु पुनः पद्मे षोडशारे निवेशयेत् ।
तत्रापि चिन्तयेद्देवि पूर्ववद् योगमार्गवित् ।।
उन्नीय तस्माद् भ्रूमध्ये नीरक्षीरं ग्रसेत् पुनः ।
मनसा सह वागीश्या भित्वा ब्रह्मार्गलं क्षणात् ।।
परामृतमहाम्भोधौ विश्रान्तिं तत्र कारयेत् ।
तत्रस्थं परमन्देवि शिवं परमकारणम् ।।
शक्त्या सह समायोज्य तयोरैक्यं विभावयेत् ।
एवं तत्त्वे परे शान्तः शिवलीनः शिवायते ।। इति ।।

तथा च मुण्डकश्रुतिः—

गताः कलाः पञ्चदशप्रतिष्ठा
देवाश्च सर्वे प्रतिदेवतासु ।
कर्माणि विज्ञानमयश्च आत्मा
परेऽव्यये सर्वं एकीभवन्ति ।। इति ।

यस्यैष मण्डलं भित्वा मारुतो याति मूर्द्धतः ।
यत्र कुत्र मृयेद् वापि न स भूयोऽभिजायते ।।

इति चाध्यात्मबिन्दुश्रुतिः ।

अथ वा प्रयाणकाले मनसाचलेन भ्रुवोर्मध्य इति भगवदुक्तप्रकारेण तनुञ्जह्यात् भ्रूमध्यमेवाध्यात्मिककाशीक्षेत्रमिति निरूपितं प्राक् । ते पुनः—

ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ।
स एतस्माज्जीवघनात् परात्परं पुरिषयं पुरुषमीक्षते च ।

इत्यादिश्रुतिभिर्ब्रह्मलोके निवसन्त महाप्रलये ब्रह्मणैव सह मुच्यन्ते । तथा च स्मर्यंते—

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परम्पदम्॥ इति ।

ते खलु सूर्यमण्डलं विभिद्य ब्रह्मलोकं प्रयान्ति । तथा च नारदपरिव्राजकादि-ब्राह्मणे—

परिव्राट् योगयुक्तश्च रणे चाभिमुखे हतः ।
एष मे मण्डलं भेत्ता स्थानाच्चलति भास्करः ॥ इति ।

यत्तु अन्नपूर्णाब्राह्मणादौ—

तनुन्त्यजतु वा तीर्थे स्वपचस्य गृहेऽथ वा ।
ज्ञानसम्पत्तिसमयं मुक्तोऽसौ विगताशयः ॥ इति

श्रूयते । तच्च विवेकख्यात्यनन्तरं द्रष्टव्यमिति ।

तथा च स्मर्यंते—

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥ इति ॥ ५५ ।

सूर्ये भुवनज्ञानं हस्तिबलादौ च तद्बलं तद्वत् ।
अन्यशरीरावेशप्रमुखा ज्ञेया विभूतयोऽप्येवम् ॥५६॥

सूर्ये संयमाद्भुवनज्ञानं भवति । भुवनप्रस्तारो योगभाष्यानुसारेण निरूप्यते । अवीचिर्नाम नरकविशेषो यदधो नान्यो लोकोऽस्ति । ततः प्रभृति मेरुपृष्ठं यावत् भूर्लोको भवति । मेरुपृष्ठादारभ्य ध्रुवपर्यन्तं ग्रहनक्षत्रपरिमण्डितो भुवर्लोकः । ततः उपर्युपरि पञ्चविधो स्वर्लोको भवति । तेषु पञ्चविधेषु प्रथमो माहेन्द्रः द्वितीयस्तु प्राजापत्यो महर्लोकः । ततो जनलोकस्तृतीयः । ततस्तपोलोकश्चतुर्थः । ततः पञ्चमः सत्यलोक इति । तत्र जलादित्रितयो ब्राह्म इत्युच्यते । तथा हि रुग्ब्रह्मलोकः—

ब्राह्मस्त्रिभूमिको लोकः प्राजापत्यस्ततो महान् ।
माहेन्द्रश्च भूरित्युक्तो दिवि तारानुविप्रजा ।। इति ।

तत्रावीचेरुपर्युपरि निविष्टाः सन्त महानरकभूमयः शिलाशकलजलानिला-काशान्धकारयथाक्रमाधारा महाकालामुरीषरौरवमहारौरवकालसूत्रान्धतामिस्राः सन्ति । यत्र च स्वपापकर्मार्जितदुःख··· ··· दीर्घमायुर्गृहीत्वा प्राणिनो जायन्ते । ततो महा-तलरसातलातलसुतलवितलतलातलपातालाख्यानि सप्तपातालानि । भूमिरियमष्टमी । सप्तद्वीपा वसुमती । यस्या मध्ये काञ्चनः पर्वतराजः सुमेरुः । तस्य च पूर्वदक्षिणादि दिक्क्रमेण राजतवैदुर्यस्फटिकहेममणिमयानि शृङ्गाणि वर्तन्ते । तत्र च वैदुर्यप्रभानुरागान्नीलोत्पलपत्रस्यात्मा नभसो दक्षिणो भागो दृश्यते । एवमेव श्वेतः पूर्वः स्वच्छः पश्चिमः । चम्पकाभ उत्तर इति ।

सुमेरोरुपरि दक्षिणपार्श्वे जम्बुनामा वृक्षः यन्नाम्नायं जम्बूद्वीप इत्याख्यायते । तस्य च सूर्यप्रचारात् रात्रिन्दिवं लग्नमिव विवर्त्तते । सुमेरोरुत्तरस्यां दिशि नीलश्वेत-शृङ्गवन्त इति त्रयः पर्वताः द्विमहस्रायामाः सन्ति । तदन्तरेषु नवनवयोजनसाहस्राणि त्रीणि वर्षाणि सन्ति । तत्र नीलगिरिर्मेरूत्तरदिक्संलग्नो वर्तते । नीलस्य चोत्तरे भागे रमलकं वर्षम् श्वेतस्योत्तरे हिरण्मयं वर्षम् । शृङ्गवत उत्तरे समुद्रपर्यन्तमुत्तरा कुरव इति । सुमेरोर्दक्षिणस्यान्दिशि त्रयो निषधहेमकूटहिमशैला द्विसहस्रायामा वर्तन्ते । तदन्तरेषु नवनवयोजनसाहस्राणि हरिवर्षं किम्पुरुषं भारतमिति त्रीणि वर्षाणि सन्ति । सुमेरोः पूर्वदिशि तत्संयुक्तो माल्यवान्नाम पर्वतः तमेव सीमानं कृत्वा समुद्रपर्यन्ता केतुमालनामानो देशाः । सुमेरोर्मध्ये वर्षमिलावृत्तमिति तदेतद् योजनानां शतसहस्रं सुमेरोर्दिशि दिशि तदर्द्धेन व्यूढम् । स खल्वयं शतसहस्रायामो जम्बूद्वीपस्ततो द्विगुणेन नवलोदधिना वलयाकृतिना वेष्टितः ततश्च द्विगुणा शाककुशक्रौञ्चशाल्मल-मगधपुष्करद्वीपाः सप्तसमुद्राश्च सर्षपराशिकल्पाः सविचित्रशैलावतंसाः ईक्षुरससुरा-सर्पिर्दधिमण्डक्षीरस्वादूदका वर्त्तन्ते वलयाकृतयो लोकालोकपर्वतपरिवाराः पञ्चाशद्यो-जनकोटिपरिसंख्याताः । तदेतत्सर्वं सुप्रतिष्ठितसंस्थानमण्डमध्ये व्यूढम् । अण्डश्च प्रधानस्याणुरवयवो यथाकाशे खद्योत इति । तत्र पाताले जलधौ पर्वतेष्वेतेषु देव-निकाया असुरगन्धर्वकिन्नरकिम्पुरुपयक्षराक्षसभूतप्रेतपिशाचापस्मारकाप्सरो ब्रह्मराक्षस-कूष्माण्डविनायकाः प्रतिवसन्ति । सर्वेषु द्वीपेषु पुण्यात्मानो देवमनुष्याः । सुमेरुश्च त्रिदशानामुद्यानभूमिः । तत्र मिश्रवनं नन्दवनं चैत्ररथं सुमानसमित्युद्यानानि । सुधर्मा देवसभा सुदर्शनं पुरम् । वैजयन्तः प्रासादः । ग्रहनक्षत्रतारकास्तु ध्रुवे निबद्धा वायु-

विक्षेपनियमनोपलक्षितप्रचाराः सुमेरोरूपर्यपरि सन्निविष्टा, विपरिवर्त्तन्ते । माहेन्द्र-निवासिनः षड् देवनिकायाः । त्रिदशा अग्नि·········याम्याः उषिता अपरिनिर्मित-वशर्वत्तिनः परिनिर्मितवशवर्त्तिनश्चेति । सर्वे संकल्पसिद्धा अणिमाद्यैश्वर्योपपन्नाः कल्पायुषो वृन्दारकाः कामभोगिन औपपादिकन्देहाः नाम पित्रोः संयोगमन्तरेणा-कस्मादेव धर्मविशेषातिसंस्कृतपरमाणुभ्यो जायमानशरीरधारिणः उत्तमानुकूलाभि-रप्सरोभिः कृतपरिवारा निवसन्ति । महति लोके प्राजापत्ये च पञ्चविधो देवनिकायः कुमुदा...भवः प्रतर्दना अञ्जल्याभाः प्रचिताभा इति । एते महाभूतवशिनो ध्यानाहाराः कल्पसहस्रायुष इति । प्रथमे ब्रह्मणो जनलोके चतुर्विधो देवनिकायो ब्रह्मपुरोहिता ब्रह्म-कायिका ब्रह्ममहाकायिका अमरा इति । एते भूतेन्द्रियवशिनो द्विगुणद्विगुणोत्तरायुषः सर्वे ध्यानाहारा ऊर्ध्वरेतस ऊर्ध्वमप्रतिहतज्ञाना अधरभूमिष्वनावृतज्ञानविषयाः । तृतीये ब्रह्मणः सत्यलोके चत्वारो देवनिकायाः अच्युताः शुद्धनिवासाः सत्यभाः संज्ञा संज्ञिनश्चेति । अकृतभवनन्यासा स्वप्रतिष्ठा उपर्युपरिस्थिताः प्रधानवशिनो यावत्सर्गा-युष. । तत्राच्युताः सवितर्कध्यानमुखाः । शुद्धनिवासाः सविचारध्यानमुखाः । सत्यभा आनन्दमात्रध्यानमुखाः । संज्ञासंज्ञिनश्चास्मितामात्रध्यानमुखाः । तेऽपि त्रैलोक्यमध्ये प्रतितिष्ठन्ति । न मुक्ता इति यावत् । विदेहप्रकृतिनयास्तु मोक्षपदे वर्तन्ते । न लोकमध्ये न्यस्ता इति । एतत्सर्वं योगिना सुषुम्णायां संय्यमं कृत्वा साक्षात्कर्त्तव्यम् । एवन्तावदभ्यसेत् यावदिदं सर्वं दृष्टमिति । हस्तिबलादौ चेति हस्तिबले संयमाद्धस्ति-बलो भवति एवमन्यबलेऽपि संयमात्तद्बलो भवतीति । एवमेवान्यशरीरानुवेशप्रमुखाः सिद्धयस्तत्र तत्र संय्यमाल्लभ्या इति । तत्र चित्तस्य परशरीरावेशो यथा—अतिचप-लस्याप्रतिष्ठस्य मनसः कर्माशयवशाद्बन्धप्रतिष्ठाः, तस्य च बन्धकारणस्य कर्मणः समाधिभावनया शैथिल्यं चित्तस्य प्रचारसम्वेदनञ्च जायते । कर्मबन्धक्षये च योगी स्वचित्तस्य प्रचारसम्वेदनाः स्वशरीराच्चित्तं विनिष्क्रम्य शरीरान्तरेषु निक्षिपति । निक्षिप्तं चित्तं चेन्द्रियाणि प्राणाश्चानुपतन्ति । यथा मधुकरराजानं मक्षिका उत्पत-न्तमनुपतन्तीति । प्रकारान्तरं यथा निर्वाणप्रकरणे वासिष्ठे—

मुखाद्बहिर्द्वादशान्ते रेचकाभ्यासयुक्तितः ।
प्राणे चिरं स्थितिं नीते प्रविशत्यपरां पुरीम् ॥ इति ।

एवमन्या अपि सिद्धयो यथाशास्त्रं विज्ञेया इति । तत्र पुरुषज्ञानं यथा—चेतनत्वभोक्तृत्वशक्तिमान् पुरुषः जडत्वभोग्यत्वशक्तिमच्च बुद्धित्वमिति अत्यन्त-विभिन्नयोरपि चित्तसत्त्वपुरु[ष]योरविद्याकृते यो अहं कर्त्ता भोक्तेत्यादि प्रत्ययः स

एव पुरुषस्य बुद्धिसत्त्वेन सहाभेदात्मको भोगः पुरुषार्थमेव बुद्धिसत्त्वस्य प्रवृत्तिः सैव भोग्यत्वशक्तिरिति । इत्थञ्चअहंकारपरित्यागे विशुद्धेव चित्तसत्त्वे यदा पुरुषच्छाया प्रतिबिम्बिता भवति, तदानीं तत्र संयमात् बुद्धिसत्त्वादयं पुरुषो भिन्न इति साक्षात्कारात्मकं ज्ञानं जायते। यथा रजोमलविदूषितदर्पणे मुखस्य निरीक्षणेन दर्पणगतमलं स्वमुखे मन्यमानस्य विशुद्धदर्पणे पुनर्निरीक्ष्य विशुद्धं मे मुखमिति विनिश्चयो जायत इति ।।५६।।

बुद्धिसत्त्वनिष्ठं ज्ञानं पुरुषः प्रकाशयति पुरुषस्तु स्वयं प्रकाश इति भावस्तथा च श्रूयते—

विज्ञातारमरे केन विजानीयादिति ।

भूतेन्द्रियविजिगीषुः—

प्रथमकल्पिकस्यैताः प्रारब्धज्योतिषः कथिताः ।
तत्र च वैशारद्ये ऋतम्भरा जायते प्रज्ञा ।।५७।।

प्रथमकल्पिकस्येति । चत्वारः खल्वमी योगिनो भवन्ति । प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रमभावनीयश्च । तत्रावशीकृतपरचित्तादिविषयः प्रथमः भूतेन्द्रियविजिगीषुर्द्वितीयः ऋतम्भरप्रज्ञः । भूतेन्द्रियजयी तृतीयः एषश्च निष्पादितेऽष्वर्थेषु कृतरक्षाबन्धो निष्पाद्येषु विशोकादिषु परवैराग्यपर्यन्तेषु कर्त्तव्यसाधन...... । तुरीयस्य च भगवतो जीवन्मुक्तस्यासम्प्रज्ञातसमाधिना चित्तविलयरूप एकत्र वार्थोऽवशिष्यत इति । तेषु च एताः सिद्धयः पूर्वोक्ताः प्रथमकल्पिकस्य प्रारब्धज्योतिषः प्रारब्धं प्रवृत्तमात्रं ज्योतिः परचित्तादिविषयं ज्ञानं यस्य तथा भूतस्य कथिताः । तत्र च तत्तत्संयमे वैशारद्ये निर्मलस्य प्रकाशात्मनो बुद्धिसत्त्वस्य रजस्तमोभ्यामनभिभूतस्वच्छस्थितिप्रवाहे सति ऋतम्भरा प्रज्ञा । ऋतं सत्यमेव बिभर्ति न विपर्यासलेशोऽपीति तादृशं ज्ञानं जायते ।

तथा चोद्दालकध्याने उपशमप्रकरणे वशिष्ठः । देवा उचुः—

आरुह्येदं विमानन्तु मे हि त्रैविष्टपं पुरम् ।
स्वर्ग एव हि सीमान्तो जगत्सम्भोगसम्पदाम् ।।
आकल्पमु चितान् भुङ्क्ष्व भोगानभिमतान् विभो ।
स्वर्गादिफलभोगार्थमेवाशेषतपःक्रिया ।।
हारचामरधारिण्यो विद्याधरवराङ्गनाः ।।
पश्येमाः···मुपासीनाः करिण्यः करिणं यथा ।। ।। इति ।। ५७ ।।

तत्प्रान्तभूमिमन्त्यामाविष्टं मधुमतीप्रख्याम् ।
अमुमुपनिमन्त्रयन्ते दिव्यैर्देवा ऋतम्भरप्रज्ञम् ॥ ५८ ॥

तत्प्रान्तभूमिमित्यादि । तस्या ऋतम्भरप्रज्ञायाः सप्तविधप्रान्तभूमिषु मधुमती-प्रख्यामन्त्यां प्रान्तभूमिमाविष्टसाक्षात्कुर्वाणममुं तत्र भवन्तं ऋतम्भरप्रज्ञं देवा महेन्द्रादयः सत्त्वशुद्धिमनुपश्यन्ति । दिव्यैर्दिविभवैर्भोग्यैः उपनिमन्त्रयन्ते स्वर्गस्थानो-पलक्षितविमानाप्सरःकल्पद्रुमादिभिः प्रलोभ्य स्वाभीष्टकर्त्तव्यकरणाय प्रार्थयन्तु इत्यर्थः । तथा च योगभाष्ये—भोरिहास्यतामिह रम्यताम् कमनीयोऽयं भोग इत्याद्यु-क्तमिति ।५८।

तत्रापि दोषदर्शं सङ्गमकृत्वा न विस्मयः कार्यः ।
भूतेन्द्रियविजयार्थं समाधिमपि भावयेत् प्राज्ञः ॥ ५९ ॥

तत्रापीति । स्वर्गीयवस्तुसङ्गे दोषदर्शं सकलान् दोषान् परिगणय्य सङ्गमकृत्वा विस्मयोऽपि न कार्यः देवानां प्रार्थनीयोऽस्मि संवृत्त इति । प्राज्ञः ऋतम्भरप्रज्ञः भूतेन्द्रिय विजयार्थं समाधिमेव भावयेत् । सङ्गदोषो यथाह योगभाष्ये—

घोरेषु संसाराङ्गारेषु पच्यमानेन मया जननमरणान्धकारे विपरिवर्त्तमानेन कथञ्चिदासादितः क्लेशतिमिरविनाशो योगप्रदीपः तस्य चैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः स खल्वहं लब्धालोकः कथमनया विषयमृगतृष्णया वञ्चितस्तस्यैव पुनः प्रदीप्तस्य संसाराग्नेरात्मानमिन्धनीकुर्यामिति । स्वस्ति वः स्वप्नोपमेभ्यः कृपणजन-प्रार्थनीयेभ्यो विषयेभ्य इत्येवं निश्चितमतिः समाधिं भावयेदिति ॥ ५९ ॥

भूतविजयमाह—

स्थूलादिषु भूतानां पञ्चविधेष्वपि च संयमाद्विजयः ।
रूपादिकायसम्पत्प्रादुर्भावोऽणिमादीनाम् ॥ ६० ॥

स्थूलादिष्विति । स्थूलादिषु स्थूलस्वरूपसूक्ष्मान्वयार्थवत्वेषु पञ्चविधेषु योगदर्शनप्रसिद्धेषु अपि च संयमाद्विजयो भवति । पञ्चविधानां स्थूणादिभूतानामिति शेषः । पञ्चीकरणञ्च भूतानां प्रत्येकं द्विधा विधाय पुनश्चतुर्धा कृत्वा स्वस्वेतरद्विती-यांशैः पञ्चकृत्वः सम्मेलनम् । तत्र पृथिव्या आकारादिधर्मो यथा—

आकारो गौरवं रौक्ष्यं वरणं स्थैर्यमेव च ।
वृत्तिर्भेदः क्षमाकार्श्यं काठिन्यं सर्वभोग्यता ॥ इति ।

आकारश्च सामान्यलक्षणं गोत्वादि। वृत्तिः सर्वभूताधारता भेदोः विदारणम् क्षमा सहिष्णुतेति। अस्याश्च शब्दस्पर्शरूपरसगन्धाः पञ्च तत्र विशेषश्च गन्ध एव। विशेषता च नामरूपप्रयोजनैः परस्परतो भेदादिति। अपां धर्मा यथा—

स्नेहः सौक्ष्म्यं प्रभा शौक्ल्यं मार्दवं गौरवञ्च यत्।
शैत्यं रक्षा पवित्रत्वं सन्धानञ्चोदका गुणा ॥ इति।

रक्षा—दुर्गादिद्वारा रक्षकत्वम्। सन्धानञ्च विश्लिष्टानां मेलनम्। आकारश्चास्य जलत्वमिति। अप्सु च शब्दस्पर्शरूपरसाश्चत्वारः। तत्र च विशेषो रस एव। विशेषता तु तस्य पूर्ववदेव।

अथ तैजसधर्माः

उर्ध्वभाक् पावकं दग्धृ पाचकं लघु भास्वरम्।
प्रध्वंस्योजस्वि तै तेजः पूर्वाभ्यां भिन्नलक्षणम् ॥

तेजसि शब्दस्पर्शरूपाणीति त्रीणि। तत्र विशेषश्च रूपमेवेति। वायवीया धर्मा यथा—

तिर्यग्यानं पवित्रत्वमाक्षेपो नोदनं बलम्।
चलमच्छायता रौक्ष्यं वायोर्धर्माः पृथग्विधाः ॥

आक्षेपः पातनं नोदनं, कम्पनमिति। अत्र च शब्दस्पर्शौ द्वौ। तत्र विशेषः स्पर्श एवेति।

अथाकाशीया धर्माः

सर्वतो गतिरव्यूढो विष्टम्भश्चेति च त्रयः।
आकाशधर्मा व्याख्याताः पूर्वधर्मविलक्षणाः ॥

सर्वतो गतिः व्यापित्वम्, अव्यूहः सर्वपदार्थविषकारणत्वम्, अविष्टम्भोऽवकाशप्रदातृत्वम्। अत्र च शब्द इत्येकः स च विशेष इति।

अथ भूतानां द्वितीयं रूपञ्च स्वस्वसामान्यमेव। यथा मूर्त्तिमती पृथिवीति पृथिव्याः मूर्त्तिः सांसिद्धिकं काठिन्यमिति। स्नेहत्र...नमिति मज्जापुष्टिबलाधानहेतुः स्नेहो जलस्य। उष्णतावत्तेज इति वह्नेरूष्णता। प्रणालीवहनशीलो वायुरिति वहनं वायोरिति। सर्वतो गतिराकाश इत्याकाशस्य चाकाश इति। मूर्त्यादिसामान्यानामपि सुरभित्वादयो विशेषा इति यावत्। अयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमित्याह भगवान् पतञ्जलिः। अयुतसिद्धा अपृथक्सिद्धा निरन्तरा इति यावत्। येऽवयवाःभेदाः ...रनुगतोऽवयवाय विभावेन ज्ञानविषयमसूह इत्यर्थः। यथा शरीरं

क्षः परमाणुरिति । अथ तेषां तृतीयं सूक्ष्मरूपञ्च भूतकारणं तन्मात्रम् । तस्यैकोऽवयवः सामान्यविशेषात्मा अयुतसिद्धावयवभेदानुगतः समुदायः परमाणुरिति । भूतानां तृतीयरूपपर्यन्तमेव न्यायवैशेषिकजैमिनीयदर्शनानां गतिरिति । अथ तेषामन्वयशब्दार्थत्वं चतुर्थं रूपञ्च, कार्यानुभावानुपतनशीलाः ख्यातिक्रियास्थितिशीला सत्त्वादयो गुणा इति ख्यातिर्ज्ञानं तच्छीलः सत्वगुणः । क्रिया च प्रवृत्तिस्तच्छीलो रजो गुणः, प्रवृत्तिविरोधी धर्मः स्थितिस्तच्छलीस्तमो गुण इति । एते च ख्यात्यादयो धर्मा अन्येषामपि तत्तद्गुणा धर्माणामुपलक्षणम् । ते च प्रागुक्ताः ।

अथ तेषां पञ्चमं रूपमर्थवत्त्वं तु गुणेष्वन्वयि भोगापवर्गार्थत्वमेव । गुणाश्च तन्मात्रेष्वर्थवन्तस्तानि च भूतभौतिकेषु गोघटादिष्विति सर्वमर्थवत् । यद्यपि पुरुषार्थौ शब्दाद्युपलब्धिविवेकख्यात्यौ भोगापवर्गौ चित्त एव वर्त्तेते । तथापि प्रलयकालेऽनागतावस्थया वासनारूपेण गुणेष्ववस्थानाद् गुणेष्वन्वयित्वमर्थवत्वस्योच्यते इत्यम्भूतेषु पञ्चस्वरूपेषु पञ्चभूतेषु संयमात् तस्य तस्य च स्वरूपदर्शनं तेषां विजयश्च प्रादुर्भवति जिताश्च ते वशवर्तिनो भवन्ति । न ते योगिनं कुत्रचिद् बाधन्ते योगिनः शरीरादिक्रियाँ पृथिवीमूर्त्या न रुणद्धि, शिलामपि निविशते योगी । नापः क्लेदयन्ति नाग्निर्दहति न वा वायुर्वहति । अनावरणात्मकेऽप्याकाशे संवृतकायः सिद्धानामप्यदृश्यो भवतीति यावत् ।

रूपादिकग्यसम्पदिति । भूतजये योगिनः रूपलावण्यातिशयबलवज्रवद्दृढकायत्वानि च जायन्ते । अणिमादीनां अणिमा लघिमा महिमा प्राप्तिश्चेति चतसृणां सिद्धिविशेषाणां स्थूलसंयमजयात् प्रादुर्भावो भवति । तत्राणिमा नाम महानपि अणुर्भवति । लघिमा नामातिशयलघुत्वं तदानीमिषीका तृणमिवाकाशे योगी विहरति । महिमा चाल्पस्यापि पर्वताद्याकारेण परिणामः । प्राप्तिश्च सर्वे भावा योगिनः सन्निहिता भवन्ति । भूमिष्ठ एवाङ्गुल्यग्रेण चन्द्रमसं स्पृशतीति । एवं स्वरूपसंयमविजयाच्च प्राकाम्यसिद्धेः प्रादुर्भावः । तदानीं योगिनः इच्छाया नाभिघातो भवतीति । सूक्ष्मविषयसंयमविजयाच्च वशित्वसिद्धेः प्रादुर्भावो भवति । तदानीं भूतभौतिकेषु योगी स्वतन्त्रो भवतीति । अन्वयविषयसंयमाच्च ईशितृत्वसिद्धेः प्रादुर्भावः । तदानीं भूतभौतिकानामुत्पत्तिविनाशावस्थानानां प्रभुर्भवति योगी । अर्थवत्वसंयमजयाच्च, कामावशायित्वं सत्यसंकल्पता तत्सिद्धेः प्रादुर्भावो भवति । तदानीं विजितगुणार्थवत्वो हि योगी यद्यदर्थतया संकल्पयति तत् तस्मै प्रयोजनाय कल्पते । पदार्थविपर्यासं कर्तुं शक्तोऽपि योगी परमगुरोः परमेश्वरस्याज्ञामुल्लङ्घयितुं नोत्सहते । अत एव च चन्द्रमसं सूर्यन्न करोतीत्यलम् ॥६०।

ग्रहणादिषु पुनरिन्द्रियवर्गस्य च संयमाद्विजयः।
तस्मान्मनोजवित्वं विकरणभावः प्रधानविजयश्च ॥६१॥

ग्रहणादिष्विति। इन्द्रियवर्गस्य च चक्षुरादिपञ्चविधस्य ग्रहणादिषु पञ्चविधरूपेषु संयमाद्विजयो भवति, इन्द्रियवर्गस्येति यावत्। इन्द्रियाणां पञ्चविधरूपाणि च ग्रहणस्वरूपास्मितान्वयार्थवत्वानि। तत्र ग्रहणरूपञ्च तेषां सामान्यविशेषात्मरूपरसगन्धस्पर्शशब्देषु ग्राह्येषु वृत्तिरिति। द्वितीयं स्वरूपञ्च प्रकाशात्मनो बुद्धिसत्वस्य कार्यभूता येऽयुतसिद्धा अवयवभेदाः सात्त्विकाहङ्काररूपास्तेष्वनुगतो यः सामान्यविशेषयोः श्रोत्रत्वादिरूपाद्याकारपरिणामाभेदस्वरूपयोः समूहो द्रव्यं चक्षुरादीन्द्रियलक्षणमिति। तृतीयञ्च रूपमस्मितालक्षणोऽहङ्कार इति यः खल्वहङ्कार आत्मीयसत्त्वभागेनेन्द्रियाणि अजीजनत्। तेषु च करणत्वसामान्यं नियतरूपादिविषयविशेषश्चैतदुभयं प्रकाशात्मकमेव सत्त्वभागेन जायमानत्वात्। सकलेन्द्रियसाधारण्यादहङ्कारश्च सामान्यमिन्द्रियाणामिति यावत्। गुणानाञ्च यद् व्यवसेयात्मकत्वं व्यवसायात्मकत्वञ्चेति द्वैविध्यमिति तत्र व्यवसेयात्मकाः ग्राह्यतामास्थाय पञ्चतन्मात्राणि भूतभौतिकानि च जनयन्ति। अपरे च प्रकाशक्रियास्थितिशीला ग्रहणरूपमास्थाय साहङ्काराणीन्द्रियाणि च निर्मिमते इति व्यवसायात्मका गुणास्तेषां चतुर्थं रूपमिति। पञ्चमञ्च रूपं गुणानुगतं पुरुषार्थवत्त्वमिति। एतेषु यथाक्रमं संयमादिन्द्रियजयः प्रादुर्भवतीति। तस्मादिन्द्रियजयात् तिस्रः सिद्धयो भवन्ति। तत्र मनोजवित्वम् मनोवदत्यन्तान्तरितमपि देशं झटिति गच्छतीति। विकरणभाव इति। विदेहानां शरीरनिरपेक्षाणामिन्द्रियाणां करणभावः अभिप्रेतदेशकालविषयापेक्षो वृत्तिलाभ इति। यथा च काशीस्थ एव हिमगिरिस्थ मानं पश्यति तत्रत्यं शब्दञ्च शृणोतीत्यादि। प्रधानविजयश्च सर्वप्रकृतिविकारवशित्वमिति ॥६१॥

एता मधुप्रतीका उच्यन्ते सिद्धयस्तिस्रः।
ज्ञानं विवेकजञ्च क्षणतत्क्रमयोश्च संयमाल्लभते ॥६२॥

एता इति। एता अनन्तरोक्ता मनोजवित्वादितिस्रः सिद्धयो मधुप्रतीका योगशास्त्रविदुत्तमैरुच्यन्त इति शेषः। मोदकारणत्वात्ता एव योगिनां मधुसदृश्य इति यावत्। क्षणतत्क्रमयोः पुनः संयमाद्विवेकजं ज्ञानञ्च लभते। क्षणो नाम परमापकर्षपर्यन्तः कालः यथापकर्षपर्यन्तद्रव्यं परमाणुरिति परमाणुर्वा यावता कालेन स्वदेशमतिक्रामेत्स कालः क्षणः तत्क्रमश्च तत्प्रवाहस्योत्तरोत्तरभावेनावस्थितेर्नैरन्तर्यम् मुहूर्त्ताहोरात्रादयश्च बौद्धाः व्युत्थितदर्शनानां वस्तुस्वरूपा इवाभासन्ते कालविदो योगिनश्च क्षणमेव काल इत्याचक्षते। न च क्षणानां यौगपद्यमस्ति सहावस्थानासम्भवाद्।

तेनैकेन क्षणेन कृत्स्नो लोकः परिणाममनुभवतीति। अयमत्र विवेकः, लोके तावद् गोत्वादिरूपा जातिः वर्तुलत्वादिरूपं लक्षणम्, तत्तदधिकरणदेशश्चेति त्रयः समुदिता व्यस्ता वा वस्तूनामप्यनुकरा भवन्तीति जात्यादिभिस्तुल्ययोः परमाणूनाञ्चान्यत्वप्रतिपत्तिकरः पुनर्विवेकजज्ञानमेवेति। येऽपि परमाणूनां भेदका विशेषा इत्याचक्षते तेषामपि जातिर्देशश्चान्यताहेतुरिति। क्षणभेदस्तु योगिबुद्धिगम्य एवेति ॥६२॥

विवेकजं ज्ञानं लक्षति —

स्फुटमपि च सर्वविषयं युगपन्निरूपक्रमं तदिदम्।
तारकमिति परिपूर्णं भूतेन्द्रियविजयिनस्तदिदम् ॥६३॥

स्फुटमित्यादि। तदिदं विवेकजं ज्ञानं भूतेन्द्रियविजयिनस्तृतीयस्य सम्प्रज्ञाताख्ययोगप्रदीपान्तमधिगतस्य योगिनः स्फुटं प्रत्यक्षात्मकं सर्वविषयं सकलपदार्थगोचरं युगपन्निरूपक्रमं एकक्षणोपारूढातीतानागतप्रत्युत्पन्नसर्वार्थविषयं नितरां परिपूर्णं सत् तारकमिति संसारसागरात्तारयतीति तारकम्। स्वप्रतिभोत्थमेतन्न त्वौपदेशिकमिति। एतच्च सम्प्रज्ञातस्यान्तम्। तदुक्तं योगभाष्ये—अस्यैवांशो योगप्रदीपः मधुमतीं भूमिमुपादाय यावदस्य परिसमाप्तिरिति ॥६३॥

साक्षात्कैवल्योपयोगिसमाधिमवधारयिष्यन् सम्प्रति समाधिविशेषान् प्रदर्शयति

द्विविधः समाधिरिष्टः सम्प्रज्ञातोऽप्यसंप्रज्ञातश्च।
विषयविशेषाभोगात् फणिना प्रथमश्चतुर्विधः प्रोक्तः ॥६४॥

द्विविध इति। सम्प्रज्ञातः सम्प्रज्ञायन्ते वितर्कादयोऽस्मिन्निति, सम्प्रज्ञातश्चित्तवृत्तिनिरोधलक्षणे समाधौ सर्वपदानुपादानादस्यापि समाधित्वमित्यप्युक्तः। तद्भिन्नः सकलचित्तवृत्तिनिरोधलक्षणोऽसम्प्रज्ञात इति द्विविधः समाधिरिष्टः। तत्र प्रथमः सम्प्रज्ञातः विषयविशेषाणां वितर्कादीनामाभोगः फणिना भगवता महर्षिपतञ्जलिना स्वरूपसाक्षात्कारस्तस्मात् चतुर्विधः प्रोक्तः, वितर्कादिविषयाणां चतुर्विधत्वादित्यर्थः इति ॥६४॥

के पुनस्ते इत्याह—

सवितर्कः सविचारः सानन्दश्चास्मितामात्रः।
सर्वे ते तद्भेदा अपि निर्दिष्टाः सबीजाख्याः ॥६५॥

सवितर्क इत्यादि। पाञ्चभौतिकचतुर्भुजादिस्थूलालम्बनो वितर्कः, तेन सहितः सवितर्कः स्थूलस्वरूपसाक्षात्कारवती चित्तस्यावस्थाविशेषरूपा या प्रज्ञा तल्लक्षणः।

एवं स्थूलभूतकारणीभूतपञ्चतन्मात्रलिङ्गालिङ्गसूक्ष्मविषयो विचारस्तेन सहित स्तदाभोग इति यावत् सविचार इति। इमौ ग्राह्यविषयौ ग्रहणविषयश्च सानन्द इति आनन्दश्चाह्लाद इति। सत्त्वप्रधानाहङ्कारजनितानीन्द्रियाण्यपि सुखानि, सत्त्वस्य सुखात्मकत्वात्। आनन्दात्मकेन्द्रियसहितस्तदाभोग इति यावत् सानन्दस्तृतीयः। अस्मिता च एकात्मिका सच्चित् नाम अस्मिता। सा चेन्द्रियाणां जनकत्वात्तेषां सूक्ष्मरूपभूताहङ्कारात्मिका आनन्दस्तृतीयः। अस्मिता सा च ग्रहीत्रा चात्मना सहैकात्मिका बुद्धिरिति। तस्यां च ग्रहीतुर्विषयत्वाद् ग्रहीतृविषयकश्चतुर्थः सम्प्रज्ञात इति। तत्रायं विवेकः, वितर्कविचारानन्दास्मितेति चतुष्टयानुगतः प्रथमः। द्वितीयो वितर्कविकलः। तृतीयो वितर्कविचारविकलः। अस्मितामात्रश्चतुर्थं इति। सर्वैते तद्भेदा अपीति। सर्वैतेऽनन्तरोक्तास्सवितर्कादिचत्वारस्तद्भेदाः निर्वितर्कादयश्चेति। इत्थञ्च तद्भेदाख्यानम्—ध्यानानुष्ठानेन लघुस्थितेः प्रक्षीणक्लिष्टवृत्तेर्निरस्तरजस्तमो मनसः स्वभावस्वच्छस्य चित्तसत्त्वस्य संस्कारशुद्धमणिकल्पस्य ग्राह्यग्रहणग्रहीतृषु भूतसूक्ष्मा भूतेन्द्रियपुरुषेषु तत्तदुपाश्रयाकारतया परिणाम एव तेषु स्थितस्य च तस्य तदञ्जनता नाम। तथा च चतुर्विधः सम्प्रज्ञातो वर्णितः। तेषु च शब्दार्थज्ञानामितरेतराध्यासमूलकाभेदज्ञानविकल्पैः योगिनः समाधिप्रज्ञायां तत्तदर्थोऽनुविद्धः समारूढश्चेत्तदा सङ्कीर्णत्वात् सवितर्का समापत्तिः। अपरः सविकल्पनामा सम्प्रज्ञातसमाधिरिति। यदा च शब्दसङ्केतस्मरणपूर्वकप्रवृत्तिशीलौ आगमानुमानज्ञानविकल्पौ निवर्तेते नाम शब्दार्थज्ञानविकल्पागमे सति शुद्धायां समाधिप्रज्ञायामर्थमात्रनिर्भासा स्वान्तः स्थितिस्तदा निर्वितर्का समापत्तिर्नाम निर्विकल्पनामा। असदावेशलेशाभावात् तद्योगिनः परं प्रत्यक्षमिति। इमौ च सविकल्पनिर्विकल्पौ महद्वस्तुविषयकौ। एवं भूतसूक्ष्मेषु चाभिव्यक्तघटादिधर्मकेषु उपर्यधःपार्श्वादिदेशवर्त्तमानकालपार्थिवादिपरमाणूत्पादकगन्धादितन्मात्रप्रधानपञ्चतन्मात्ररूपनिमित्तज्ञानविषयेषु या समापत्तिः सा सविचारेति। यदा पुनः सर्वधर्मानुपातिष्वपि पथिवादिपरमाणुषु सर्वधर्मात्मकेषु निवृत्तत्रैकालिकतत्तद्देशकालनिमित्तधर्मेषु समापत्तिः सेयं निर्विचारेति। भूतसूक्ष्मविषयाविमावपि सविचारनिर्विचारौ, सविकल्पनिर्विकल्पौ न हि स्थूले गोघटादौ परमाणवः प्रत्यक्षेण प्रकाशन्ते। किन्तु सङ्केतज्ञानपूर्वकागमानुमानाभ्यामेवेति पूर्ववच्छब्दार्थज्ञानविकल्पैः सङ्कीर्णता चासङ्कीर्णता चेति। समापत्तेः सूक्ष्मविषयता च प्रधानाख्यमूलप्रकृतिपर्यवसाना विज्ञेया।

तथा हि पृथिव्यादिमहाभूतानां यथा भूतसूक्ष्माः पार्थिवादिपरमाणवस्तथा तेषामपि गन्धादितन्मात्राः सूक्ष्मविषयास्तेषामपि अहङ्कारस्तस्य च लिङ्गाख्यं

महत्तत्त्वम् । तस्यापि प्रधानमिति । तच्च लिङ्गं न हि प्रधानं क्वचिल्लयं गच्छति । प्रधानात्परस्य सूक्ष्मस्याभावात् ।

नन्वव्यक्तात्पुरुषः पर इति श्रुत्या पुरुष एव निरतिशयं सौक्ष्म्यमिति चेत्स्यादेतत् पुरुषार्थंनिमित्तत्वात्प्रवृत्तस्य महदहङ्कारादेः साक्षितया निमित्तकारणत्वेऽपि पुरुषे नाव्यक्तवदुपादानत्वम् । उपादानपरम्परया निरतिशयसौक्ष्म्यमत्र विवक्षितम्, तच्चाव्यक्त एव । अपरिणामिनी ननु चिच्छक्तिरविद्यया बुद्धेः प्रति सार्वदिकी भोगापवर्गार्थं दृश्यस्य त्रिगुणात्मचित्तस्योपारूढ़ान् धर्मानात्मीयत्वेन पश्यति, तदुद्धारार्थमेव योगानुष्ठानमिति । तदेवं ग्राह्यविषयाश्चत्वारस्तावन्तो ग्रहीतृग्रहणविषयाश्चेत्यष्टौ सम्प्रज्ञानभेदाः समाधयः सबीजाख्याः निर्दिष्टा भगवता पतञ्जलिनेति शेषः । बीजञ्चास्मिताद्यनात्मावस्थालम्बनम् । अथ च बीजमित्यायुर्भोगस्तेन सहिता इत्यर्थः । अयम्भावः—सम्प्रज्ञातसमाधिमतां विवेकाख्यातिं विना समाधिनालम्बनीकृतानामेव सुस्मितादिदेवतासु लीनानां सृष्ट्यादौ यथाकालं जननादिकं स्यादेव । यदि पुनस्तेषामपि विवेकाख्यातिरभविष्यत्तदा कैवल्यमप्यभविष्यदित्यग्रे स्फुटीभविष्यतीति ।

इति चतुर्थगुच्छकम् ।

पञ्चमं गुच्छकम्

अथ सम्प्रज्ञातसमाधिमतामपि विवेकख्यातिद्वारा कैवल्यं सम्पादयितुमुपक्रमते—

भवति विवेकख्यातिर्वैशारद्ये ततो विदुषः ।
आध्यात्मिकः प्रसादः सर्वात्माधीशता चैवम् ।।६६।।

भवतीत्यादि । ततः तस्मिन् सार्वविभक्तिकस्तसिः सम्प्रज्ञातविशेषे निर्विचारे इत्यर्थः । वैशारद्यं प्रागुक्तं तस्मिंश्च सति, विवेकख्यातिः सत्त्वपुरुषान्यताप्रत्ययो भवति नाम चितिशक्तिश्च पूर्वधर्मापचये धर्मान्तरोपजननः परिणामस्तद्रहितेत्यपरिणामिनी परमार्थसत्येति कूटस्थनित्या एवं निर्लेपेति विषयासङ्गरूपा प्रतिसङ्क्रमाभाववतीत्य प्रतिसङ्क्रमा चेति एवं दर्शितो विषयः शब्दादिर्यस्यै सा चेय दर्शितविषया च । एवं सुखदुःखमोहात्मकत्वमशुद्धिरन्तश्चेति पुरुषे न स्त इति शुद्धा चानन्ता च । इयञ्च बुद्धिः सत्त्वात्मिका, परिणामिनी, प्रतिसञ्चारवती, जडा, परिच्छिन्ना सुखदुःखाद्यशुद्धिमती चेति चितिशक्तेर्विपरीता विवेकख्यातिरित्येषापि निरोधसमाधौ हातव्यैवेत्यग्रे स्फुटी भविष्यति ।

अयम्भावः, श्रुतमयेन ज्ञानेन जातमपि दर्शनशास्त्रप्रतिपादितोपपत्तिभिर्व्यवस्थापितमपि विवेकेन कैवल्याय प्रभवति, तस्य सर्वथा ऋतम्भरत्वासम्भवात् । तच्च प्रतिपादितमेव पुरुषापराधमलिनेत्यादिभिरनुबन्धनिरूपणे । यदा पुनर्योगानुष्ठानेन तदेव ख्यातिपर्यवसानं भवति । तदा सर्वमेव मिथ्याज्ञानं दग्धबीजभावं गच्छति ऋतम्भरत्वात् समाधिप्रज्ञायाः । तथा च योगसूत्रं—ऋतंभरा तत्र प्रज्ञेति [यो० सू० १।४८] ऋतम्भरप्रज्ञाया एव साक्षात्कैवल्यस्य हेतुत्वेनाम्नातवती, छान्दोग्यश्रुतिर्यथा—सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष इति । तथा चागमोऽपि—

आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ।। इति ।

अत एव योगभाष्ये—सा विवेकख्यातिरविप्लवा हानस्योपायस्ततो मिथ्याज्ञानस्य दग्धबीजभावापगमः पुनश्चाप्रसव इत्येष मोक्षस्य मार्गो हानस्योपाय इत्युक्तं सङ्गच्छते । तत्र विप्लवो मिथ्याज्ञानं तद्रहिता विप्लपा ऋतम्भरेति यावत् । हानश्च

बुद्धिपुरुषयोः संयोगाभाव इति । यस्याश्च विवेकख्यातेरुदये सत्यध्यात्मनः प्रसादः युगपत्सकलभूतार्थंविषयकसाक्षात्कारप्रज्ञाप्रकाशः सर्वज्ञत्वमिति यावत् । यत्रेद-मुक्तम्—

प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान् ।
भूमिष्ठानिव शैलस्थः सर्वान् प्राज्ञोऽनुपश्यति ।। इति ।

एवं सर्वात्माधीशता च सर्वात्माधिष्ठातृत्वञ्च भवति । सर्वात्मानो गुणाः व्यवसेयात्मका व्यवसायात्मकाश्च स्वामिनं क्षेत्रज्ञं प्रत्यशेषदृश्यात्मत्वेनोपतिष्ठन्त इत्यर्थः । ६६ ।

सर्वज्ञत्वं ज्ञानैश्वर्यं सर्वात्माधिष्ठातृत्वञ्च क्रियैश्वर्यमिति । द्विविधाया अपि सिद्धेर्वैराग्याय योगिजनप्रसिद्ध्यै च सिद्धिरित्याह—

सिद्धिः परा विशोका सेयं प्राप्यैव यां विद्वान् ।
विहरति वशी विशोकः प्रक्षीणक्लेशबन्धनो नितराम् ।।६७।।

सिद्धिरिति । सेयं योगिजनप्रसिद्धेत्यर्थः । विवेकख्यातिरूपा परा सर्वोत्कृष्टा सिद्धिः यां प्राप्यैव विद्वान् ऋतम्भरप्रज्ञः वशी स्वाधीनसकलशक्तिः प्रक्षीणक्लेश-बन्धनः प्रत्यस्तमिताविद्यादिक्लेशयन्त्रणः नितरां विहरति सर्वथा स्वतन्त्रो भवतीति ।।६७।।

ननु कथं ख्यातिमात्रेणाविद्यादिक्लेशबन्धनिरास इत्याह—

प्रज्ञाकृतसंस्कारो नवो नवो बाधते त्वन्यम् ।
अवसादयति च चित्तं ख्यात्यवसानं स्वकार्येभ्यः ।। ६८ ।।

प्रज्ञाकृतेत्यादि । प्रज्ञाकृतसंस्कार ऋतम्भरप्रज्ञोदये सति समाधिभावनाजन्य इत्यर्थः । नवो नवो जायमानः अन्यन्तु व्युत्थानसंस्कारं बाधते । ख्यात्यवसानं ख्यातिर्विवेकख्यातिरवसानं परिणामफलं यस्य तत्तथाभूतं चित्तं स्वकार्येभ्यो भोग-लक्षणेभ्य अवसादयति च । दृश्यत्वेन स्वामिनं क्षेत्रज्ञं प्रति विकारारम्भकत्वशक्तिं विहन्ति चेत्यर्थः । ख्यातिपर्यवसानं हि चित्तचेष्टितमित्युक्तेः ।

अयम्भावः । योगाङ्गाभ्यासेन निरस्तेषु सकलाशुद्ध्यावरणमलेषु प्रत्युदितायाः भगवतो [भगवत्याः] विवेकख्यातेः प्रज्ञायाः सप्तधा प्रान्तभूमयो भवन्ति । तथा हि सकलमेव प्राकृतं परिणामतापसंस्कारैर्गुणवृत्तिविरोधाद् दुःखमेवेति । हेयमिति हेयं परिज्ञातव्यम् न किञ्चित्परिज्ञातुमवशिष्टमिति प्रथमा भूमिः । हेयहेतवोऽविद्यादयः क्लेशाः क्षीणाः न पुनरेतेषां क्षेतव्यमस्तीति द्वितीया । साक्षात्कृतञ्च हानं नाम अविद्याकृतबुद्धिपुरुषसंयोगाभावः आत्यन्तिको बन्धनोपरम इति यावत् । हानस्य

साक्षात्कारश्च निरोधसमाधिना वक्ष्यते, इति तृतीया च भावितो विवेकख्यातिरूपो हानोपाय: । नात: परं निष्पादयितव्यमस्तीति चतुष्टयी पुनरेषा प्रज्ञाया: भूमि: प्रयत्नख्याप्या कार्या विमुक्तिरित्युच्यते ।

अपरा च त्रयी चित्तविमुक्तिस्तत्र, निरवस्थाना: सत्त्वादयो गुणा: कारणे प्रलयाभिमुखा धर्ममेघसमाधौ चित्तेन सार्द्धमस्तं गच्छन्तीति प्रथमा । प्रयोजनाभावात् पुनरेतेषां विप्रलीनानां गुणानामनुत्पत्तिरिति द्वितीया । एतस्याञ्चावस्थायां वक्ष्यमाणनिरुद्धसमाधिरूपायां गुणसम्बन्धातीत: स्वरूपमात्रज्योतीरमण: केवली पुरुष इति तृतीयेति ।।६८।।

अथ पुनरस्य किं भवतीत्याह—

तस्यापि चेन्निरोध: परवैराग्यात्तदा विदुष: ।
निर्बीजश्च समाधि: सर्वनिरोधात्समादिष्ट: ।।६९।।

तस्यापीति । तस्य समाधिप्रज्ञाकृतसंस्कारप्रवाहस्य परवैराग्यान्निरुक्तलक्षणा अपि नाम समाधिप्राज्ञायाश्च निरोधश्चेत्तदा सर्वनिरोधात् समाधिप्रज्ञा । तज्जनितसंस्कारनिरोधजसंस्कारेति सर्वेषां निरोधाद्धेतोर्विदुष: प्रत्युदितख्याते: निर्बीज: सर्वथा निरालम्बो जात्यायुर्भोगाजनकश्च समाधिरादिष्टो भगवता योगदर्शनाचार्येणेति शेष: ।

यत्र च समाधिप्रज्ञा तत्संस्काराश्च निरुध्यन्ते । तत्र क्लेशबहुलानां वृत्त्यन्तराणां तत्संस्काराणाञ्च कथैव केति यावत् । अनेनैव निर्बीजसमाधिना ख्याते: प्रयत्नव्याप्या तृतीया प्रान्तभूमिरुदयत इति ।।६९।

सर्वनिरोधस्य प्रकारं प्रदर्शयन् सम्प्रज्ञातस्य परमकाष्ठापन्नं परप्रसंख्यानापरपर्यायं धर्ममेघाख्यं निर्बीजसमाधिमाह—

ध्यानेऽपि चेद्विरक्तो न प्रार्थयते ततोऽपि यदि किञ्चित् ।
भवति सर्वथा ख्याते: समाधिरेतस्य धर्ममेघाख्य: ।।७०।।

ध्यानेऽपीत्यादि । ध्यानेऽपि प्रसङ्ख्यानेऽपि यदि पुनरेष: प्रत्युदितख्याति: विरक्त: परवैराग्यापन्नस्तदेव विमृण्वते । ततोऽपि ध्यानादपि किञ्चित् निरुक्तं तत्तव क्रियैश्वर्यं ज्ञानैश्वर्यं वा न प्रार्थयते । तत्रापि परिणामित्वदोषदर्शनेन क्लिश्नात्येव, तदा सर्वथा विवेकख्याते: परिणतविवेकख्यातेरेतस्य भगवत: धर्ममेघाख्य: धर्म: प्रत्यग्ब्रह्मैक्यसाक्षात्कार: । तं मेघोऽतिसिञ्चति वर्षतीति धर्ममेघस्तदाख्य: समाधिर्भवति । यदाहु:—अयन्तु परमो धर्मो यद्योगेनात्मदर्शनम् । इति । ७०।

तस्मात्समूलकाषं कषिताः क्लेशास्तदा विद्वान् ।
जीवन्नेव विमुक्तो ब्रह्मविदामग्रणीः सैषः ॥७१॥

तस्मादिति । तस्माद्धर्ममेघसमाधेः जीवात्मपरमात्मनोरैक्यसाक्षात्कारादित्यर्थः । क्लेशा अविद्यादयः पुण्यापुण्यात्मकाः कर्माशयाश्च समूलकाषं कषिताः समूलं हता भवन्ति ।

परः परमात्मा स चासौ अवरः प्रत्यगात्मेति परावरस्तस्मिन् परात्माभिन्नप्रत्यगात्मनि दृष्टे सति, न मे प्रत्यक्परमात्मनोरैक्यं, समाधिना साक्षात्कृते सति तत्साक्षात्कारेण सदा यत्र मुक्तोऽस्मि शुद्धोऽस्मीति विनिश्चये सतीत्यर्थः । यत्र च श्रूयते—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

हृदयग्रन्थिरित्यत्र हृदयशब्देन चात्र तात्स्थ्यात् चित्तं गृह्यते, तस्य ग्रन्थिः (ग्रन्थिशब्देन च ग्रन्थिवद्दुर्भेद्यत्वात् । प्रत्यगात्मनो बुद्धितत्त्वेनाभेदग्रहः, स च भिद्यते । सदा मुक्तत्वादिविनिश्चयेन निरुक्तलक्षणाऽविद्या स्वतो नश्यतीति तत्कृतहृदयग्रन्थेरपि भेदः । न चाविद्याविनाशेन हृदयग्रन्थेर्भेदासम्भवः निमित्तविनाशेन कार्यविनाशस्य क्वाप्यदृष्टत्वादिति वाच्यम् । अन्धकारे रज्जौ सर्पभ्रमजनिताङ्गमेजयादेः [?] प्रदीपेनान्धकारं विनाश्य सर्पभ्रमविनिवृत्तौ तज्जनिताङ्गमेजयादेः [?] विनिवृत्तिदर्शनात् अविद्यामूलत्वात्तद्ग्रन्थिरपि मिथ्यैवेति तत्त्वम् । हृदयग्रन्थेर्भेदे च सर्वसंशयाः श्रुत्याऽनात्मीयत्वेन प्रतिपादिता, अहं सुखीत्यादिनाऽस्मात्मीयत्वेनानुभूताश्च सुखादयो धर्मा आत्मीया न वेत्यादि संशयाश्छिद्यन्ते । छिन्नेषु च तेषु पुण्यापुण्यात्मकानि कर्माणि बन्धभूतानीति यावत् । क्षीयन्ते क्षीणा भवन्तीति श्रुतेरर्थं इति । तदा सैषो विद्वान् परिणतविवेकख्यातिः जीवन्नेव विमुक्तः जीवन्मुक्त इति । ब्रह्मविदामग्रणी ब्रह्मविद्वरिष्ठइति चोच्यते इति । क्लेशकर्मनिवृत्तिरेव जीवन्मुक्तिरित्याख्यायत इति ।

जीवन्मुक्तलक्षणं यथा महोपनिषदि—

ये शुद्धवासना भूयो न जन्मानर्थभागिनः ।
ज्ञातज्ञेयास्त उच्यन्ते जीवन्मुक्ता महाधियः ॥
पदार्थभावनादार्ढ्यं बन्ध इत्यभिधीयते ।
वासनातानवं ब्रह्मन् मोक्ष इत्यभिधीयते ॥
तपःप्रभृतिना यस्मै हेतुनैव विना पुनः ।
भोगा इह न रोचन्ते स जीवन्मुक्त उच्यते ॥

आपत्सु वै यथाकालं सुखदुःखेष्वनारतः ।
न हृष्यति ग्लायति यः स जीवन्मुक्त उच्यते ॥
हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः ।
न परामृश्यते योऽन्तः स जीवन्मुक्त उच्यते ॥
रागद्वेषौ सुखं दुखं धर्माधर्मौ फलाफले ।
यः करोत्यनपेक्ष्यैव स जीवन्मुक्त उच्यते ॥
कट्वम्ललवणं तिक्तममृष्टं मृष्टमेव च ।
सममेव च यो भुङ्क्ते स जीवन्मुक्त उच्यते ॥
जरामरणमापच्च राज्यं दारिद्र्यमेव च ।
रम्यमित्येव यो भुक्ते स जीवन्मुक्त उच्यते ॥
यः समस्तार्थजालेषु व्यवहार्यपि निस्पृहः ।
परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते ॥ इति ।

धर्ममेघसमाधिमाह वाराहोपनिषदि—

अनादाविह संसारे सञ्चिता कर्मकोटयः ।
अनेन विलयं यान्ति शुद्धो धर्मो विवर्द्धते ॥
धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः ।
वर्षत्येव यथा धर्मामृतधारा सहस्रशः ॥
अमुना वासनाजाले निःशेषं प्रविलापिते ।
समूलोन्मूलिते पुण्यपापाख्ये कर्मसञ्चये ॥
वाक्यमप्रतिबद्धं सत् प्राक्परीक्षावभासिते ।
करामलकवद्बोधमपरोक्षं प्रसूयते ॥
वासनानुदयो भोग्ये वैराग्यस्य तदावधिः ।
अहंभावोदयाभावो बोधस्य परमावधिः ॥
लीनवृत्तेरनुत्पत्तिर्मर्यादोपरतेस्तु सा ।
स्थितप्रज्ञो यतिरयं यः सदानन्दमश्नुते ॥
ब्रह्मण्येव विलीनात्मा निर्विकारो विनिष्क्रियः ।
ब्रह्मात्मनोः शोधितयोरेकभावावगाहिनि ॥
निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते ।
सा सर्वदा भवेद्यस्य स जीवन्मुक्त उच्यते ॥ इति ।८१।

ततोऽपि किं स्यादित्याह—

विगतमलावरणस्यानन्त्याज्ज्ञानस्य चाल्पतामेति ।
ज्ञेयन्तदा गुणा अपि कृतकृत्यास्ते निवर्त्तन्ते ॥७२॥

विगतेत्यादि । विगतमलावरणस्य प्रत्यस्तमितसकलक्लेशकर्मावरणस्य ज्ञानस्य ज्ञायतेऽनेनेति ज्ञानं । विशुद्धचित्तसत्वस्य वृत्तिविशेषस्तस्य आनन्त्यादपरिमेयत्वात् तदा ज्ञेयं मूलप्रकृत्यादि पञ्चविंशत्यात्मकं तत्त्वम् अल्पतामेति । तदानीं जीवन्मुक्त्यवस्थायां पञ्चविंशतितत्त्वातिरिक्तमपि वस्तु तिष्ठेत्तदा तदपि प्रकाशयेत । ज्ञेयस्यैवाल्पत्वन्न तु चित्तसत्त्वस्येति भावः । तदुक्तं योगभाष्ये—ज्ञानस्यानन्त्याज्ज्ञेयमल्पं सम्पद्यते, यथाकाशे खद्योत इति । अथ धर्ममेघसमाधिना समूलं सवासनक्लेशकर्माशयोन्मूलने किं स्यात् ? तदाह गुणा अपीत्यादि कृतकृत्याः कृतानि कृत्यानि भोगापवर्गरूपाणि कार्याणि यैस्ते सत्त्वादयः निवर्त्तन्ते । भगवन्तं जीवन्मुक्तं प्रति विकारकरणशीला अपि न पुनर्देहेन्द्रियादि आरभन्त इत्यर्थः । न चैवं गुणानां परिणामक्रमे समाप्ते सति न कोऽपि पुरुषो बद्धः स्यादिति वाच्यम् । यम्प्रति कृतार्थास्तं प्रत्येव गुणानां निवृत्तस्वभावश्चैतादृशां गुणानामनतिक्रमणीयः खलु स्वभावो भवति, किमत्रास्माभिः कर्त्तव्यमिति भावः । क्लेशकर्माशयविनाशेऽपि पुनः शरीरादि कस्मान्न जायत इत्याशङ्कतो बौद्धान् प्रत्याह योगभाष्ये—

अन्धो मणिमविध्यत्तमनङ्गुलिरावयत् ।
अग्रीवस्तं प्रत्यमुञ्चत्तमजिह्वोऽभ्यपूजयत् ॥इति ।

यदि कारणोच्छेदादपि कार्यं भवेत्तदा अन्धादयोऽपि मणिवेधादिकं कुर्युरिति सर्वथैव जीवन्मुक्तस्य कदाचिदपि पुनश्शरीरादि न भवतीति भावः । प्राप्तकैवल्येषु च पुरुषेषु मुक्तेषु स्वरूपमात्रप्रतिष्ठेषु कूटस्थनित्येषु स्वरूपास्तिता च क्षणक्रमेणानुभूयते एव योगिभिरिति ॥७२॥

गुणाधिकारक्रमसमाप्तौ कैवल्यम्भवति तत् किंस्वरूपमित्याह—

पुरुषार्थैः शून्यानां लयो गुणानां स्वकारणे लिङ्गे ।
परिनिष्ठिता स्वरूपे चितिशक्तिर्वेति कैवल्यम् ॥७३॥

पुरुषार्थैरित्यादि । पुरुषार्थैः शून्यानां दर्शितभोगापवर्गानां गुणानां कृतार्थानामिति यावत् । स्वकारणे लिङ्गे लयोऽवस्थानं नाम कार्यकारणभावात्मकानां गुणानां व्युत्थानसमाधिनिरोधसंस्कारा मनसि लीयन्ते । मनोऽस्मितायामस्मिता च लिङ्गे

महत्तत्त्वाख्ये तच्चालिङ्गे मूलप्रकृताविति योऽयन्तेषां प्रलयः तद्यत्किञ्चित्पुरुषं प्रति प्रधानस्य कैवल्यं मोक्ष इति। सेयं कैवल्यात्मिका मुक्तिः भूयश्चान्ते विश्वमायानिवृत्तिरिति, तरति शोकमात्मविदित्यादि श्रुतिभिराम्नायते। मायापदेन चात्र मूलप्रकृतिरेव। तथा च कृष्णयजुर्वेदीयश्वेताश्वतरीया श्रुतिः —

मायाञ्च प्रकृतिं विद्यान्मायिनञ्च महेश्वरम्।
तयोरवयवभूतैस्तु व्याप्तमेतच्चराचरम् ॥ इति।

स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतिसिद्धं द्वितीयं मुक्तिलक्षणमाह परिनिष्ठितेत्यादि स्वरूपे परिनिष्ठिता प्रतिष्ठा चितिशक्तिर्वेति कैवल्यं महाप्रलयानन्तरमपि पुनः पुरुषस्य बुद्धिसत्त्वेनाभिसम्बन्धाभावाद्वा मोक्ष इत्यर्थः।

अत्र केचित् आद्यदलप्रतिपादितं कैवल्यं प्रधानस्यापरञ्च पुरुषस्येत्याहुः। वस्तुतस्तु बन्धमोक्षौ बुद्धिसत्त्व एव पुरुषस्तु सर्वदा च केवलीति वक्ष्यते।

इदमत्रावधेयम्। द्वयी खलु मुक्तिस्तत्र क्लेशकर्मनिवृत्तिर्जीवन्मुक्तिः गुणानां प्रतिप्रसवश्चितिशक्तेः स्वरूपप्रतिष्ठा चेति कैवल्यात्मिका विदेहमुक्तिरिति। विदेहमुक्तानधिकृत्याह [गीतायां] भगवान्—

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ [१४।२] इति।

तथा च महोपनिषदि—

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥
विदेहमुक्तो नोदेति नास्तमेति न शाम्यति। इति।

नादौ पुनरावर्तते।

तथा च श्रूयते—न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते, ब्रह्मैव सन् ब्रह्माप्येति य एवं वेदेति ॥७३॥

आसन्नादिसमाधिलाभोपायमाह—

आसन्नश्च समाधिं वैराग्यात्तीव्रसम्वेगात्।
ईश्वरभक्तिविशेषात् पुनरालभते भृशं युञ्जन् ॥७४॥

आसन्नञ्चेति। तीव्रसम्वेगाद् वैराग्यादासन्नं समाधिं लभते। चकारेण मध्यतीव्रसंवेगेनासन्नतरमधिमात्रतीव्रसम्वेगेनासन्नतमञ्च समाधिं तत्फलञ्च लभत इति सूचितम्।

उपायान्तरमाह—ईश्वरेत्यादि। भृशं युञ्जन् योगानुष्ठानतत्परः ईश्वर-भक्तिविशेषात् कायिकवाचिकमानसिकात्मभजनात् पुनरासन्नादिसमाधिं तत्फलञ्च लभते। भक्त्याभिमुखीकृतो हि भगवान् क्षिप्रमस्य समाधिलाभो भवत्विति सङ्कल्प-मात्रेण तमनुगृह्णातीत्यर्थः। तदुक्तं भगवता—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥इति।

[भगवद्गीता ९।२२]

ननु कोऽयमीश्वर इत्याह—

क्लेशैः कर्मविपाकैर्वासनया चापरामृष्टः।
सर्वगुरुः सर्वज्ञः सदा विमुक्तः स ईश्वरः प्रोक्तः ॥७५॥

क्लेशैरित्यादि। क्लेशैरविद्यादिभिः कर्मविपाकैः पुण्यापुण्यात्मकानि कर्माणि तद्विपाकैस्तत्फलैर्जात्यायुर्भोगैरित्यर्थः। वासनया विपाकानुगुणसंस्कारैश्च अपरामृष्टस्सद तत्सम्बन्धरहितः। ते खलु अविद्याकर्माशयादयश्चित्तधर्मा मनसि वर्त्तमाना अपि राजनि योद्धृगतजयपराजयवत् तत्फलभोक्तृत्वेन पुरुषे व्यपदिश्यन्ते। ईश्वरस्य तु तत्सम्बन्धो न कदाचिद् भूतो न भावी। तदाह—सदा विमुक्त इति। एतेन क्लेश-कर्माशयादिसम्बन्धशून्यः पुरुषविशेष एवेश्वरोऽभिमतश्चेत्तर्हि सन्तु मुक्तात्मानो प्रकृतिलीनाश्च बहवोऽपीश्वराः न हि तदतिरिक्तः कश्चित्प्रमाणपथमवतरतीति वदन्तः साङ्ख्याः परास्ताः। मुक्तात्मनां पूर्वबन्धकोटेः सत्त्वात्, प्रकृतिलीनानाञ्चोत्तरबन्धकोटेः सम्भवात्। यतो वा इमानि भूतानि जायन्ते इत्यादिश्रुतिसिद्धजगत्कर्तृत्वानुमानेनेश्वर-सिद्धिस्तु प्रधाने जगत्कर्तृत्वादि प्रसाध्य सांख्येऽपलपितेति वेदकर्तृत्वेनेश्वरसिद्धिं विवक्षुः विशिनष्टि सर्वगुरुरिति। ईश्वरे कालपरिमाणाभावात् सर्वेषां ज्ञानोपदेष्टॄणां कपिलादीनामपि गुरुः, स्वनिर्मितवेदादिशास्त्रोपदेशेनेति भावः। तथा चाम्नायते—यस्य निः श्वसितं वेदाः। एतस्य महतो भूतस्य निःश्वसितमेवैतत्। यदृग्वेदो यजुर्वेदः सामवेदो अथर्वाङ्गिरस इतिहासः पुराणं श्लोको व्याख्यानान्यनुमानानि प्रमाणभूतानी-त्यादिश्रुतिभिरिति। एतेन निरुक्तश्रुतिसिद्धवेदशास्त्रनिर्मातृत्वानुमानेनेश्वरसद्भावे प्रमाणमपि दर्शितम्। यत्तु वेदानां नित्यताप्रतिपादकः स चार्थवाद इत्यन्यत्र प्रपञ्चितम्।

प्रमाणान्तरं प्रदर्शयन् पुनर्विशिनष्टि सर्वज्ञ इति। सर्वज्ञबीजस्य यत्र पराकाष्ठा। तथा चात्रानुमानम्—सर्वज्ञबीजं निरतिशयं सातिशयत्वात् यद्यत्सातिशयं तत्तत्सर्वं प्राप्तिमत् परिमाणवत् यथावदरामलकबिल्वादिगतं सातिशयं महत्त्वमात्मनि

काष्ठाप्राप्तम् तथा सर्वज्ञबीजं यत्र पराकाष्ठाप्राप्तम् । स तादृशः पुरुषविशेषः शिवेश्वर-पुरुषोत्तमादिपदप्रतिपाद्य ईश्वरः प्रोक्त इति । यस्य खलु भगवतः षडङ्गानि दशाव्ययाश्च प्रोच्यन्ते । तथा च वायुपुराणे—

सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञा
षडाहुरङ्गानि महेश्वरस्य ॥
ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसम्बोधो ह्यधिष्ठातृत्वमेव च ।
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥७५॥

कश्च भक्तिविशेषो येनेश्वरस्तुष्येदित्याह—

बुद्धेः प्रतिसम्वेदी प्रजपन्तद्वाचकं प्रणवम् ।
अनुचिन्तयन् तदर्थान्निरन्तरायः स्वरूपमपि वेत्ति ॥७६॥

बुद्धेरित्यादि । तद्वाचकं तस्येश्वरस्य वाचकं संज्ञेति यावत् प्रणवम् । ओङ्कारं प्रजपन् तदर्थान् ओङ्कारार्थाननुचिन्तयन् बुद्धेः प्रतिसम्वेदी, दर्शितविषयत्वेन बुद्धिधर्मानात्मीयत्वेनाभिमन्यमानः पुरुष इति यावत् । निरन्तरायः व्याधिस्त्याना-दिविघ्नरहितः सन् स्वरूपमपि वेत्ति स्वरूपं शुद्धं नित्यमुक्तश्चात्मानं जानाति, विवेकख्यातिरस्य भवतीति यावत् । अपि च असत्त्वादिसमाधिं तत्फलानि च भगवद-नुग्रहेण लभत इत्यर्थः । व्याधिस्त्यानादिविघ्नानि प्रागुक्तानीति । प्रणवस्येश्वरवाचक-त्वमाह योगियाज्ञवल्क्यः -

अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः ।
तस्योङ्कारः स्मृतो नाम तेनाहूतः प्रसीदति ॥ इति ।

ननु नित्यतृप्त्यादिविशिष्टस्य जगत्क्रियाशक्तिशालित्वेऽपि निःप्रयोजनत्वा-ज्जगत्क्रिया न सम्भवतीति अलमीश्वरसिद्धयेति चेन्न, परमकारुणिकस्य तस्य भगवतो भूतानुग्रहस्यैव प्रयोजनत्वात् । तथा च योगभाष्ये —तस्यात्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनम् । ज्ञानधर्मोपदेशेन संसारिणः पुरुषानुद्धरिष्यामीति ।
प्रणवार्थनिरूपणं यथा ब्रह्मविद्योपनिषदि —

ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः ।
शरीरन्तस्य वक्ष्यामि स्थानं कालत्रयन्तथा ॥

तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः ।
तिस्रो मात्रार्द्धमात्रा च त्र्यक्षरस्य शिवस्य तु ॥
ऋग्वेदो गार्हपत्यश्च पृथिवी ब्रह्म एव च ।
अकारस्य शरीरन्तु व्याख्यातं ब्रह्मवादिभिः ।
यजुर्वेदोऽन्तरिक्षश्च दक्षिणाग्निस्तथैव च ॥
विष्णुश्च भगवान् देव उकारः परिकीर्त्तितः ।
सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च ॥
ईश्वरः परमो देवो मकारः परिकीर्त्तितः ।
सूर्यमण्डलमध्ये च ह्यकारः शङ्खमध्यगः ॥
उकारश्चन्द्रसंकाशस्तस्य मध्ये व्यवस्थितः ।
मकारस्त्वग्निसंकाशो विधूमो विद्युतोपमः ॥
तिस्रो मात्रास्तथा ज्ञेयाः सूर्यसोमाग्निरूपिणः ।
शिखा तु दीपसंकाशा तस्मिन्नुपरि वर्त्तते ॥
अर्द्धमात्रा तथा ज्ञेया प्रणवस्योपरि स्थिता ।
पद्मसूत्रनिभा सूक्ष्मा शिखा सा दृश्यते परा ॥ इति

तुरीयमात्रार्थश्चाम्नातो माण्डुक्यश्रुत्या यथा—नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्राज्ञं नाप्राज्ञम् अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते, स आत्मा स विज्ञेय इति । ब्रह्मविष्णुरुद्रा एव विश्वतैजसप्राज्ञा इति हिरण्यगर्भविराट्ईश्वरा इति चोच्यन्ते ।

ओङ्कारस्योच्चारणं यथा ध्यानबिन्दूपनिषदि—

ह्रस्वो दहति पापानि दीर्घः सम्पत्प्रदोऽव्ययः ।
अर्द्धमात्रासमायुक्तः प्रणवो मोक्षदायकः ॥
तैलधारामिवाच्छिन्नं दीर्घघण्टानिनादवत् ।
अवाच्यं प्रणवस्याग्रं यस्तं वेद स वेदवित् ॥ इति ।

प्रणवजपस्य प्राशस्त्यमाह पराशरस्मृतौ—

सर्वेषां जपसूक्तानामृचाञ्च यजुषान्तथा ।
साम्नां चैकाक्षरादीनां गायत्री परमो जपः ॥
तस्याश्चैव तु ओङ्कारो ब्राह्मणस्य उपासत । इति ।

ओङ्कारमधिकृत्य श्रुतिरपि—

एतदालम्बनं श्रेठमेतदालम्बनं परम् । इति ।

ओंकारस्य सर्ववेदसारत्वं छान्दोग्यश्रुत्या यथाम्नातम्—प्रजापतिर्लोकानभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयी विद्या संप्रास्रवत् । तामभ्यतपत्तस्या अभितप्तया एतान्यक्षराणि संप्रास्रवन्तः भूर्भुवः स्वरिति तेभ्योऽभितप्तेभ्य ओंकारः संप्रास्रवद् यथा शङ्कुना सर्वाणि पर्णानि सन्तृणान्येवमोङ्कारेण सर्वा वाक् सन्तृणा ओंकार एवेदं सर्वमिति । तथा च स्मर्यते—

स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् ।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ।। इति ।

अस्यार्थः—स्वाध्यायात् प्रणवजपादनन्तरं योगमभ्यसेत् । समाधेरनन्तरं पुनः स्वाध्यायमामनेत् । प्रणवजपमभ्यसेत् उभयोर्योगपद्यासम्भवादिति भावः । अन्यत्सुगमम् । इत्थञ्च प्रणवजपपूर्वकेश्वरानुचिन्तनमेवेश्वरप्रणिधानरूपभक्तिविशेष इति बोध्यम् । एतत्स्मृत्यनुरोधेन च ।

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ।।"

[भगवद् गीता ।८।१३।] इति

भगवदुक्तश्लोकः पूर्वश्लोकात्तदा स्थितो योगधारणामिति वाक्यमाकृष्य व्याख्येय इति । अमृतनादोपनिषदि च श्रूयते—

ओङ्काररथमारुह्य विष्णुं कृत्वाथ सारथिम् ।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ।।
तावद्रथेन गन्तव्यं यावद्रथः पथि स्थितः ।
स्थाता रथपथिस्थानं रथमुत्सृज्य गच्छति ।। इति ।

एतेन—

स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ज्ञाननिर्मथनाभ्यासाद् देवं पश्येन्निगूढवत् ।।

इति श्रुतिरपि व्याख्यातेति ।७६ ।।

इदानीन्तुरीयस्य खलु भगवतोऽतिक्रान्तभावनीयाख्यस्य योगिवर्यस्य कृत्यमसम्प्रज्ञातसमाधिमाह—

अथ सर्ववृत्त्यभावोपायिकाभ्यासैककारणस्त्वपरः ।
संस्कारमात्रशेषो मुनिभिर्गीतोऽप्यसौ द्विविधः ।।७७।

अथेत्यादि । अथानन्तरं सकारणसविभूतिसविशेषसम्प्रज्ञातनिरूपणानन्तरं क्रमप्राप्तः असम्प्रज्ञातसमाधिर्निरूप्यत इति यावत् । अपरो द्वितीयोऽसम्प्रज्ञातसमाधिः सर्ववृत्त्यभावोपयिकाभ्यासैककारणः सर्वासां क्लिष्टाक्लिष्टवृत्तीनामभावस्योपयिकं कारणं यत्परवैराग्यं तस्य योऽभ्यासः पौनःपुन्येनानुष्ठानं स एकस्तदेव कारणं यस्य तादृशः सम्प्रज्ञातसमाधिसाधनमसम्प्रज्ञातसिद्धौ न प्रभवतीति भावः । स्वरूपमाह— संस्कारमात्रशेष इति, सर्वथा निर्विषय इत्यर्थः । सम्प्रज्ञातविलक्षणो निर्बीजोऽसम्प्रज्ञात इति यावत् । तथा च स्मर्यते—

मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः ।
असम्प्रज्ञातनामासौ समाधिरभिधीयते ॥

असौ असम्प्रज्ञातसमाधिः मुनिभिर्द्विविधो गीत इति ॥७७।

द्वैविध्यमाह—

भवकारणो विदेहप्रकृतिलयानाञ्च सौगतादीनाम् ।
श्रद्धावतामुपायप्रत्यय उक्तो मुमुक्षूणाम् ॥७८॥

भवेत्यादि । द्विविधोऽसम्प्रज्ञातो भवकारणश्चोपायकारणश्चेति । तत्र सौगतादीनां बौद्धादिनास्तिकानां विदेहप्रकृतिलयानां विदेहाश्च प्रकृतिलयाश्च तेषाम् । विदेहास्तावत्—

रसाद्वै शोणितं जातं शोणितान्मांससम्भवः ।
मांसात्तु मेदसो जन्म मेदसोऽस्थिसमुद्भवः ॥
अस्थ्नो मज्जा समभवन्मज्जातः शुक्रसम्भवः ।
शुक्राद्गर्भः समभवत्ततः पिण्डसमुद्भवः ॥ इति

स्मृत्युक्तरक्तमांसमेदोऽस्थिमज्जाशुक्राख्यषट्कोशनिवृतो देहस्तद्रहिताः ये खलु भूतेन्द्रियान्यतममात्मबुद्ध्योपासते ते च तद्वासनावासितान्तःकरणाः पिण्डपातानन्तरं सद्भावमापन्नमण्डूकदेहवद् भूतेन्द्रियेषु विलीना विदेहा इत्युच्यन्ते । एवमव्यक्तादिष्वष्टविधप्रकृतिषु लीनाः प्रकृतिलया इत्युच्यन्ते । तेषां भवकारणः भवत्यस्मादिति भवोऽविद्या तत्कारणोऽसम्प्रज्ञातो भवति । असम्प्रज्ञातत्वञ्चात्र वृत्तिनिरोधमात्रेण साधिकारसंस्काराणां तत्र सत्त्वात् । अविद्यामूलकत्वादेव तेषां साधिकारतया यथाकालं प्रमाप्य पुनर्वर्षासु धारानिपातैर्मण्डूकदेहवत् प्राक्तनसंस्कारैः प्रादुर्भावात् । तथा च स्मर्यते—

दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः ।
भौतिकास्तु शतं पूर्णं सहस्रन्त्वाभिमानिकाः ॥

बोद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः ।
पूर्णं दशसहस्रन्तु तिष्ठन्त्यव्यक्तचिन्तकाः ।।
पुरुषं निर्गुणं प्राप्य कालसङ्ख्या न विद्यते ।। इति ।

द्वितीयमाह श्रद्धावतामिति । श्रद्धा चेतसः सम्प्रसादोऽभिरुचिरतीच्छा वेत्यर्थस्तद्वतां मुमुक्षूणां योगिनामुपायप्रत्यय उपायः परवैराग्यं प्रत्ययः कारणं यस्य स तादृशोऽसम्प्रज्ञात उक्तः । परवैराग्यमापन्नानां श्रद्धैव खलु सम्पादयत्यसंप्रज्ञातम् । तथा च योगभाष्ये—सा हि जननीव कल्याणी योगिनं पाति तस्य श्रद्धानस्य विवेकार्थिनो वीर्यमुपजायते । समुपजातवीर्यस्य स्मृतिरुपतिष्ठते । स्मृत्युपस्थाने च चित्तमनाकुलं समाधीयते । समाहितचित्तस्य प्रज्ञाविवेक उपावर्त्तते । येन यथावद्वस्तु विजानाति तदभ्यासात्तद्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवतीति । वीर्यं ध्यानसामर्थ्यम्, स्मृतिर्ध्यानम् । समाधीयत इत्यनेन च सम्प्रज्ञातसमाधिसाधनयमनियमादिसकलाङ्गानामत्राप्येकाग्राख्यचित्तभूम्यावेशात् प्रागावश्यकता सूचितेति बोध्यम् ।।७८।।

ननु निरुद्धे चेतसि बुद्धेः प्रतिसम्वेदी पुरुषः किं स्वरूप इत्याह—

द्रष्टुस्तदा स्वरूपेऽवस्थानं भवति यथा कैवल्ये ।
उपचरितभोगशून्यः शुद्धो मुक्तश्च केवली पुरुषः ।।७९।

द्रष्टुरित्यादि । तदाऽसम्प्रज्ञातसमाध्यवस्थायाम्, द्रष्टुः साक्षिणः स्वरूपे कूटस्थनित्यलक्षणेऽवस्थानं प्रतिष्ठा । बौद्धा एवात्राधाराधेयभाव इति बोध्यम् ।

अयम्भावः, दर्शितविषयतया भोक्तृत्वशक्तिमतः स्वामिनः पुरुषस्य शान्तघोरमूढेति वृत्तित्रयात्मकमयस्कान्तमणिकल्पं त्रिगुणात्मकमुपभोग्यशक्तिमच्चित्ततत्त्वं व्युत्थाने दृश्यत्वेनोपकारि भवति नाम । शुद्धस्फटिकस्येव पुरुषस्य जपाकुसुमाद्युपाधिवशाल्लोहितादिवत् चित्तौपाधिक एव शान्तमूढादिव्यपदेशो न तु वास्तविक इति यथा चलत्सु जलतरङ्गेषु चलन्निव चन्द्रस्तथा चेन्द्रियवृत्तिद्वारेण विषयाकारतया परिणमते पुरुषस्तदाकार एव भासते च । यदा पुनश्चित्ततत्त्वं निरुद्धं तदा निश्चलजलस्थितचन्द्र इव स्वरूपप्रतिष्ठ इति एतस्यानौपाधिकस्वरूपं चैतन्यं त्वागमानुमानगम्यमेव न तु लोकप्रत्यक्षगोचरम् । यत्र तत्रात्मसाक्षात्कारे साक्षात्कारपदस्य स्वरूपावस्थानमेवार्थ इति तत्त्वम् । चित्तस्य शान्तघोरमूढात्मकत्वं प्राग् व्याख्यातम् ।

तत्र दृष्टान्तमाह—यथा कैवल्य इति । निरोधावस्था तु साक्षात्कैवल्यरूपैवेति भावः । चित्तशुद्धिरेव मोक्षेऽपेक्षिता न तु क्रियैश्वर्यं ज्ञानैश्वर्यं वा । तदुक्तं योगभाष्ये

एतस्यामवस्थायां कैवल्यं भवति। ईश्वरस्यानीश्वरस्य वा विवेकजज्ञानभागिनः इतरस्य वेति। तथा चोपशमप्रकरणे वाशिष्ठे—

द्रव्यमन्त्रक्रियाकालशक्तयः साधु सिद्धिदाः।
परमात्मपदप्राप्तौ नोपकुर्वन्ति कश्चन ॥

तथा च निरोधेन सर्वथा विवेकख्यातिः समुदयते। तथा च ख्यातिपर्यवसानो दग्धबीजभावो गुणाधिकारो विनिवर्त्तते। ततश्च पुरुषसारूप्यमिवापन्नं चित्तसत्त्वं शुद्धमित्याख्यायत इति चित्तसत्त्वस्यैव शुद्धिर्न तु पुरुषस्येत्यभिप्रेत्याह—उपचरित-भोगशून्य इत्यादि। उपचरित आरोपितोऽविद्याकल्पित इति यो भोगस्तद्भिन्न स्तद्विधुरः शुद्धो मुक्तश्चाख्यायते। परमार्थतस्तु बन्धमोक्षौ चित्तसत्त्वे एव न तु पुरुषे स्तः, स तु केवली कूटस्थनित्यः सदाशिव इति यावदिति। यः कश्चिद्योगाभ्यासं करोति स मातापितरौ तारयति। तथा च ब्रह्मवैवर्त्ते—

कृतार्थौ पितरौ तेन धन्यो देशः कुलञ्च तत्।
जायते योगवान् यत्र दत्तमक्षयतां व्रजेत् ॥इति।

तथा चामनस्कखण्डे—

दर्शनादर्चनादस्य त्रिसप्तकुलसंयुताः।
अज्ञा मुक्तिपदं यान्ति किं पुनस्तत्परायणः ॥

तत्रैव पार्वतीं प्रति महेश्वरः—

अन्तर्योगं बहिर्योगं यो विजानाति तत्त्वतः।
त्वया मयाप्यसौ वन्द्यश्शेषैर्वन्द्यस्तु किम्पुनः ॥इति।

सदाचारवतो ब्राह्मणस्यैवात्र विद्यायामधिकारः। तथा च श्रुतिः—

विद्या ह वै ब्राह्मणमाजगाम
गोपाय मा शेवधिष्टेऽहमस्मि।
असूयकायानृजवे शठाय
मा मा ब्रूया वीर्यवती तथा स्याम् ॥
यमेव विद्या श्रुतमप्रमत्तं
मेधाविनं ब्रह्मचर्योपपन्नम्।
तस्मा इमामुपसन्नाय सम्यक्
परीक्ष्य दद्याद्वैष्णवीमात्मनिष्ठाम् ॥ इति।

आकरेभ्यः समाहृत्य रचिता सुमनोहरा ।
समर्प्यते च विद्वत्सु योगरत्नावली मया ।।

मा धान्मत्सरिणां मनस्सु विमलोल्लासाय सैषा पदम्
किं नैष्यन्ति निरीक्ष्य तां कृतधियः सन्तः कियन्तो मुदम् ।
गुञ्जापुञ्जनिषक्तभीलवनितामुक्तापि मुक्तावली
प्रेम्णा धन्यविलासिनीकुचतटे विन्यस्यते यत्पुनः ।।

इति श्रोत्रियविद्वद्वरेण्यश्रीठक्कनशर्म्मविरचितयोगरत्नावल्यां पञ्चमं गुच्छकम् ।

।। समाप्तश्चायं ग्रन्थः ।।

प्रशस्तिपत्रम्

मिथिलामण्डलान्तर्गत पाहीटोलग्रामवास्तव्यो भीपाहूठ श्रोत्रिय गुणपति शर्म-
णस्तनुजन्मा श्रीठक्कुनशर्मा स्वदेशएव कौमुदी रघुवंशाद्यध्ययनसमानन्त्युत्पत्ति
कौभूयस्यै व्युत्पत्त्यै स्पृहयन् काशीमागत्य विविधा निरुदावलीविराजमानानि
कोपाधिभूषित मिथिलेश दरभङ्गानरेश महाराजसंस्थापित काशीस्थपाठशा-
लायां व्याकरणे मनोरमां शब्दरत्नं सपरिष्कारं परिभाषेन्दुशेखरं शब्देन्दुशे-
खरं पातञ्जलमहाभाष्यस्य नवाह्निकानि अङ्गाधिकारस्य सप्तमाह्निक-
त्रयस्य प्रदीपमुद्योतञ्च मञ्जूषां भूषणं न्याये मुक्तावलीं व्युत्पत्तिवादं शक्ति-
वादं विषयतावादं सांख्ये सांख्यतत्त्वकौमुदीं वेदान्ते वेदान्तपरिभाषां शा-
रीरकभाष्यसहितं ब्रह्मसूत्रं मीमांसायाम् आपोदेवीं प्राचीनन्याये सवात्स्या-
भाष्यं गौतमसूत्रं काव्ये माघकिरातनैषधचरितानां कतिपयान् सर्गान्
साहित्ये कुवलयानन्दं साहित्यदर्पणं काव्यप्रकाशं नाटके शाकुन्तल-
मुत्तररामचरितादिकं साधु च अधीतवानिति प्रोक्तग्रन्थेष्वध्यापनक्षमो
यमित्यर्थबोधकं प्रतिष्ठापत्रमस्मै सुशीलाय मेधाविने सदाचाराय वित-
रन्ति काशीस्थाः पण्डितवर्या इति शुभम् ॥

म.म. शिवकुमारशर्ममिश्राः
श्रीजयदेवशर्ममिश्रः
श्री...नाथमिश्रः
भवानीदत्त दीक्षितः
वामाचरणभट्टाचार्यः
श्री पारसनाथ...शर्म्मा।
श्री रामजी शर्म्मा
जगन्नाथत्रिपाठी
श्रीमधुसूदनशर्ममिश्राः

म.म. श्री राखालदास न्यायरत्नः
प्रियनाथशर्मा
मुरलीधरझा
चक्रधर झा

उद्धृताः ग्रन्था ग्रन्थकारा आचार्याश्च

विशिष्टशब्दानुक्रमणिका

——